८
९२ Adhi Karnartha Sangraha Karika

~~262~~

अधिकरणार्थ संग्रह कारिका

अर्थभेदानां

3/11

१७ ग्राम्यादिकिंचिदप्राप्तं प्राप्तुमिष्टमिहेच्छति। हेमादि विस्मृतं किंचित्करस्थमपि लिप्सते १८ परिहार्यं तथा निष्टं कंटकादि जिहा
१ सति। रज्ज्वां सर्पादिकं किंचित्सक्तमेव जिहासति १९ नियनोपायसाध्यत्वादवाप्यपरिहार्ययोः। विधितः प्रतिषेधाच्च साधनापेक्षिताभ
वेत् २० अज्ञानांतरितत्वेन संप्राप्तत्यक्तयोः पुनः। यथा स्यज्ज्ञानतो नान्यत्पुरुषार्थाय कल्पते २१ नान्यद्ज्ञानतोस्ति तद्द्वितीयस्यात्मनो यथा।
इति। निवृत्तिस्तद्वदेवास्य नावगत्यात्मनो यथा २२ स्वयंशिवः शिवाभार्या प्रसिद्धा सर्वमंगला। विघ्नहर्ता सुतो यस्य पायात्स जगदीश्वरः २३
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्। सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये २४ सुब्रह्मण्यानुग्रहेण नीलकंठमहागुरोः। करोति गुण
सूत्राढ्यं ब्रह्मसूत्रार्थसंग्रहं। २५ वेदांतानां विचारस्तु पुरुषार्थसमर्पकः। इति पत्नोयमारब्धो नतु प्रौढिप्रकाशने २६ सिद्धांतरसपूर्णो निस
द्व्यर्थकुसुमान्विते। भ्राजंते विद्वदारामे यशोगंधेन चारुणा २७ तदेवात्रोपचीयंते सिद्धांतरसबिंदवः। अतोरत्नं सतां साधूनां मोदकोस्त्वेषसंग्र
हः २८ भोः सज्जनाः सरसवाङ्मयतत्त्वविज्ञा विज्ञापयामि भवतो हमुदारचित्तान्। युष्मत्प्रमादकलुषे मदुदीरितांबुशोध्यं भवद्भिरिह केकतकी
फलवद्भिः २९ श्रुत्वा भाषितमव्यक्तमत्रं वक्रि बालके। संतो मुदं प्रयांत्येव दोषदृष्टिं न कुर्वते ३० स्कांदे। नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे
स्थितं। किंचित्तदन्यथा जातं त्रेतायां द्वापरेऽखिलं १ गोतमस्य मुनेः शापाज्ज्ञाने त्वज्ञानतां गते। संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः २ १
शरण्यं शरणं जग्मुर्नारायणमनामयं। तैर्विज्ञापितकार्यस्तु भगवान्पुरुषोत्तमः ३ अवतीर्णो महायोगी सत्यवत्यां पराशरात्। उत्स

3

न्नो भगवान्वेदानुज्जहार हरिः स्वयं ४ चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः। शतधा चैकधा चैव तथैव च सहस्रधा ५ कृष्णो द्वादश
धा चैव पुनस्तस्यार्थवित्तये। चकार ब्रह्मसूत्राणि येषां सूत्रत्वमंजसा ६ अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखं। अस्तोभमनवद्यं च
सूत्रं सूत्रविदो विदुः ७ निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः। यथा व्यासत्वमेकस्य कृष्णस्यान्यविशेषणात् ८ सविशेषितसूत्रा
णि ह्यपराणि विदो विदुः। मुख्यस्य निर्विशेषेण शब्दोन्येषां विशेषतः ९ इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः। सूत्रेष्वेतेषु सर्वेषु निर्णयः
समुदीरितः १० शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः। एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ११ ब्रह्मरुद्रादिदेवेषु मनु
ष्यपितृपक्षिषु। ज्ञानं संस्थाप्य भगवान्क्रीडते पुरुषोत्तमः १२ गरुडपुराणे। अथातः शब्दपूर्वाणि सूत्राणि निखिलान्यपि। प्रारभ्यंते नियु
सेवतत्किमत्र नियामकं १३ एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः। सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिःसृतौ १४ ओंकारश्चाथ
शब्दश्च तस्मात्प्राथमिकावुभौ। तद्धेतुत्वं वदंश्चापि तत्तीयो भ उदाहृतः १५ कृते ज्ञानप्रदः सत्यस्त्रेतायां दत्त एव तु। द्वापरे व्यासना
मा च कलौ शंकरनामधृक् १६ अत्रे दत्तः शक्तिपुत्रसुतो व्यासः प्रकीर्तितः। ब्रह्मपुत्रः सुतः साक्षाच्छंकरः परिकीर्तितः १७ सत्यो
ब्रह्मा हरिर्दत्तो व्यासो रुद्रः प्रकीर्तितः। शंकरः सविता साक्षादीश्वरः सर्वदैवतं १८ युगेयुगे प्रनष्टस्य शास्त्रस्योद्धरणाय वै। श्रुतिस्मृ
सर्वबोधाय पाषंडनिधनाय च १९ अवतारांश्च कारासोश्रुतिस्मृत्युदितान्स्वकान् १९ प्रमाणिकः श्रुत्युदितः स यो थों व्यासो त्करीत्यापति

इति शिवपुराणे। भार्गवसादानाशि
वर्गेणाप्यपिता। वि
धाधिराजनामा
पितामह इति शं
करविजयेपि
तमासि ।१७।

१ इति। विष्णुधर्मोत्तरे।

पादितश्चेत्।व्यासोदितंशंकरबोधितंचेद्यः शंकरोसौसवितासईश्वरः २० व्याकुर्वन्व्याससूत्रार्थश्रुतेरर्थंयथोचिवान्।श्रुतेर्न्याय्यः सएवार्थः शं
करःसवितानना २१ इत्युपोद्घातः भगवद्व्याससूत्राणामर्थसंग्रहकारिकाः।सुब्रह्मण्येनरच्यंतेशीघ्रबोधायकारिकाः १ ओम्।अथा
२ तोब्रह्मजिज्ञासा१ अहंममेतिचाध्यासादनाद्यध्यस्तमायया।सदासंसरतःपुंसःपूर्वपुण्योदयेसति १ नित्यस्वाध्यायविधिनाधीतस्वाध्याय
तःश्रुतेः।आपाततज्ञानिनःकाम्यफलानित्यत्वसंश्रवात् २ मोक्षस्यसुखरूपस्यनित्यत्वावगमाच्छ्रुतेः।काम्यस्वल्पादरोप्यत्वानित्यकर्मानुति
ष्ठति।किंचित्सुखकर्मफलेसंभाव्यास्याद्विरक्तता ३ शमादिषट्कसंपत्तिर्नित्यानित्यविवेचनं।सं° श्रुतेहिवेदोक्तनिष्कामानुष्ठितेर्बलात् ४ भा
संभाव्यत्वध्यासतस्तुविश्वासोवर्धतेश्रुतौ।स्वतःप्रमाणआम्नायेदृढविश्वासयोगतः।प्रत्यवायोभवेद्यस्मिन्वेदोक्तेत्वननुष्ठिते ५
तदेवकर्मकुरुतेनान्यत्संशयत्वनिश्चयात्।बहुकालमनुष्ठानादाम्नायप्रोक्तकर्मणां ६ नितांतनिर्मलस्वांतोदुःखहेतोविरक्तिमान्।प्रव
र्ततेसुखोपायेसदानित्यसुखेच्छया।वेदप्रोक्तशमादीनिसाधनान्यनुतिष्ठति ७ सत्यांसाधनसंपत्तौस्वाध्यायाधीत्यनंतरं।प्रागूर्ध्वं
वाधर्मजिज्ञासायाजिज्ञासितुंब्रह्मतत्।ज्ञातुंचशक्यतेनैवासत्यांतस्यांहिशक्यते ८ तस्मात्साधनसंपत्तेरानंतर्यंहिबोध्यते।अथशब्दे
नतोधर्मजिज्ञासोपरितोच्यते ९ अतःशब्दोथशब्देनसूत्रेस्मिन्सूचितस्यहि।साधनानांचिद्विचारहेतुत्वस्यानुवादकः १० अनुवादफ
लंतत्राहेतुत्वाक्षेपवारणात्।साधनानांचिद्विचारहेतुत्वन्याय्यतेवहि ११ अथवाचस्पतिमतं।उक्तसाधनसंपत्तेरूर्ध्वंदुःखापनोदत २

3/11

श्रीगणेशायनमः।सव्यंजकात्मविद्यायांबुद्धिर्येनप्रचोदिता।तस्यदेवस्यसवितुर्ध्यायेयंवरदंमहः १ मुमुक्षुमुक्तविषयिप्रियसद्गुणमंडितं।
सदोषोहंचतुर्दोषंनिर्दोषंकृष्णमाश्रये २ जंबूपत्रस्वस्तिकांकैःसच्छत्रयवचक्रकैः।वज्रांकुशध्वजाष्टास्त्रैर्विलसद्ध्वरेखया ३ दक्षि
णश्चरणाक्षोयंहरेर्हरतुमेतमः।मत्स्यामलार्धशश्यांकत्रिकोणांबरलक्ष्मभिः ४ गोष्पदेंद्रधनुःशंखैःकलशांकेनभूषितः।सव्यःपा
दविधुर्भक्तचकोरान्प्रीणयत्वयं ५ सिंधुजापतिपादाब्जनौकानाविकतांगतान्।सतोहंशरणंयामिनिमग्नोभवसागरे ६ नीलकंठा
भिधंतातंब्रह्मविद्याप्रदंगुरुं।तुरीयाश्रममाश्रित्यनिजानंदाभिधंभजे ७ स्वपाणिपद्मंमेमूर्ध्निविन्यस्यकृतवान्पिता।अनुरक्तंकृतार्थंमांत
कथंविस्मराम्यहं ८ पितामहंबालकृष्णंसच्चिदानंदमाश्रये।यत्प्रसादात्तत्त्वसाक्षात्कारवान्मेपिताऽभवत् ९ पितामहगुरुंवंदेनुचानंब्र
ह्मकोविदं।दिवाकराभिधंहार्दतमोघ्नंबोधभास्करं १० गत्वाश्रीपांडुरंगस्यक्षेत्रंसंन्यस्यतत्रहि।सर्वात्मभावंसंप्रापनीलकंठोगुरुःपिता
११ रुद्राजद्गुणस्तत्राद्य ब्रह्मसूत्रोर्जितश्रियं।विश्वसद्व्यवहारार्थंवेदव्यासंहरिंभजे १२ अद्वैतस्थापकाचार्यान्भगवत्पादसंज्ञकान्।वंदे
श्रीशंकराचार्यान्परिव्राजोजगद्गुरून् १३ अब्रह्मण्यतमःसूर्यान्कृब्रह्मण्यानुकंपिनः।वंदेसुरेश्वरमुखांस्तरागविबुधोत्तमान् १४ श्री
शंकरार्यवरदपाणिपद्मसमुद्भवाः।वेदाइवात्रचत्वारोवतीर्यमेजयंतिहि १५ सुब्रह्मण्येनशारीरभाष्यवर्त्मानुयायिना।शारीरब्रह्ममीमां
सासूत्रार्थोनिर्विरच्यते १६ अनंतसुरेश्वराचार्यवार्त्तिकम्।नयुक्तंकामनामुक्तौपुंसानास्तीतिभाषितं।देशकालानवच्छिन्नसुखाद्यर्थित्वदर्शनात्।

३ त्रहि। अध्याहर्तव्यमित्याहाचार्यो विवरणाभिधः २७ प्रसिद्धमप्रसिद्धं वा विचारात्प्राक्तदन्नतु। यदि ज्ञातमसंदेहात्र शास्त्रविषयं भवेत् २८
ज्ञाते ऽज्ञानायोगतो हि तन्निवृत्तिः फलं च न। यद्यज्ञातं तदुद्दिश्य विचारो घटते कथं २९ अतो विचारानारंभः संप्राप्तस्तत्रिविच्छ्रुणु। आपात
तो ब्रह्मपदप्रसिद्धब्रह्मणः श्रुतौ। निर्विकल्पापरोक्षार्थं विचारोयं निरर्गलः ३० अतो नाद्यध्यस्तदुःखरूपमायानिवृत्तये। चिदानंदाद्वय
ब्रह्म मत्यैकार्यो विचारणा ३१ इतिश्री भगवद्वेदव्यासप्रणीतशारीरकब्रह्मवेदांतमीमांसाशास्त्रसूत्रेषु समन्वयाख्यप्रथमाध्याय
स्पष्टब्रह्मलिंगकवाक्यसमन्वयाख्ये प्रथमपादे गुणसूत्रसहिताधिकरणार्थसंग्राहककारिकासु अहंब्रह्मास्मीति बोधपर्यवसायिब्रह्म
विषयकज्ञानजनकवेदांतशास्त्रविचारप्रयोजकमेकं सूत्रं जिज्ञासाधिकरणं प्रथमं १ जन्माद्यस्य यतः १ जन्मादित्रितयं यस्माद्
कस्माज्जगतोस्य हि। सत्यज्ञानानंतरूपात्तद्ब्रह्म श्रुतिसंमतं ३२ इतिश्री०सु ब्रह्मणस्तटस्थलक्षणनिरूपकमेकसूत्रं जन्माधिकरणं ब
द्वितीयं २ शास्त्रयोनित्वात् १ यो यो यद्यत्करोत्यद्धा कार्यमालोच्य लक्ष्यसः। ज्ञातेति न्यायतो ब्रह्म सर्वज्ञमिति सिध्यति। तदेवद्वृद्ध्य
न्ताह सार्वज्ञं वेदसर्जनात् ३३ सर्ववैदिकवेदस्य कर्तृत्वात्सर्वविद्धि तत्। तेनैव सर्वशक्त्याद्यमित्यर्थो देवसिध्यति ३४ इतिश्री०सुब्रह्म
णः सर्वज्ञत्ववेदैकगम्यत्वबोधकमेकसूत्रं शास्त्रयोनित्वाधिकरणं तृतीयं ३ तत्तु समन्वयात् १ समन्वयेन वेदांतैस्तद्ब्रह्म प्रतिपा
द्यते। न कर्मशेषः कर्तात्मा न वा कर्माधिदेवता ३५ अथवा। तात्पर्यतस्तु वेदांतैः साक्षाद्ब्रह्म बोध्यते। नोपासनाविधिज्ञानविधिद्वारा व ३

३ वर्णकांतरमाह। वेदैकमानकत्वाद्वा वेधंतत्रा न्यमानतः।

६ गौणश्चेन्नात्मशब्दात्।२।

बोध्यते ३६ तात्पर्यग्राहकं लत्रोपक्रमाद्यस्ति षड्विधं। स्वतः सिद्धब्रह्मबोधो रज्जुधीवद्भयापनुत् ३७ प्रमायकत्वमर्थस्योपक्रमाद्यविरोधि
नः। शब्दनिष्ठं शब्दवृत्तिगम्यं तात्पर्यमुच्यते ३८ इतिश्री०सु सर्ववेदांतवाक्यानां तात्पर्येणानिर्भेदसच्चिदानंदब्रह्मपरत्वप्रतिपादकमेकसूत्रं
समन्वयाधिकरणं चतुर्थं ४ ईक्षतेर्नाशब्दम् १ जगद्धेतोरीक्षितृत्वश्रवणात्सांख्यसम्मतं। प्रधानं नो जगद्धेतुरज्ञो नंतदनीक्षणात् ३९
अचेतनं जगत्स्रष्टवास्तवं सांख्यसम्मतं। प्रधानं तादृशं तन्न श्रुत्या क्वापि समीरितं ४० अतः छांदोग्यषष्ठाध्यायोक्तसृष्ट्युपक्रमवाक्यगं।
सदेव सोम्येत्यत्र त्यसत्सदं परमात्मगं ४१ न प्रधानपरं वीक्षापूर्वकं सर्जनोक्तितः। न प्रधानं जगद्धेतुरतो ऽशब्दमनीक्षणात् ४२ चेतन
स्यैवेक्षितृत्वं तत्तु ब्रह्मणि युज्यते। ज्ञानक्रियाशक्तिमत्त्वमवास्तव्यापि मायया ४३ अप्तेजः प्रायपठितो गौण ईक्षतिरत्र चेत्। प्रधाने
प्युपपन्नः स्यादिति वक्तुं न शक्यते ४४ जीवस्य चेतनस्यात्र स्वरूपेण प्रवेशनं। अनेन जीवेनात्मनानुप्रविश्येति तु श्रुतौ। सच्छब्दार्थस्य
कथितमतश्चेतनमेव सत् ४५ न चेचनो ऽचेतनस्य ह्यात्मा भवितुमर्हति। चेतनस्य ब्रह्मणस्तु स्वरूपमिति साम्प्रतं ४६ प्रायपाठस्तु विप्र
ये निर्णायकः इति स्थितिः। गौणस्यात्र जघन्यत्वान्मुख्यत्वे क्षतिरस्ति हि ४७ अथवा। चेतनस्य त्वमर्थस्य सदणत्वात्मैक्यकी
र्तनं। स आत्मा तत्त्वमसीति तेन चेतनमेव सत् ४८ असंशयादात्मशब्दे नोक्तार्थस्य विवक्षया। गौणमुख्यन्यायतश्च सृष्ट्युपक्रमवाक्य
गं। स आत्मा तत्त्वमसीत्यात्मशब्दः श्रुतिस्थितिः। न प्रधानपरः किंतु चेतनब्रह्मबोधकः ५० य आत्मा सोहमस्मीति विज्ञातुः श्रुतिवाक्यतः।

ब्रह्मैव चेतनं दृष्टं न प्रधानमचेतनं ४९ तन्निष्ठस्य मोक्षोपदेशात्।३।

त्रीहि। अध्याहर्तव्यमित्याहाचार्यो विवरणाभिधः २७ प्रसिद्धमप्रसिद्धं वा विचारात्प्राग्ब्रह्म ननु। यदि ज्ञातमसंदेहान्न शास्त्रविषयं भवेत् २८
३ ज्ञाते ऽज्ञानायोगतो हि तन्निवृत्तिः फलं च न। यद्यज्ञातं तदुद्दिश्य विचारो घटते कथं २९ अतो विचारानारंभः संप्राप्त इति चेच्छृणु। आपात
तो ब्रह्मपदप्रसिद्धं ब्रह्मणः श्रुतौ। निर्विकल्पापरोक्षार्थं विचारोयं निरर्गलः ३० अतो नायं ध्यस्तदुःखरूपमाया निवृत्तये। चिदानंदाद्व
ब्रह्म मत्यैकार्यो विचारणा ३१ इतिश्री भगवद्वेदव्यासप्रणीत शारीरकब्रह्मवेदांतमीमांसाशास्त्रसूत्रेषु समन्वयाख्यप्रथमाध्याय
स्पष्टब्रह्मलिंकवाक्यसमन्वयाख्यप्रथमपादे गुणसूत्रसहिताधिकरणार्थसंग्राहककारिकासु अहं ब्रह्मास्मीति बोधपर्यवसायि ब्रह्म
विषयकज्ञानजनकवेदांतशास्त्रविचारप्रयोजकमेकसूत्रं जिज्ञासाधिकरणं प्रथमं १ जन्माद्यस्य यतः १ जन्मादित्रितयं यस्माद्
कस्माज्जगतोस्य हि। सत्यज्ञानानंतरूपात्तद्ब्रह्म श्रुतिसंमतं ३२ इतिश्री० सुब्रह्मणस्तटस्थलक्षणनिरूपकमेकसूत्रं जन्माधिकरणं ण
द्वितीयं २ शास्त्रयोनित्वात् १ योयोयद्यत्करोत्यद्धा कार्यमालोच्य तत्स्वतः। ज्ञातेति न्यायतो ब्रह्म सर्वज्ञमिति सिध्यति। तदेव द्रढय
न्नाह सार्वज्ञं वेदसर्जनात् ३३ सर्वविदकवेदस्य कर्तृत्वात्सर्वविद्ब्रह्म। तेनैव सर्वशक्त्याद्यमित्यर्थादेव सिध्यति ३४ इतिश्री० सुब्रह्म
णः सर्वज्ञत्वे वेदैकगम्यत्वबोधकमेकसूत्रं शास्त्रयोनित्वाधिकरणं तृतीयं ३ तत्तु समन्वयात् १ समन्वयेन वेदांतैस्तद्ब्रह्म प्रतिपा
द्यते। न कर्मशेषः कर्तात्मा न वा कर्माधिदेवता ३५ अथवा। तात्पर्यपालु वेदांतैः साक्षात्तद्ब्रह्म बोध्यते। नोपासनाविधिज्ञानविधिद्वारा व ३

२ वर्णकांतरमाह। वेदैकमानकत्वाद्वा वेधं तन्नान्यमानतः।

६ गौणश्चेन्नात्मशब्दात्।२।

बोध्यते ३६ तात्पर्यग्राहकं तत्रोपक्रमाद्यस्ति षड्विधं। स्वतः सिद्धब्रह्मबोधो रज्जुधीवद्भयापनुत् ३७ प्रत्यायकत्वमर्थस्योपक्रमाद्यविरोधि
नः। शब्दान्निष्ठं शब्दवृत्तिगम्यं तात्पर्यमुच्यते ३८ इतिश्री० सुसर्ववेदांतवाक्यानां तात्पर्येणानिर्भेदसच्चिदानंदब्रह्मपरत्वप्रतिपादकमेकसूत्रं
समन्वयाधिकरणं चतुर्थं ४ ईक्षतेर्नाशब्दम् १ जगद्धेतोरीक्षितृत्वश्रवणात्सांख्यसम्मतं। प्रधानं नो जगद्धेतुरस्त्रो तं न दनीक्षणात् ३९
अचेतनं जगत्सृष्ट्वा स्वतंत्रं सांख्यसम्मतं। प्रधानं तादृशं तन्न श्रुत्या क्वापि समीरितं ४० अतः छांदोग्यषष्ठाध्यायोक्तसच्छ्रुपक्रमवाक्यगं।
सदेव सोम्येत्यत्र त्यसत्सदं परमात्मगं ४१ न प्रधानपरं वीक्षापूर्वकं सर्जनोक्तितः। न प्रधानं जगद्धेतुरतोऽशब्दमनीक्षणात् ४२ चेतन
स्यैवेक्षितृत्वं तत्तु ब्रह्मणि युज्यते। ज्ञानक्रियाशक्तिमत्त्वमवास्तव्यापि मायया ४३ अप्तेजः प्रायपठितो गौणा ईक्षतिरत्र चेत्। प्रधाने
ऽप्युपपन्नः स्यादिति वक्तुं न शक्यते ४४ जीवस्य चेतनस्यात्र स्वरूपेण प्रवेशनं। अनेन जीवेनात्मनानुप्रविश्येति तु श्रुतौ। सच्छब्दार्थस्य
कथितमतश्चेतनमेव सत् ४५ न चेचनोऽचेतनस्य ह्यात्मा भवितुमर्हति। चेतनस्य ब्रह्मणस्तु स्वरूपमिति साम्प्रतं ४६ प्रायपाठस्तु विश्र
येनिर्णायक इति स्थितिः। गौणस्यात्र जघन्यत्वान्मुख्य एवेक्षतिस्त्विह ४७ अथवा। चेतनस्यत्वमर्थस्य सदण्वात्मेत्यकी
र्तनं। स आत्मा तत्त्वमसीति तेन चेतनमेव सत् ४८ असंशयादात्मशब्दो नो कार्थस्य विवक्षया। गौणमुख्यन्यायतश्च सच्छ्रुपक्रमवाक्य
गो। स आत्मा तत्त्वमसीत्यात्मशब्दः श्रुतिस्थितिः। न प्रधानपरः किंतु चेतनब्रह्मबोधकः ५० य आत्मा सोहमस्मीति विज्ञातुः श्रुतिवाक्यतः।

~ ब्रह्मैव चेतनं दृष्टं न प्रधानमचेतनं ४९ तन्निष्ठस्य मोक्षोपदेशात्।३। ~

२ हेयत्वावचनाच्च ।४। २

४ अथसंपत्स्य इत्यादिश्रुत्या मोक्षोपदेशात् ५१ नाचेतनात्मतां शास्त्रं चेतनस्यावबोधयेत् । तस्मात्तच्छास्त्रगौण्यात्मशब्दश्चेतनबोधकः
५२ स्थूलारुंधत्युदन्यायाद्यदितत्त्वमसिश्रुतिः । अचेतनात्मतां कृत्यात्तांतत्त्वोपवदेत्खलु ५३ अपवादस्याकरणादेकविज्ञानतस्तथा । त
द्विकारस्यसर्वस्यविज्ञानमितियाश्रुतिः । तस्याबाधप्रसंगाच्चसस्सदुनप्रधानगं ५४ प्रधानेऽवगतेभोक्तृवर्गोज्ञातः कथंभवेत् । अप्र
धानविकारित्वान्नैवसोऽवगतोभवेत् । ज्ञातेब्रह्मणिभोक्तापितद्विवर्तोविबुध्यते ५५ सतासंपन्नपुरुषः स्वपितीत्यादिकः सुषुप्तिगः । स्व स्वाप्ययात् ।५।
स्मिन्नपीतोलीनोयंभवतीत्यवदच्छ्रुतिः ५६ सुषुप्तजीवस्वरूपेण परामर्शात्सतोत्रतु । सदभिन्नस्यस्वरूपेलीनत्वकथनादपि ५७
सच्छब्दुपक्रमवाक्यस्थःसच्छब्दःपरमात्मगं । अचेतनसदात्मत्वविरुद्धंचेतनेयतः ५८ सर्ववेदांतवाक्यानिजगत्कारणतान्वितः । यतो गतिसामान्यात् ।६।
श्रुतत्वाच्च ।७। वगमयंत्यस्मात्तत्सदंचचिदर्थकं ५९ अधिपोज्ञः सर्वविद्यः कारणंसइतिस्फुटं । श्वेताश्वतरमंत्रेषुसर्वज्ञस्यैवहेतुता ६० श्रूयतेत
श्चसद्ब्रह्मसर्वज्ञंसर्वशक्तिमत् । सच्छब्दुपक्रमवाक्येषुज्ञेयंतत्तत्पदेरितं ६१ इतिश्रीसुप्रधानस्यावैदिकत्वेनजगद्धेतुत्वाभावबोध
कंसस्सूत्रमीक्षत्यधिकरणंपंचमं ५ आनंदमयोभ्यासात् १ सर्वज्ञेसर्वशक्त्याद्येजगद्धेतुत्वलक्षणे । चित्तिब्रह्मण्यभिहिते
वेदांतानांसमन्वये ६२ समन्वयाख्याध्यायस्यचरितार्थतयापुनः । अग्रिमः सूत्रसंदर्भः किमर्थइतिचेच्छृणु ६३ सगुणब्रह्मविष
यानिर्गुणात्मपरास्तथा । वेदांतेषूपलभ्यंतेश्रुतयोबहुलाइह ६४ कस्यवाक्यस्यसगुणापास्तीविधिमुखेनहि । समन्वयोगुणेश्चस्यपर [illegible] ४

त । ब्रह्मज्ञानंजायतांमइतीच्छोदेतितूत्कटा १२ विनाविचारंनज्ञानमतोवेदविचारणा । गुरोः सकाशात्कर्तव्येत्यर्थाद्आक्षिप्यतेत्रहि १३ प्रयो
जन स्यविषयस्यापिबोधतएवहि । प्रवृत्तिस्स्ववाच्छास्त्रेनविधेयाविचारणा १४ विधायकत्वाभावेपिश्रोतार्थस्यानुवादतः । श्रु
तावुक्तस्यानुबंधचतुष्कस्यात्रलाभतः । नास्यसूत्रस्यवैयर्थ्यमितिवाच्यस्यवेर्मतं १५ आपाततः प्रसिद्धस्यसर्वज्ञत्वादिनाश्रुतो । निजा
त्मत्वेनापिवेदेब्रह्मणोविश्रुतस्यहि १६ वास्तवस्यस्वरूपस्यज्ञानादस्तिमहत्फलं । सर्वदुःखस्यापनोदइतिवेदेहिदृश्यते १७ जाग्रत्स्व
प्नसुषुप्त्यादिप्रपंचोयस्यकाश्यते । तद्ब्रह्माहमितिज्ञात्वासर्वबंधैः प्रमुच्यते १७ अहंब्रह्मावबोधावसानवेदांतवाक्यतः । आपाततोपिवि इति।
ज्ञातमात्मत्वेनदृष्टहयादि । पुनर्विचारकरणंकिमर्थमितिचेच्छृणु १८ यदभेदेनविज्ञेयंब्रह्मतस्यानिजात्मनः । स्वरूपेकलहायंतेमनोदेहा
द्भिावतः १९ तत्राविचार्ययत्किंचिन्मन्येतात्मेतिचेद्यदि । श्रेयसः प्रतिहन्येतानर्थंचाधिकमाप्नुयात् २० विचाराद्वास्तवात्मात्मावबोदुंश
क्यतेत्विति । शास्त्रंब्रह्मविचाराख्यंमुनिनारभ्यतेधुना २१ सूत्राणांसर्ववेदानामर्थनिर्णायकत्वतः । श्रुतिवृत्तिस्थानतयाम्नायःश्रुति
समार्थता २२ अथातोविवरणाचार्यप्रोक्तसूत्रार्थउच्यते । जिज्ञासापदमत्रस्यंविचारस्योपलक्षणं २३ योब्रह्मवेदब्रह्मैवभवतीत्ये
क्यदर्शनात् । द्वासुपर्णेत्यादिवेदाज्जीवेशद्वित्वदर्शनात् २४ स्वनभिन्नाभिन्नतयाज्ञेयब्रह्मविचारयोः । पर्यायेणब्रह्मबोधांगत्वेनप्राप्त
योर्द्वयोः २५ श्रोतव्यइतिवेदेनस्वाभिन्नब्रह्मगोचरः । विचारएवकर्तव्योनान्यस्तीतिनियम्यते २६ श्रुतितुल्यार्थतासिध्येकर्तव्यपदस

क्त उपासनाः। प्राग्वदेवावगंतव्या अवांतरफलान्यपि ८० ज्ञेयत्वेन स्वात्मनयोपक्रांतं ब्रह्म निर्गुणं। यदत्र तादृशस्य स्वबोधो नैवाल्पसा
५ धनैः ८१ अतः शाक्योपासनया साक्षात्तत्स्वगुणैर्युतं। परं ब्रह्म तद्द्वारा निर्गुणं प्राप्नुतादिति ८२ आनंदमयशब्दोक्त परमात्मन एव हि। उपा
सनापरा सर्वा ब्रह्मवल्लीति हि निरूक्तं ८३ एक एव तु सर्वेशो भिन्नाभिन्नगुणैर्युतः। यद्यप्युपास्यो भवति तथापि गुणभेदतः। भिन्नान्येव फला
नि स्युः सं यथेत्यादिकश्रुतेः ८४ यद्यद्विभूतिमत्सत्त्वमिति स्मृत्या प्रदर्श्यते। विभूतितारतम्येन समुपासित ईश्वरः। विभूतितारतम्यात्तु फल
दो भवतीति हि ८५ उपास्यत्वादिहानंदमयस्य प्राप्तिरेव हि। उपसंक्रमशब्दार्थ इति द्वैतनिरूक्तौ मतं ८६ इति द्वैतनिरुक्तमतोपोद्धातः अ
स्यानंदमयाख्याधिकरणस्यार्थकल्पना। द्वैतनिरुक्तमतालंब्य संक्षिप्यादौ प्रदर्श्यते ८७ पूर्वाधिकरणे प्रायपाठो निर्णायको नहि। गो
पामुख्यादिकल्पेन संदेहस्य निवर्तनात् ८८ अत्र संदेहसत्त्वेन सतु निर्णायकोस्तिति। पूर्वेणासंगतिर्ह्यत्र प्रत्युदाहरणाभिधा ८९ प्राचु
र्येण विशिष्टेऽर्थे विकारार्थे च दृश्यते। मयट्प्रत्यय इत्यत्र कोऽर्थस्तस्येति संशयः ९० विकृत्यर्थ एव पूर्वे चत्वारो मयटोत्थिताः। तत्रायपठितो
त्रापि विकृत्यर्थोऽस्त्वयं मयट् ९१ प्रियमूर्धाद्यवयवोपेतपक्षितयात्र हृदि। आनंदमयशब्दोक्तो जीवात्मोपास्य इष्यते। प्रायपाठप्रियाद्यंगश
रीरत्वोक्तिहेतुतः। ९२ प्रियमोदप्रमोदानंदाविर्भूतिः सदात्मनि। इत्याक्षेपे समाधानमुच्यते द्वैतनिरूक्तमतात् ९३ प्रियमूर्धाद्यवयवोपेतपक्षि
तयात्र हृदि। आनंदमयशब्दोक्त आत्मेहोपास्य इष्यते ९४ विज्ञानमयशब्दार्थोपास्ति प्रायेण पाठतः। तस्यैष एव शारीर इति शारीरतोक्तितः। ५

उपास्ये शिर आद्यात्मपक्षित्वेन च कीर्तनात् ९५ परमात्मानंदमयोऽत्रोपास्यो जीव एव न। उपक्रम्यानंदमयं रसः हीत्यादिवाक्यतः। ब्रह्मा
र्थकानंदमयशब्दाभ्यासादिह श्रुतात् ९६ ज्योतिष्टोमप्रकरणगतं ज्योतिःपदं यथा। ज्योतिष्टोमपरं दृष्टं तत्र लक्षणया तथा ९७ आ
नंदशब्दा अभ्यस्ता आनंदमयबोधकाः। तेनानंदपदाभ्यास एवानंदमयस्य सः ९८ प्रायपाठात्मकं स्थानं विकारार्थस्य सूचकं। सर्वां
तरत्वलिंगेन ब्रह्मत्वार्थेन बाध्यते ९९ श्रुतिलिंगाधिकरणस्थानाल्लिंगबलिष्ठता। जैमिन्याचार्यमुनिना विस्तरेण समर्थिता १०० आ
नंदमयसर्वेशावबोधांगत्वेन पाठतः। सन्निधिः कोशवर्गस्य श्रुतावुक्तो विकारिणः। स्थूलारुंधतीन्यायात्कोशा बोधोपकारिणः २
प्रधानत्वापवादे वान्यथासिद्धो हि सन्निधिः। अंगीभूतः स्वप्रधानं विरुद्धं बोधयेत् कथं ३ एवं सर्वांतरत्वेन लिंगेनैवेह सन्निधिः। अन्य
थासिद्धतां नीतः प्रायपाठश्च बाधितः ४ अत्रानंदमयस्यान्नमयस्यात्युक्तितः श्रुतौ। सर्वांतरत्वमानंदमये ब्रह्मणि सिध्यति ५
कोशोपाधिप्रयुक्तं हि प्रियाद्यवयवादिकं। शारीरता च घटत आनंदमय ईश्वरे ६ परमव्योमशब्दोक्ते प्रधाने व्याकृताभिधे। चतुः
कोशगुहागत्तमुपास्ते ब्रह्म यः पुमान् ७ सोऽश्नुते निखिलान्भोगान्विपश्चिद्ब्रह्मणा सह। क्रममुक्तफलस्यापीत्यत्रोक्तत्वादुपासि
तुः ८ आनंदमयशब्दार्थः परमात्माखिलांतरः। नानंदमयशब्दार्थो जीवो द्वैतनिरुक्तमते ९ अत्राधिकरणे सप्तगुणसूत्राणि
संति हि। द्वैतनिरुक्तमतालंब्य व्याख्यायंते यथान्यपि १० विकारशब्दान्नेति चेन्न प्राचुर्यात्। २ विकारार्थस्य मयटः प्रत्ययस्य प्रयो

गतः। निर्विकारः परात्मेह नानंदमयशब्दभाक् ११ इति चेन्नेह मयटः प्राचुर्यार्थकत्वतः। दुःखाल्पत्वादिदोषस्य संशयो न भविष्यति
६ १२ आनंदमयशब्दोतः प्रचुरानंदलक्षकः। तेनात्र प्रचुरानंदस्वरूपः परमेश्वरः १३ सार्वभौमादिविध्यंतानंदेभ्योधिक एव हि। ब्रह्म
स्वरूप आनंदस्तेनानंदमयः परः १४ मयट्प्रकृत्यर्थनिष्ठप्राचुर्येण युतं हि यत्। मयट्प्रकृत्यर्थभिन्नं तन्मयड्वाच्यमुच्यते १५ यथान्य
न्नमयो यज्ञ इत्यन्नप्रचुरोध्वरः। मयट्प्रकृत्यर्थभिन्नः स्पष्ट एव प्रतीयते १६ आधिक्येनानुवृत्तत्वं प्राचुर्यमिति कथ्यते। अपेक्ष्यैवावधिं
कं किंचिदाधिक्यं भासते हि तत् १७ सामानाधिकरण्येनावध्याकांक्षा यदा तदा। स्वकर्तव्यविरुद्धार्थकार्यैवावधिरिष्यते १८
आधिक्येनस्यावधिस्तु स्वल्पता द्योत्यते किल। तेनाभोज्याल्पता भाति समृद्धिर्भोज्यगाध्वरे १९ किंचात्र प्रचुरानंदाधार इत्य
र्थ आपतेत्। परात्मा प्रचुरानंदरूप इत्यर्थ ईप्सितः। आनंदमयशब्दोतः प्रचुरानंदलक्षकः २० स्वसमानाधिकरणविजातीयगता
ल्पता। कश्चित्तात्पर्यवशत आधिक्यस्यानिरूपिका। यथा विप्रमयो ग्राम इति शूद्राल्पता मता २२ मयट्प्रत्ययवाच्यस्य त्वर्थस्येह
परिग्रहे। आनंदमय इत्यत्राप्येवं दुःखाल्पता पतेत्। आनंदमयशब्दोतः प्रचुरानंदलक्षकः २३ असमानाधिकरणसजातीयग
ताल्पता। कश्चित्तात्पर्यवशत आधिक्यस्य निरूपिका २४ बहुल्पविप्रयुक्तेषु ग्रामेष्वेतेषु केनचित्। को वा विप्रमयो ग्राम इति
प्रश्ने कृते सति २५ पृष्टेतरग्रामगतविप्राल्पत्वनिरूपितं। विप्राधिक्यं कैवेग्राम इति प्रश्नः प्रतीयते २६ एवमप्यत्र विध्यंतानं ६

कस्य वाश्रूयमाणानां गुणानामविवक्षया। वाक्यस्य निर्गुणे तस्मिन्साक्षादेव समन्वयः ६६ इति संदेहविच्छित्त्यै प्रारब्धो ग्रंथ उत्तरः। प्रा
गुक्तगतिसामान्यप्रपंचाय वदेत्कश्चित् ६७ त्रिविधा ब्रह्मणः प्रोक्ता ज्ञानकांड उपासनाः। काश्चिदभ्युदयार्था हि काश्चित्कर्मसमृद्धिदाः ६८
क्रममुक्तिप्रदाः काश्चिदिति तासां भिदा मिथः। नाम ब्रह्मेत्युपासीतेत्याद्या अभ्युदयार्थिकाः। सर्वत्र कामचारादि प्रोक्तं तासां रूकमं फलं ६९
कर्मांगोद्गीथादिध्यानरूपाः कर्मप्रपुष्टिदाः ७० हृत्पुंडरीकदहराकाशोपास्त्यादयस्तु याः। देवयानेन मार्गेण क्रममुक्तिप्रदास्तु ताः ७१
चित्तैकाग्र्यमुखेनैव[illegible]पि सर्वा उपास्तयः। परब्रह्मावबोधस्य त्युपकर्तृतयोदिताः ७२ गुडजिह्वान्यायतः स्पष्टं स्वांतरफलान्यपि। भेष
जस्यादनायादौ शिशवे दीयते गुडः। तेन प्ररोच्य तज्जिह्वामौषधं दीयते ततः ७३ मीमांसाशास्त्रयोः पूर्वोत्तरयोः सूत्रवृत्तिकृत्। उपव
र्षाख्य आचार्यः प्राचीनः प्रथितोऽभवत् ७४ तदीयेन मतेनादौ भगवान्सूत्रभाष्यकृत्। अस्यानंदमयाख्याधिकरणस्यार्थमाह
हि। अत्रास्वारस्यमावेद्य पश्चात्स्वमतमुक्तवान् ७५ निर्विशेषं स्वरूपेण नोपदेष्टुं हि शक्यते। उपाध्युपहितं तत्तदुपाधेरविवक्षया। निर्वि
शेषस्य प्रकाशं वक्तव्यं भवतीत्यतः ७६ कस्मिंश्चिद्वाक्ये निर्विशेषं ज्ञेयत्वेनोपदिश्यते। कस्मिंश्चिदुपहितं सत्तद्ब्रह्मोपास्यतया हि तं। इति सं
देहविच्छित्तिफलको ग्रिम उद्यमः ७७ ब्रह्मवल्ली तत्र सर्वा ज्ञेयब्रह्मपरैव हि। इत्याहुर्भगवत्पादाः पश्चात्तन्मतमुच्यते ७८ अथात्रैव
वृत्तिकृन्मतं। वृत्तिकारमते तूपनिषद्या परात्मनः। औपाधिकानंदभेदैरुपासनपरैव हि ७९ तथाहि। आनंदमयकोशात्प्राग्यायाः प्रो

नानंदमयः कोशः प्रधानात्परस्यात्द्भाक्। नानंदमयशब्दार्थ आनंदप्रचुरो विसः ४३ अत्रसोऽकामयतेति स्रष्टुरेवेक्षणश्रुतेः। अनी
७ क्षकप्रधानस्य स्वीकारो नेह संमतः ४४ तस्मिन्नस्य च तद्योगं शास्ति ८ यदा ह्येवैष एतस्मिन्प्रतिष्ठां विंदते तदा। गतोभवतिसत्र
स्तोऽभयमित्यादिवाक्यतः ४५ प्रचुरानंदके तस्मिन्नहृते परमात्मनि। प्रबुद्धस्यास्य जीवस्य तदैक्यं वक्ति हि श्रुतिः ४६ अतो जी
वः प्रधानं वा नानंदमय उच्यते। किंत्वानंदमयोऽभ्यासादुपास्यः परमेश्वरः ४७ इत्यद्वैतमतालंबि वृत्तिकृन्मतमत्र हि। अनूद्य तं
भाष्यकृद्भिः स्वव्याख्यासौष्ठवाय वै १४८ इति वृत्तिकृन्मतं। अथानंदमयाख्याधिकरणस्यार्थकल्पना। भाष्यकृन्मतमाले
ख्य संक्षिप्यातः प्रदर्श्यते १४९ अन्नप्राणो मनो बुद्धिरानंदश्चेति पंच ते। कोशास्तद्भावमापन्नो वेत्ति संसारिणं निजं ५० कोशाः पक्षित
याप्रोक्ताः सौकर्यप्रतिपत्तये। शिरः पक्षौ मध्यभागः पुच्छमित्यंगपंचकं। चतुर्षाद्येषु कोशेषु रूपकेषु निरूपितं ५१ आनंदमयवाक्यस्थ
पुच्छशब्दस्तु नांगधीः। किंत्वाधारपरस्तत्र प्रतिष्ठापदमस्तितत् ५२ स्वावस्थितिप्रयुक्तान्यस्थितिहेतुपरं मतं। कपालद्वयसंयोगस्थितिमू
लाघटस्थितिः ५३ तथापि नसः संयोगो घटस्याधार ईष्यते। स्वाधारत्वेऽपि पीठस्य न स्वावस्थितिहेतुता ५४ पीठं विनापि संस्थातुं शक्य
ते न्यत्र कुत्रचित्। अतो ब्रह्माखिलाधारं प्रतिष्ठा चेति कथ्यते ५५ यैः कोशैः स्वस्य तात्म्यमापन्नस्तेषु केषुचित्। उपास्त्यो ब्रह्मतयात्रो ७
क्ता अन्नमयादिषु ५६ चित्तशुध्यर्थिकास्तासु प्रोक्ताः काश्चिदुपासनाः। गुडजिह्वान्यायतः स्युरवांतरफलान्यपि अथवोपासना

भासा एवात्रोक्ता उपासनाः ५७ कोशपंचकतादात्म्याद्विस्मृतः स्वयमेव हि। स एव ब्रह्मभावं स्वं प्रबुध्येतच्छ्रुतीरितं ५८ कोशांतर्यामिप्र
हं कोशानेतितत्प्रातिपिततः। अतिक्रामतितान्कोशान्प्रागात्मत्वावधारितान् ५९ ततः कोशावधिब्रह्मस्वात्मत्वेनावधार्य हि। जीव
न्मुक्तो विहरति कृतकृत्यतया मुनिः ६० पंचकोशस्वरूपेण प्रविभज्याखिलं जगत्। अंतर्यामितया तस्योपलक्ष्यं ब्रह्म निर्गुणं ६१
तदेवाहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते। स्वप्रकाशचिदानंदरूपेणैवावतिष्ठते। इत्याह ब्रह्मवल्याख्योपनिषद्भितबोधिका ६२ एवं
चोपनिषत्सर्वा ज्ञेयब्रह्मपरे वहि। स्थूलारुंधतुदुन्यायात् पंचकोशोपलक्षणेः ६३ तत्तत्कोशात्मतामुत्क्रांते पुच्छब्रह्मकीर्तनात्। ब्र
ह्मोपास्तिपरा नेयमिति भाष्यकृतां मतं ६४ अथ भाष्यकृतां व्याख्यारीत्या सूत्रार्थ उच्यते। आनंदमयोऽभ्यासात् १ आनंदमय
वाक्यस्थब्रह्मशब्दो न लक्ष्यते। आनंदमयशब्देन सूत्रस्थेन तथा सति ६५ स्वशक्यत्वाद्ब्रह्म मुख्यं ब्रह्मशब्दो ब्रवीत्ययं। न ब्रह्मत्वसमा
नाधिकरणांगत्ववत्सरः ६६ ब्रह्मार्थकपदाभ्यासादादिमध्यावसानगात्। अतः पुच्छपदार्थोऽत्राधारो ब्रह्मोपलक्षणं ६७ अथैत
त्सूत्रतात्पर्यप्रतिपाद्योऽर्थ उच्यते ६८ ज्ञेयत्वेन स्वात्मतया पक्रांतं ब्रह्म निर्गुणं। सर्ववस्तुपरिच्छेदशून्यं सच्चित्सुखात्मकं ६९ स्थू
लारुंधतुदुन्यायात् पंचकोशोपलक्षणेः। पंचकोशस्वरूपेण प्रविभज्याखिलं जगत्। अंतर्यामितयात स्योपलक्ष्यं यदुदीरितं ७०
तद्ब्रह्म पंचकोशात्मजगतो निखिलस्य हि। प्रतिष्ठारूप आधारस्तैत्तिरीयश्रुताविति। पुच्छप्रतिष्ठाशब्दाभ्यामयं संप्रतिपाद्यते ७१

पुच्छंप्रतिष्ठाब्रह्मस्वात्मत्वेनावधार्यहि।जीवन्मुक्तोविहरतिकृतकृत्यतयामुनिः ७२ आनंदीतंरसंप्राप्यभवती।तिश्रुतीरणात् ७३
८ आनंदमयवाक्यस्थपुच्छशब्दस्तुनांगगः।किंत्वाधारपरस्तत्रप्रतिष्ठापदमस्तितत्।स्वावस्थितिप्रयुक्तान्यस्थितिहेतुपरंमतं ७४ ज्ञेयं
ब्रह्मप्रतिष्ठानहीतियोवेत्तिवेदसन्।स्वयमेवभवत्यस्यब्रह्मरूपत्वतःसदा ७५ निर्विशेषंस्वरूपेणनोपदेष्टुंहिशक्यते।उपाध्युपहितं
तत्तदुपाधेरविवक्षया ७६ निर्विशेषंस्वप्रकाशंज्ञेयमेवहृकथ्यते।नत्वपास्यंब्रह्मशब्दःशक्यमात्रार्थकोयतः ७७ अतोज्ञेयपरेवे
षोपनिषन्नत्युपास्तिगा।इत्यानंदमयोभ्यासादितिसूत्रगआशयः ७८ ब्रह्मानंदमयस्यांगंप्रधानंवेतिसंशयः।ब्रह्मपुच्छपदाभ्यां
हिसंशयोसौसमुत्थितः ७९ ब्रह्मपुच्छाख्योवयवइत्याक्षेपःसमीहितिः।ब्रह्ममुख्यंज्ञेयमिहसर्वाधारःश्रुतावितिति ८० पूर्वाधिकरणे
प्राणपाठोनिर्णायकोनहि।अत्रत्ववयवप्रायपाठोनिर्णायकोस्त्विति।दृष्टंपदात्संगतिःस्यात्तत्तुदाहरणाभिधा ८१ लांगूलरूपाव
यवःपक्षगोनपतत्रिगः।लांगूलार्थःपुच्छशब्दोनैवपश्वंगवाचकः।किंतुलक्षणयापक्षिपश्वाद्भागस्यबोधकः ८२ आधारेवापत
त्र्यंगेलक्षणास्येतिसंशये।शिरःपक्षाद्यवयवप्रायपाठबलादिह।पश्वंगेलक्षणातेनांगंब्रह्मेत्याक्षेपउच्चितः ८३ विकारशब्दान्नेतिचेन्न
प्राचुर्यात् २ प्राणपाठःशब्दसाम्यमात्रेणाप्यत्रसार्थकः।अभ्यासादेर्हिलिंगस्यस्थानातोद्बलवत्त्वोक्तितः ८४ विकारशब्दान्नेतिचेन्नप्रा
चुर्यादितिसूत्रफलितमुक्तासूत्रार्थमाह।प्रायपाठात्पुच्छपदमत्रावयवबोधकं।पुच्छशब्दादवयवपराद्ब्रह्मपदंनहि।स्वप्रधानब्रह्मपरमि ८

॥सिध्यति २७ अधिकानंदस्वरूपएषइतिन॥
देभ्यःपरमेश्वरः।अधिकानंदवान्नैषतद्रूपइतिसिध्यति।आनंदमयशब्दोतःप्रचुरानंदलक्षकः २९ यदामयट्प्रकृत्यर्थेविशे
ष्यसतिभासते।तत्प्रकारतयाधिक्यंतदोदोषेनकश्चन।यथाप्रचुरदीप्तिर्लोलीरत्नाभातिनोतमः ३० अथवात्विन्मयंब्रह्मे
स्यादिवत्स्वार्थिकोमयट् ॥ अत्रयोगविभागेनस्वार्थिकोप्याहृतोस्तिसः ३१ तद्धेतुव्यपदेशाच्च ३ जैवानंदस्यहेतुत्वकथ
नाच्चैषहीतिवै।आनंदमयशब्दार्थःपरमात्मेहनेतरः ३२ मांत्रवर्णिकमेवचगीयते ४ उपासनापरैषोपनिषद्धृत्तिरुक्तास्मते।उप
क्रम्यज्ञेयतयादुर्ज्ञेयत्वाद्यदेवहि।३३ अव्याहृतांतकोशांतरूपास्यसमुदीरितं।ब्रह्ममंत्राक्षरैस्ताद्धिमांत्रवर्णिकमुच्यते ३४ तदे
वात्रानंदमयइतिसर्वांतरंह्यहन्।मंत्रव्याख्यानरूपेणब्राह्मणेनप्रकथ्यते ३५ मंत्रब्राह्मणयोःसर्वत्रैकार्थविषयत्वतः।आनं
दमयशब्दार्थःपरमात्मेहनेतरः ३६ नेतरोनुपपत्तेः ५ ईश्वरादितरोजीवोनेहानंदमयोमतः।स्रष्टेःप्राग्बहुभावेच्छापूर्वेक्षादेर
संभवात् ३७ भेदव्यपदेशाच्च ६ परामृश्यानंदमयंतस्यप्रख्याप्यसारतां।रसरूपानंदमाप्यातद्विद्यानंदवानिति ३८ लब्ध्युल
ब्धव्यभावेनात्रानंदमयजीवयोः।भेदोक्तेश्चेतरोजीवोनेहानंदमयोमतः ३९ नहिलब्धैवलब्धव्योदृष्टोलोकेहिकुत्रचित्।जी
वन्मुक्तोनुभवतिविद्यानंदंचतुर्विधं ४० विषयानंदवद्विद्यानंदोधीवृत्तिरूपकः।दुःखाभावादिरूपेणप्रोक्तएषचतुर्विधः ४१
दुःखाभावश्चकामाप्तिःकृतकृत्योहमित्यसौ।प्राप्तप्राप्योहमित्येवंचातुर्विध्यउदाहृतः ४२ कामाच्चनानुमानापेक्षा ७ अ

९ कामाच्चनानुमानापेक्षा ७ स्वसत्याकाम्यतइतिकामोत्रानंदईर्यते।कामशब्दोलक्षणयानंदस्यात्रान्यमानतः।ब्रह्मत्वेनावबुद्धस्यब्रह्मत्वे
नाहर्विस्मृतौ १ अन्नप्राणादिशब्दोक्तानुक्रमात्संक्रमस्यवै।भृगुवाक्याद्ब्रह्मतयाज्ञातानंदस्यतत्रहि।विहितत्वाद्ब्रह्मदृष्टेस्तदुदाहरणेनवै
२ अनुमानात्परात्मत्वमानंदमयवाक्यतः।आनंदमयशब्दार्थोपास्यत्वेहेतिचेन्नतत् ३ नानुमानात्परात्मत्वात्प्रेक्षानंदमयस्यच।विकारि
प्रायपठितमयडर्थविरोधतः।वेदशब्दबलीयस्त्वंतत्रशब्दानुमानयोः ४ तस्मिन्नस्यचतद्योगंशास्ति ८ यदाह्येवैषएतस्मिन्नतिष्ठांविंद
तेतदा।गतोभवतिसब्रह्माऽभयमित्यादिवाक्यतः ५ उपक्रांतेज्ञेयतयासर्वाधिष्ठानआत्मनि।प्रबुद्धस्यास्यजीवस्यतदैक्यंवक्तिहिश्रु
तिः ६ अतश्चपुच्छवाक्येनमुख्यत्वेनोच्यतेहृहत्।ब्रह्मानंदमयांगंचेदुक्तमैक्यंनसंभवेत् ७ एवंज्ञेयपरेवैषोपनिषत्सुपास्तिगा।इ
त्यानंदमयोभ्यासादितिसूत्रगआशयः।ब्रह्मगीतादिशास्त्रैस्तैर्भाष्यकारैःस्फुटीकृतः ८ स्कांदब्रह्मगीतैकादशाध्याये।पदंयत्परमं
विष्णोस्तदेवाखिलदेहिनां।पदंपरममद्वैतंसशिवःसांबविग्रहः ९ इतिश्री॰सूत्रेतैत्तिरीययजुःशाखागतब्रह्मवल्ल्युपनिषद्गतानंदम
यवाक्यांतर्गतपुच्छवाक्यस्थब्रह्मपदस्यज्ञेयत्वेनोपक्रांतसत्यज्ञानानंतस्वरूपमुख्यपरब्रह्मपरत्वसाधकंपुच्छपदस्यलक्षणयाधा
रार्थकत्वसाधकंब्रह्मपदार्थस्यानंदमयपदार्थावयवत्वासंभवस्तवकमानंदमयशब्दार्थस्यपरमात्मपरत्वाघटनद्वारानंदमयको
शोपाधिकजीवपरत्वसाधकमेवमुक्तार्थसमर्थनद्वारासर्वस्याब्रह्मवल्ल्याउपास्यब्रह्मपरत्वाघटनद्वारानिर्विशेषत्वेनज्ञेयब्रह्मप ९

रत्वसमर्थनपरमष्टसूत्रात्मकमानंदमयाधिकरणंषष्ठम् ६ अंतस्तद्धर्मोपदेशात् १ श्रुतःसयोंतरादित्येपुरुषोयोंतरक्षिणि।सा
र्वात्म्यात्सर्वदुरितराहित्यात्परमेश्वरः।नादित्यरूपोजीवःससार्वात्म्याद्यसंभवात् १० छांदोग्यप्रथमाध्यायेषष्ठसप्तमखंडयोः।आ
दित्याक्षिस्थपुरुषोपास्तीस्तोविहितेक्रमात् ११ उद्गतःसर्वपाप्मभ्यइत्युत्संज्ञउदीरितः।तत्त्वमायात्मकत्वोक्त्यासार्वात्म्यंसमुदीरि
तं १२ उत्क्रामत्वात्तथक्त्वमिगच्छत्यात्रपरःपुमान्।उद्गीथाख्यश्चसध्येयःसर्वपाप्मनिवृत्तये १३ विभागापरपर्यायंपवगिच्छइतीर्यते।
गेष्णाद्कामनीयस्यक्त्वमिगच्छःसउच्यते १४ धनलाभायवीणायांयेगायंतिजगत्सखि।एषएवादित्यचक्षुःपुरुषःसइतीरणात् १५
हिरण्यकेशश्मश्र्वादियत्नोपारमार्थिकं।किंतुध्यानार्थमुक्तत्वात्तस्मात्सपरमेश्वरः १६ कपिपुच्छाधःप्रदेशभास्वरंश्वेतपंकजं।यथा
तथास्यनयनेध्येयेवैशुक्लभास्वरे।धनस्यलाभोयस्यासावथधनस्यनिर्मितः १७ भेदव्यपदेशाच्चान्यः २ रविचक्षुर्मंडलांतःपुरुषोजी तः
वतःपृथक्।अंतर्यामिब्राह्मणस्थेतःपरस्मात्परेश्वरः १८ आदित्यांतर्यामितयेशस्यभेदव्यपदेशनः।बृहदारण्यकगततृतीयाध्याय
गस्फुटं।सप्तमब्राह्मणेतस्मात्पुरुषोत्रेश्वरोमतः १९ इतिश्री॰सूत्रेअंतरादित्येंतरक्षिणिचोपास्यत्वेनश्रुतपुरुषबोधकस्यपुरुष
शब्दस्यपरमेश्वरपरत्वसाधकंद्विसूत्रंतद्धर्मोपदेशाधिकरणंसप्तमं ७ आकाशस्तल्लिंगात् १ आकाशरूपेणोद्गीथोपउपास्य
तयेरितः।तत्राकाशःपरंब्रह्मब्रह्मबोधकलिंगतः २० छांदोग्यप्रथमाध्यायेप्रारभ्याष्टमखंडकं।नवमेखंडउद्गीथोपासनाविहितास्तिहि

१० २१ सर्वभूतसमुद्भूताकाशादेवेत्यवेसवधारणं। अनंत त्वं वरीयस्त्वं परत्वं लिंगमत्र हि २२ भूताकाशपरात्येनेरूढ्याकाशपदश्रुतिः।
बाध्यते ऽनवकाशेन लिंगेनाव्यभिचारिणी २३ आनर्थक्यहतानां हि विपरीतं बलाबलात्। श्रुतिलिंगाधिकरणन्यायस्यावसरोत्र न
२४ परत्वाच्च वरीयस्त्वात्समस्तैकपदेरितः। परोवरीयानाकाशो ऽनंतश्चांतस्य वर्जनात् २५ औत्कृष्ट्यक्रमपर्यायैर्वरीयान्परमेश्वरः। श्रेष्ठा
द्रसतमत्वादिगुणैः परिकीर्तिते २६ सारभूताः पदार्थायेतेरसाः परिकीर्तिताः। तेषामप्यस्य सारत्वात्सोत्कोरसतमो हरिः २७ यस्तु फलत्र
येप्यस्यत्याधारः स परायणं। उद्गीथश्च इ उद्गीथावयवोंकारगो त्र हि २८ परोवरीयसो लोकान्प्राप्नोत्येवमुपासकः। परोवरीयालोके
स्मिन्भवत्यप्यस्य जीवने २९ अत्रैवमाख्यायिकोद्गीथे विद्यास्तुत्यर्थ श्रूयते। तथा हि। शालावत्यस्तु शिलकोदाल्भ्योवैचेकितायनः।
इमौ विप्रौ क्षत्रियोत्र जैवलिस्तु प्रवाहणः ३० इतिमिसंगतादेवादुद्गीथकुशलास्त्रयः। वदाम उद्गीथकथामित्यासत विवक्षया ३१ राजात्र
वाहणः प्राह द्वौ विप्रौ वदतामिति। पृच्छामि दाल्भ्येत्यामंत्र्य शिलकोदाल्भ्यमाह हि ३२ कास्याम्नो गतिरित्येष पृष्टवाञ्छिलकस्तुतं। दाल्भ्यो
क्तायास्सामगतिस्तस्या अप्यस्ति का गतिः। इति पप्रच्छ शिलको दाल्भ्यं तं वै पुनः पुनः ३३ शाल्कः प्राणोन्नमुदकं स्वर्लोकोपि हि मानिति। उक्को
त्तरो नरगतीर्नास्तीत्याह ततो गतिः ३४ गतिशब्देन जनको हेतुरत्र विवक्षितः। जनकत्वस्य पर्याप्तिभूम्यमत्रा प्रतिष्ठितं ३५ पृथ्वी प्रतिष्ठा
शब्देन क्षितीयां तेन कथ्यते। स्वर्गलोकोप्यसौ लोक इति शब्देन कीर्तितः ३६ अप्रतिष्ठितता दोषाद्दाल्भ्यपक्षे विनिंदिते। दाल्भ्यः पप्रच्छ शिल १०

६ मांत्रवर्णिकमेव च गीयते ४

तिचेन्नतु न तथा ८५ उत्क्रांगानुक्रमाधिक्याच्छिष्टात्यांगक्रमस्मृतेः। भिन्नेप्यर्थे शब्दसाम्यात्साम्यपाठोत्र सार्थकः ८६ तेनात्रत्यं पुच्छपदं
नैवावयवबोधकं। मुख्यार्थकब्रह्मपदसामानाधिकरण्यतः ८७ तद्धेतुव्यपदेशाच्च ३ परामर्शः सन्निहिते न्याय्यो त्वसति बाधके। न
स्य पुच्छतयोक्तस्य ज्ञेयस्यात्रात्मनः श्रुतौ। तच्छब्देन परामृश्य जगद्धेतुत्वकीर्तनं ८८ विकारजातस्याधारो मुख्यं ब्रह्म विवक्षितं। पु
च्छवाक्ये ततस्तस्य नैवानंदमयांगता ८९ सइदं सर्वमसृजत तस्योपादानता मता। व्यवहारेपि यत्सत्यमनृतं च प्रतीयते ९० तत्सर्वमप्य
बद्ब्रह्म यत्सत्यं पारमार्थिकं। इत्युक्त्वा च श्रुतावत्र पुच्छवाक्योक्तितः परं ९१ आकाश आत्मनस्तस्मात् तस्मात्सम भूदिति। उपक्रांत
स्यात्मतयानुवादः स इतीह वै ९२ सत्यं ज्ञानमनंतं यद्ब्रह्म ज्ञेयं तयेरितं। मंत्राक्षरैर्ब्रह्म तद्धि मांत्रवर्णिकमुच्यते ९३ ब्रह्मपुच्छं प्रतिष्ठेति मा
त्रवर्णिकमेव तत्। मंत्रव्याख्यानरूपेण ब्राह्मणेन निरूप्यते। मंत्रब्राह्मणयोः सर्वत्रैकार्थविषयत्वतः ९४ तस्मात्पुच्छवाक्ये न मुख्यमेवो अ
च्यते इह तत् ९५ नेतरोनुपपत्तेः ५ नात्रानंदमयो ब्रह्म पुच्छावयववान्मतः। तस्यावयविनो वक्ष्यमाणस्य शेरसंभवात्। अलक्ष्य पुच्छवा
क्येन मुख्यमेवोच्यते इह तत् ९६ भेदव्यपदेशाच्च ६ पुच्छं ब्रह्म परामृश्य तत्स्यप्रख्याप्य सारतां। रसरूपानंदमाप्यात तद्वियानंदवानिति
९७ लब्धृलब्धव्यभावेन भेदोक्तेश्च श्रुताविह। पुच्छवाक्ये मुख्यमेव ज्ञेयं ब्रह्म विवक्षितं ९८ पुच्छवाक्ये सन्निहितमानंदमयवाक्यतः।
इति तत्रोक्तमात्मानं परामृशति तत्पदं ९९ रसं लब्ध्वानंदमयोधिकारी जीव एव हि। आनंदी भवतीत्युक्ते लब्धृलब्धव्यभेदतः २००

११ श्वरन्निक्षामिभ्ययामउवासह। अतिदारिद्र्यसंयुक्तः प्रद्राणक इतीर्यते। चक्रस्यापत्यमितिस चाक्रायण इतीरितः ५१ सोदंतं कुत्सितान्माषा
निभारोहमयाचत। सोऽब्रवीत्तं मेउच्छिष्टा इति तं प्रस्तुवाचसः ५२ तानेवमेमदेहीति प्रददौ तान्द्विजाय सः। उदकं च गृहाणेति स चाक्रायणमुक्तवा
न् ५३ नगृह्णामितवोच्छिष्टं जलमित्युक्तवान्द्विजः। नोच्छिष्टाः किमिमे माषा इत्युक्तः प्राह तं द्विजः ५४ नजीविष्यामि कुल्माषाननदन्निति तद्ध्रहः
उदकं तु बहिर्मे यो स्तीति मास्तु तवोदकं ५५ इत्युक्त्वा तान्स संभक्ष्य शिष्टान्पत्न्यै ददौ मुनिः। सान्यत्र प्राप्तसद्भिक्षा गृहीत्वाऽस्थापयद्गृहे ५६
तदालक्ष्य स्थितस्तच्छीरात्रौ स सुष्वाप मंदिरे। प्रातरुत्थाय भार्यां स्वामुवाच जगमिषुर्मुनिः ५७ लभेमहि धनं किंचिद्यद्यन्नं लभेमहि। राजासौ यक्ष्य
ते मां स सर्वार्त्विज्येर्वरिष्यते ५८ श्रुत्वेति पत्युर्वाक्यं सा कुल्माषास्तस्मै पते। प्रददौ पूर्वदत्तांस्ता इत्युवाच निजं पतिं ५९ खादित्वा नुपस्तिः
स यज्ञवाटं जगाम ह। तत्रास्तावे स्तोष्यमाणा ज्ञात्वा तान्स उपावसत् ६० आस्तावो नाम तत्स्थानं यत्र गायंति सामगाः ६१ तत्रोपविश्य उद्गातृ
न्प्राह प्रस्तावदेवतां। उद्गीथदेवतां चाथ प्रतिहारस्य देवतां। अविद्वांसः स्तोष्यथ चेन्मूर्धा वो निपतिष्यति ६२ श्रुत्वेति वाक्यं ते भीतास्तूष्णीमा
सन्गतक्रियाः ६३ यजमानो नृपः प्राह मुनिं चाक्रायणं तदा। ज्ञातुमिच्छामि भवतो नाम यत्र स्थितं त्विति ६४ चाक्रायणो मुनिरहमुषस्तिरिति सोऽ
ब्रवीत्। अथ राजा मुनिं प्राह समर्थस्त्वं मया श्रुतः ६५ सर्वार्त्विक्कर्मकृतये त्वमन्विष्टो मया पुरा। भवतोऽनुपलब्ध्येमानृत्विजोऽवृतवानहं ६६ अधु
नापि त्वमेवेदं सर्वार्त्विक्कर्म कुर्विति ६७ तथास्त्विति तु स्वीकृत्य मुनिः प्राह नृपं प्रति। यावदेभ्यो धनं दद्यास्तावन्मे दीयते यदि ६८ तर्ह्येते मदनुज्ञा ११

ताः स्तुवंतु यदि रोचते। इति तद्वाक्यमाकर्ण्य नृपः प्राह तथास्त्विति ६९ अथ चाक्रायणमृषिं प्रस्तोता विनयान्वितः। प्रस्तावदेवता का सा यामवि
ज्ञाय हि स्तुतो। मूर्धपातस्त्वया प्रोक्तस्तां मे ब्रूहीति पृष्टवान् ७० सर्वाणीमानि भूतानि प्राण एवाविशंति वै। प्राणादेवाभ्युज्जिहीते सैषा प्रस्तावदेव
ता ७१ तां चेदविद्वान्प्रास्तोष्यो व्यपतिष्यच्छिरस्तदा। मदुक्तेन तथात्वं स्थितं सम्यक्कृतं हितं। इति चाक्रायणमुनिः प्रस्तोतारमुवाच ह ७२
उद्गाताऽपृच्छदादित्यमाहोद्गीथस्य देवतां। प्रतिहर्तुः प्राह सोऽन्नं प्रतिहारस्य देवतां ७३ सर्वाणीमानि भूतानि तद्धेः स तस्य रादिवि। गायंत्यादि
त्य मिति [redacted] स आदित्यं प्रशशंस ह ७४ अन्नमेव प्रतिहरमाणानीनि खिलानि हि। भूतानि जीवंतिस देवत्वं स प्रशशंस
ह ७५ इति श्रीसुरेश्वरमाकाशाधिकरणादितिस्रं प्रस्तावदेवताप्राणस्य परमात्मत्वसाधकं प्राणाधिकरणं नवमं ९ ज्योतिश्च
रणाभिधानात् १ गायत्र्याख्यब्रह्मविद्या छांदोग्यस्य तृतीयके। अध्याये द्वादशं खंडमारभ्योक्ता त्रयोदशे ७६ खंडे तत्तो नाह राम्ने ज्योति
श्चेन्त्युपासनं। लोकसंदर्शनी यत्र प्रस्योदिव्या आमयश्रुतं ७७ तच्चादोयदतः परो दिवो ज्योतिरितिश्रुतौ। ज्योतिः शब्देरितं ज्योतिर्भौतिकं नेह किंतु तत्।
परब्रह्मैव कुक्षिस्थाग्न्यादुपास्त्यर्थमीरितं ७८ सूत्रार्थस्तु। गायत्र्याख्यब्रह्मणस्तु चतुष्पात्त्वेन कीर्तनात्। तत्र त्रिपादसंसारि सर्वप्राप्स्येह यत्स्य रात्। परामर्शा
दिह ज्योतिः परब्रह्मैव सम्मतं ७९ पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि। इति प्राग्वेद्युसंबंधि प्रक्रांतममृतं त्रिपात् ८० द्युसंबंधितमत्रत्यं द्युत्रिपादमृ
तस्य हि। शब्दतः स्मारकं तस्माद्यच्छब्दस्तद्वदीत्ययं ८१ त्रिपादमृतरूपत्वं ज्योतिषः स्पष्टमत्र हि। ब्रह्मलिंगमतो ज्योतिरिदं ब्रह्मैव नेतरत्। द्युमर्यादो द्युप

स्वयंज्योतिषो वास्तवं नहि ८२ छंदोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनं २ गायत्री छंदसस्त्वेव पूर्ववाक्येत्युपक्रमे मू।
१२ न ब्रह्मणः प्रकृतत्वमिति चेन्न तथास्तितत् ८३ गायत्रीद्वारतस्तत्र सर्वस्मिन्परमात्मनि। चेतोर्पणस्य कथनाद्ब्रह्म प्रकृतमत्र हि ८४ गायत्री वा इदं
सर्वमित्युपक्रम एव हि। सार्वात्म्यं यत्प्रकथितं गायत्र्यां तदसंभवात् ८५ उपक्रमग गायत्रीपदं हि ब्रह्मलक्षकं ८५ अपवार्तोस्त्रियः प्राप्ते गायत्री
द्वारिकारूपा। ब्रह्मोपास्तिः प्रकथिता नो तत्र तत्स्फुटं तं इह हत् ८६ विकारद्वारतो ब्रह्मोपास्तिरत्र यथा स्थिता। तथा त्वन्यत्रैतरेयारण्यकेस्तिनिदर्शनं ८७
एतं ह्येव बह्वृचा महत्युक्थे मीमांसंते। एतमग्नावध्वर्यव एतं महाव्रते छंदोगा इति ८८ तथा चेतोर्पणनिगदात्तथा हि दर्शनमिति सूत्रभागस्य वर्ण
कांतरमाह। छंदोभिधानसूत्रस्य वर्णकांतरमुच्यते। गायत्री छंदसस्त्वेव पूर्ववाक्ये त्युपक्रमात्। न ब्रह्मणः प्रकृतत्वमिति ज्योतिःश्रुतौ हृहत् ८९
यच्छंदेन परामृष्टुं प्रशाक्यमिति तन्नहि। यच्छब्दार्थं ब्रह्मरूपं न ज्योतिरिति चेन्न तत् ९० चतुष्पात्वेन गायत्री सादृश्येन जगत्स्वतो। तद्वाध्यानस्य
कथनाद्गायत्रीपदमेव तत् ९१ गौण्या वृत्त्यालाक्षणिकं परब्रह्मणि तत्र वै। अतो नाप्रकृतं ब्रह्म यच्छब्देन यदीरितं ९२ यथा षडक्षरैः पादैर्गा
यत्र्युक्ता चतुष्पदा। भूतपृथ्व्यादिपादोक्तेश्चतुष्पाद्ब्रतथा हृहत् ९३ तस्माच्चतुष्पात्वगुणयोगाद्गौण्यत्र लक्षणा। उपक्रमग गायत्रीपदस्य प
रमात्मनि ९४ तेनात्र प्रकृतं ब्रह्म यच्छब्देन तदीर्यते ९५ छंदोभिधा विशब्दस्य सादृश्यादितरं च च। प्रयोगास्तीति दृष्टांतं तथा हीत्याहि सूत्रकृ
त् ९६ छंदोभिधा विशब्दस्य यथा गौण्यत्र लक्षणा। स्फुटं संवर्गविद्यायां तथा ह्यस्ति निदर्शनं ९७ छांदोग्योपनिषच्चतुर्थाध्यायखंडे तृतीय १२

कं दृष्टिलोकगतिं ततः ३७ शिलको ह्युष्टिलोकस्य भूलोकं गतिमाह हि। भूलोकोध्यागदानाद्यैर्हिं संपाद्य दिति ३८ अंतर्वतारव्य दोषे
पानिनिं हशिलकं नृपः। शिलको भूमिलोकस्य गतिं पप्रच्छ तं नृपं ३९ राजा प्रवाहणः प्राहत्याकाशोगतिरित्यमुं। एतद्धंति पदस्यार्थो ह्य
स्मिन्काल इतीह्यते ४० इति श्री॰सुआशात्वेनोपास्योद्गीथाकाशस्य परमात्मत्वसाधकमेकसूत्रमष्टममाकाशाधिकरणम् ८ ॥
अत एव प्राणः १ आकाशवाक्याद्वा चानुश्रूयत उपासनाः। प्राणादित्यान्नबुध्यात्र य उपास्यत्वेरिताः। प्रस्तावोद्गीथकप्रतिहारः कर्म
समृद्धये। ४१ तत्र प्राणः परब्रह्मरूपं चवृत्तिरनःसन। पूर्वसूत्रेरितादेव तल्लिंगादिति हेतुतः। तल्लिंगस्य वंदितानां प्राणादेव लयोद्गमौ ४२ पूर्वाधि
करणेनैव गतार्थत्वमिदं पुनः। अधिकाक्षेपसंशांत्यै प्राहाधिकरणं मुनिः ४३ ज्ञानकर्मेंद्रियादीनां प्राण एव लयोद्गमौ। सुप्तौ सुप्तेरु परमेश्वरे
तेश्रुतिगा विति ४४ स पंचवृत्तिः प्राणोत्रा प्यस्तु प्रस्तावदेवता। इत्याक्षेपे समाधानं सर्वभूतलयोद्गमौ। अत्र प्रोक्तौ न घटते प्राणवायावतः
सन् ४५ प्राणस्य प्राणमित्यादौ मनोहि प्राणबंधनं। इत्यत्र प्राणशब्दस्तु परमात्मन्यपि श्रुतः ४६ छांदोग्योपनिषच्चतुर्थाध्यायखंडे तृतीयके। सं
वर्गगुणकप्राणोपास्तौ प्राणस्तु लौकिकः। ज्ञानकर्मेंद्रियमनोमात्रस्य हि लयोक्तितः ४७ अत्र ब्रह्मैव हि प्राणः पंचवृत्तिरनस्तु न। सर्वभूतलः
योस्त्वस्योर्ब्रह्मलिंगस्य सत्त्वतः ४८ अतैवमाख्यायिकाकाशप्रकरणानंतरं श्रूयते। तथा हि। मटच्य परपर्याय ऽशनिभिर्दैवयोगतः। नष्टेषु
कुरुसस्येषु दुर्भिक्षे समुपस्थिते ४९ आटिक्यपरपर्यायाऽप्राप्तयौवनभार्यया। सहितः कुरुदेशस्थ उषस्तिर्नाम नो द्विजः ५० प्रज्ञापाक

१२ थ:पंचसस्वर्गंप्रतिपद्यते १४ स्वर्गोत्र हृदयंतस्य प्राप्तिर्ध्यैयकताननां।तयापूर्णा प्रवृत्तित्वगुणं ब्रह्माधिगच्छति १५ इतिविदुस्थपरब्रह्मपुरुषत्वेनतेः
श्रुतौ।व्यपदिष्टाद्वारपाला व्यपदेशो हि सश्रुतौ १६ गायत्र्या ब्रह्मरूपत्व एवतेत्रोपपद्यते।छंदोमात्रपरत्वेतु ब्रह्मसंबंधितानहि १७ घटते पुरुषाणां
साऽतोगायत्र्यभिधंपरं।ब्रह्मोक्तमितिविज्ञेयं गायत्रीपदतःश्रुतौ १८ किंच।गायाचासौत्रीयमितिगायत्रीत्यब्रवीच्छ्रुतिः।गायतित्रायतेसर्वानिा
यत्रीवाक्स्वरूपतः १९ अश्वोयंगोरियमितित्यभिधत्तेखिलंजगत्।भाभैषीस्त्वामहंत्रास्यइतिशङ्कामनाजनात् २० त्रायतेहीतिवेदेनगायत्रीतिनि
गद्यते।गानात्राणाच्चोक्तरीत्यागायत्रीसंज्ञकंत्वहृत् २१ नैवाक्षरसंनिवेशरूपायाघटतेत्वदः।अतोवागादिसर्वात्म्यंब्रह्मण्येवसमंजसं २२
उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात् ४ सप्तम्यंतंपूर्ववाक्ये दिवीतिश्रूयते पदं।इहपंचम्यंतमितितूपदेशोभिदाततः २३ प्रागुक्तस्यद्युसं
बंधिब्रह्मणःप्रकृतश्रुतौ।पंचम्यंतद्युपदतःस्मरणंनेतिचिन्त्यतां २४ विभक्तिभेदतोभिन्नेप्युपदेशद्वये स्थिमात्।पूर्वस्यप्रत्यभिज्ञायाअविरोधादिह
श्रुतौ।प्रागुक्तस्यद्युसंबंधिब्रह्मणोद्युपदात्स्मृतिः २५ प्रधानप्रातिपदिकार्थेनप्राक्तनसंस्मृतेः।अप्रधानोविभक्त्यर्थोनखलुप्रतिबंधकः २६
वाक्यार्थधीहेतुतयास्वतंत्राहिपदार्थधीः।वाक्यार्थबुद्धिस्तज्जत्वाज्जघन्यानविरोधिनी २७ विभक्त्यंतपदार्थोत्रवाक्यार्थस्तदपेक्षया।केवलप्राति
पदिकार्थःपदार्थइतीष्यते २८ उच्यतेहिपदंशक्तंपदद्वयमिहास्तिहि।प्रकृतिप्रत्ययश्चेतिविशिष्टंवाक्यमन्यतु २९ इतिश्री०सुपदतःपरोदिवोज्योतिरि
तिकुक्षिस्थश्चासौसमुपास्यतयाप्रोक्तज्योतिःपदार्थस्यपरब्रह्मत्वसाधकंचतुःसूत्रंज्योतिरधिकरणंदशमं १० प्राणस्तथानुगमात् १ १२

ऋग्वेदांतर्गताकौषीतकिशाखास्तितत्रहि।आरण्यकोपनिषदिप्राणोपास्तिप्रकाशकः।अष्टखंडात्मकोध्यायस्तत्रखंडेद्वितीयके ३० प्राणोस्मिप्र
ज्ञात्मातंमामायुरमृतंत्विति।उपास्वेतिसुरेशेनप्रतर्दननृपंप्रति ३१ इहायुष्ट्वंस्थानकालेत्वमृतत्वंस्वचाप्तये।आकुष्टेनामृतत्वेनप्राणोपास्तिरु
दीरिता ३२ सएषःप्राणःप्रज्ञात्मातथानंदोमृतोजरः।इत्युपास्त्युपसंहारःकृतोस्त्यष्टमखंडके ३३ सूत्रार्थस्तु।यथापूर्वाधिकरणेज्योतिःशब्दःप
रेशगः।तथात्रप्राणशब्दोयंपरमात्मपरोमतः ३४ आद्यंतयोरेकरूप्यादसाधारणलिंगतः।अत्रप्राणपदार्थस्यब्रह्मत्वावगमाच्छ्रुतौ ३५
आद्यंताभ्यांब्रह्मपरमेकंवाक्यंप्रवत्यतः।प्राणोस्मिप्रज्ञात्मेत्यत्रप्राणोब्रह्मनकादिकं ३६ प्रज्ञात्माप्राणएवेदंपरिगृह्यशरीरकं।उत्थापयेदि
तिश्वासलिंगंखंडेतृतीयके ३७ नविजिज्ञासीतवाचंविद्याद्वक्तारमेवहि।इत्यादिकंजीवलिंगंदृश्यतेष्टमखंडके ३८ अथासाधारणानीहब्र
ह्मलिंगानियान्यतु।यथावदवबोधायप्रदर्श्यंतेत्रतान्यपि ३९ वियार्थोहिततमत्वंधर्माधर्माद्यसंगिता।धर्मादेःकारयितृत्वंतथासर्वनि
यंतृता ४० इतिचत्वारिलिंगानिदृश्यंतेब्रह्मणोत्रहि।प्रज्ञानंदोमृतत्वादिर्ह्यनुकूलंचविद्यते ४१ अत्रैवमाख्यायिकाश्रूयते।तथाहि।
प्रतर्दनोनामराजादैवोदासिःपराक्रमात्।युद्धेनहेतुनेंद्रस्यप्रियंधामजगामह ४२ तंदृष्ट्वेंद्रस्तुष्टआहदातुमिच्छामितेवरं।इत्युक्तोनृप
तिःप्राहत्वयैहिततमंवरं ४३ मन्यसेतंत्वमेवेंद्रदेहीत्युक्तःसुरेश्वरः।मामेवत्वंविजानीहीत्याहतंनृपतिंप्रति ४४ मामितिब्रह्मबुध्याहशास्त्र
दृष्ट्यासुरेश्वरः।ब्रह्मज्ञानंहिततमंतुर्मन्यइतिचाब्रवीत् ४५ किंचब्रह्मैवाहमितिदृढनिश्चयवानहं।प्रारब्धवशतोविप्रंत्वाष्ट्रंवेहतवान्खलु ४६
वेदांतवाक्यंरूत्सोक्तंनचैषांनास्तिवैसुखे।बहिर्मुखास्तादृशायेतेहिप्रोक्ताअसुराः ४७ आरण्यकास्तुयेप्यानस्तेत्रसालाटकामताः।सा

१४ लाद्वकेभ्यः प्रायश्चित्तं यतीनहमरुन्मुखान् ४८ बहुमर्माण्यतिक्रम्य प्रह्लादीनहनं दिवि। अंतरिक्षे तु पौलोमान् कालखंजांस्तथा भुवि ४९ तेन मे
विदुषो लोम मा नापि विद्धं तां हसा। सुदृढज्ञानमाहात्म्याज्जीवन्मुक्तिर्न हिंस्यते ५० यो वा हि तन्न मेच्छुः समं विजानाति न तत्तः। नास्य मोक्षः के
न च न कर्मणा हिंस्यते खलु ५१ न मातापितृवधतो न स्तेयभ्रूणहत्यया। इत्याद्य खंडे देवेंद्रः समुवाच प्रतर्दनं ५२ अष्टमे चरमे खंडे संति लिंगां
तराणि च। स एष प्राणो न भूयान् कर्मणा साधुना पि च। असाधुना नो कनीयान् स एव हि सर्वदा ५३ एष एव साधु कर्म तं कारयति यं नरं। लो
केभ्य एभ्य ऊर्ध्वं तु तूप यानेतुमिच्छति ५४ एष एवासाधु कर्म तं कारयति यं नरं। लोकेभ्य एभ्यो धोलोकं निम्रहे नेतुमिच्छति ५५ एष प्राणो
लोकपाल एष लोकाधिपो मतः। एष सर्वेश्वरः प्राणो विद्यादात्मा ममेति तां इतीद्रः प्राणविद्यां वै तूपायोपदिदेश ह ५६ पूर्वप्राप्याधिकरणे
लिंगात्प्राणपदश्रुतिः। नीता ब्रह्मपरत्वेन बहुलिंगेषु सत्स्विह ५७ आद्यंते काद्य्यादिनात्र बलाबलविनिर्णयः। लिंगानां क्रियते तेन
न पूर्वेण गतार्थता ५८ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् २ उपास्ति वक्तृदेवेश कर्तृकादत्र हि श्रुतौ। उपक्र
म्य ज्ञेयतयास्य स्योपास्यत्वकीर्तनात्। न प्राणो ब्रह्म किंतु स्यात्प्राण इंद्र इहेति चेत् ५९ ब्रह्मवित्वात्तु यस्य सर्वपापासंसर्गकीर्तनं। प्राणो
स्मि तमामित्यस्य लिंगत्वेन गुणं खलु ६० अस्मि प्राणा पास्ति परे ध्यायेको पीतकी रिते। ब्रह्मसंबंधबाहुल्यमुपलभ्यत इत्यहं। प्राणोस्मि
मामुपास्वेति त्युपदेशाद्इहे प्रगः ६१ न देवता जीवपरोन्याय्यत्वाद्धि संमतेः ६२ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ३ जीवस्य ब्रह्मरू १४

४द शाक्षरं छंदइह विराद्त्से न थिवक्षितं।

के। अन्नाद्रता यस्य सर्वदिक्तज्ञभीष्टान्न सिद्धये। संवर्गगुणकप्राणवायुपास्तिरुदीरिता ९८ स्वस्मिंस्तु वायुः संहृत्य केर्यकं चंद्रापइत्ययं। यस
नात्संग्रहाद्धात्र संवर्गइतिकथ्यते ९९ प्राणः स्वस्मिंस्तु संहृत्य वाक्चक्षुःश्रोत्रहृद्वितिं। संवर्गइत्ति तो ध्येयो वायुप्राणौ क्रमात्तदि ३०० ध्या
त्वैवं तौ स्वेन सह पंच पंचेति तावुभौ। दश संपद्येत इति कृतत्वेन विचिंतयेत् १ तत्कृतं च विराट्त्वेन वायुप्राणौ च चिंतयेत्। इतीरितं त्रकृतं
चतुश्छिद्रः ३ स उच्यते २ चतुः सुषिरपाशस्तु चतुःसंख्यो दरे स्तिहि। दशसंख्येयस्यो वीयो देशकं कृतवाहुभाक् ३ दशत्वगुण्ययोगेन कृत श
ब्दः श्रुतौ तयोः। विराट्शब्दः प्राणवाय्वोः प्रयुक्तो स्ति कृते पि वै ४ चत्वारः प्रथमासंख्यास्त्रयः संति चतुर्थये। त्रिपुटौ स्तो द्वयोरेक एवं संख्या दशा
त्मिका ५ गायत्री पदमप्येवं चतुष्पात्तस्य योगतः। गौण्या लक्षणया तस्याः परब्रह्मणि वर्तते ६ भूतादिपादव्यपदेशोपपत्तेश्चैवं ३ इतश्च
प्रकृतं ब्रह्मात्रैवाहैवं च शद्बतः ७ भूतभूवर्ष्महृदयरूपाः पादाः ईरिताः। गायत्र्या ब्रह्मरूपत्व उपपन्ना भवंति ते। नेवाक्षरसन्निवेशरूपा
याः संभवंतिते ८ किंच। चतुष्पदा षड्विधा च तथा पूर्णा प्रवर्तिनी। हार्दिकाशो ध्येयतया गायत्री समुदीरिता। वाक्प्राणसहितैः पादैः षड्विध्यं
परिकीर्तितं ९ ध्येयस्थानं तु हृदयस्वर्गत्वेन प्रकीर्तितं। हृदश्छिद्राणि दिक्ष्वूर्ध्वं चेति पंचेरितानि हि १० स्वर्गद्वारतया ख्यातद्वारपाः पंचकीर्तिताः।
प्राच्यां प्राणो दक्षिणस्यां व्यानोपानश्च पश्चिमे ११ उदग्द्वारि समानोत्रोदानऊर्ध्वकपाटगः। रविचंद्राग्निपर्जन्यांबरत्वेनेरिता हि ते १२ रूप्या
दिरूपता ध्यानफलात्स्युक्तोन्यनुक्रमात्। अवांतरफलान्येवमुक्तानि समुदीरितं १३ पंचैते ब्रह्मपुरुषाः स्वर्गलोककपाटपाः। एनानुपास्ते यः

१५ र्मविशिष्टेकोपासनस्य विधायिनः। वाक्यस्याश्रवणात्रेवमुक्कं इत्तिकृतामतं ७७ तंमामायुरितिश्रुत्यास्वस्वधर्मसमन्वितैः। जीवप्राणामृता
द्यैर्योर्युक्तोपास्तिर्विधीयतां ७८ इतिचेन्नैतदेवं स्यात्सर्वधर्माश्रुतत्वतः। ब्रह्मश्रुतेरभावाच्च प्राणस्यैवामृतत्वतः ७९ विधित्रयस्याद्युक्तारं किंच।
विद्यादिस्याद्दिकंपृथक्। अन्यगुणविधानार्था इतिवक्तुंनशक्यते ८० उपक्रमावसानाभ्यामेकवाक्यत्वनिश्चयात्। तस्मात्सर्वत्रिकरीत्येदं त्रयंब्र
ह्मपरंश्रुतमिति ८१ साभासबुद्धिरूपायाः प्रज्ञायायदिहेरितं। दृश्यतो विषयत्वंतज्जीवधर्मोथसाक्षिणि ८२ परमात्मनिकूटस्थे द्रष्टृ
त्वाध्यासहेतुना। प्रज्ञायायेरितासापि धर्मोत्याभासगःखलु ८३ विनाजीवाख्यमाभासंघटत्वेनद्वयंद्धदः। अतउक्ताविमौधर्मौज्ञाय
तेजीवगाविति ८४ देहोस्थापनमायुष्यममृतत्वमितित्रयः। प्राणधर्माःप्रतीयंतइहोपास्तौश्रुतीरिताः ८५ विद्यायांहितनमत्वंधर्मीधर्मी
द्यसंगिता। धर्मादिःकारयितृत्वंतथासर्वनियंतृता ८६ प्रज्ञानंदामृतत्वाद्या ब्रह्मधर्माइहेरिताः। प्रतीयंतेथापिवाक्यभेदान्नोपासनात्रयं
८७ ईशायत्ता यतःसर्वेव्यापाराःप्रभवंस्यतः। प्राणवाय्वादिलिंगानांब्रह्मलिंगेकदेशता ८८ चिदाभासेनसहिता बुद्धिःप्रज्ञेतिभण्यते।
चिदाभासेनकामास्त्वासेबाहंकारसंज्ञिका ८९ सोहंकारोजीवउक्तःकर्ताद्रष्टासउच्यते। प्रज्ञारूपांबुद्धिमेवंजीवद्वयागमाजगुः ९० अ
हंवृत्तिरिदंवृत्तिरित्यंतःकरणंद्विधा। जीवसंज्ञमहंवृत्तीदंवृत्याकुःप्रमाणकं ९१ अहंकारस्यतादात्म्यंचिच्छायादेहसाक्षिभिः। सहजंकर्म १५
जंभ्रांतिजन्यंचत्रिविधंक्रमात् ९२ जीवाभिधानाप्रज्ञेयमिंद्रियैर्विषयैरपि। चूर्णीविषपितारव्यांगलध्वाद्वृष्टीतिसिध्यति ९३ बुध्योपहितचिद्
१ वागेवास्याएकमंगमदूदुहदितिश्रुतेः। ४ अ धा द्वृष्ट्वाध्यासहेतुहद्रष्टृत्वादिविधोच्यते। ४

रास्वरूपेसर्वसाक्षिणि। द्रष्टृत्वाध्यासमाचष्टेप्रज्ञयेत्यादिकश्रुतिः ९४ बुद्धिद्वारा चिदात्मायंवाचमारुह्यवेंद्रियं। तस्याःसंभेरकोष्ठत्वा वा
चानामान्युपाश्नुते ९५ वक्तव्यत्वेननामानिलभतेवसुखापिवा। रूपाणिपश्यतीत्येवंद्रष्टृतांचिद्रुपाश्नुते ९६ समस्तद्रष्टृतानिवद्रष्टृता
ध्यासहेतुना। चिद्रूपेबुद्धिधर्मःस्यादित्यर्थःफलितःश्रुतेः ९७ इतिश्री॰सुरेंद्रेणायुष्यामृतत्वाभ्यांहितत्वमतेनउपास्यतयाप्रतर्द
नायोपदिष्टस्यप्राणस्यब्रह्मत्वसमर्थनपरंचतुःसूत्रभिंद्प्रतर्दनप्राणाधिकरणमेकादशं ११ इतिश्री॰सुसमन्वयाध्यायेप्रथमेसप्ट
ब्रह्मलिंगकवाक्यनामेकत्रिंशत्सूत्रएकादशाधिकरणःप्रथमःपादः १ आद्यपादेस्फुटब्रह्मलिंगवाक्यसमन्वयः। ब्रह्मण्युक्तोऽस्फु
टब्रह्मलिंगवाक्यसमन्वयः ९८ द्वितीयउच्यतेपादेतृतीयपिद्वितीयके। उपास्तिगास्फुटब्रह्मलिंगवाक्यसमन्वयः ९९ तृतीयेतुज्ञे
यमात्रपरवाक्यसमन्वयः। प्रायेणाकथ्यतेतेनपादोतन्नामकोक्रमात् ४०० सर्वत्रप्रसिद्धोपदेशात् १ छांदोग्यगततीयेथाध्याये
खंडेचतुर्दशे। सर्वंखल्विदमित्युपक्रम्योक्तंपरमात्मनः। मनोमयत्वादिगुणैर्ध्यानंभगवदाप्तये १ श्रुत्यायथाक्रतुरितिप्रतिपादित
त्वाद्देवेनयंपक्षितिसाधुसमीरितत्वात्। तद्दिव्यरूपपरिचिंतनतोभवेयंतद्रूपएवभगवन्नवमांप्रपन्नं २ इतिकामयत्वेयःसक्रतुं
कुर्वन्नशांतिमान्। इतिध्यानंविधायात्रध्येयधर्माउदीरिताः। मनोमयत्वप्रमुखास्तद्विशेष्यंनकीर्तितं ३ अतःसर्ववेदशिरोभा
गेजगधेतुतयेरितं। यत्प्रसिद्धंब्रह्मतस्यत्वत्रोपक्रमईरणात्। मनोमयत्वादिगुणंतदेवोपास्यमत्रहि ४ मनोमयोपिजीवोत्रनोपास्योऽ
प्रकृतत्वतः ५ तज्जलानितलयत्वाच्चतदनत्वादिदंजगत्। सर्वंब्रह्मखल्वित्युक्तंतज्जलानितिशब्दतः ६ ब्रह्मोपास्तिमनूद्यात्रगुणाःशांति

विधीयते ७ त्वंस्त्रीपुमानितिश्रुत्या परब्रह्मणि मायया।।जीवादिसर्वधर्मा अप्युपदिष्टा भवंति हि ८ अप्राणो ह्यमनाः शुभ्र इति वै मुंडक
१६ श्रुतिः।आचष्टे निर्गुणं ब्रह्मेत्येवं विरुद्धे मिथः श्रुती ९ विवक्षितगुणोपपत्तेश्च २ विवक्षिता उपास्तौ य उपादेयतया गुणाः।तेषां ब्रह्मण्येव यो
गाद्ब्रह्मैवोपास्यमत्र तु १० सत्यसंकल्पकत्वादेरनुरोधादिमे गुणाः।ब्रह्मण्येवोपपद्यंते न जीवे त्वल्पशक्तिके ११ अनुपपत्तेस्तु न शारीरः ३
सत्यसंकल्पकत्वादेर्जीवेष्वनुपपत्तितः।नेह शारीरको जीवः समुपास्यतयेष्यते १२ कर्मकर्तृव्यपदेशाच्च ४ कर्मत्वेनोपदिशति ध्येय
मेतमितिश्रुतिः।प्रेत्याभिसंभवितास्मीत्याह कर्तृतयेतरं १३ नह्येकस्मिन्कर्मकर्तृभावः सत्यागतो हितः।कर्मकर्त्रोः पृथक्त्वेन
व्यपदेशादपीह वै।नेह शारीरको जीवः समुपास्यतयेष्यते १४ शब्दविशेषात् ५ अथोक्तरीत्या सूत्रार्थसंग्राहककारिकाः।विशे
षशब्दो भेदार्थ इह सूत्रे विवक्षितः १५ मनोमयत्वादियुतपरब्रह्माभिधायिनः।प्रथमांतस्य ब्रह्मशब्दस्यान्यत्र च श्रुतौ।सप्तम्यं
ताज्जीववाचिशब्दाद्दर्थविच्छेदतः १६ इति सूत्राक्षरार्थो यत्तत्स्पष्टार्थः प्रदर्श्यते १७ मनोमयत्वादियुतपरब्रह्माभिधायिनः।प्रथ
मांतस्य शब्दस्य तुल्यप्रकरणश्रुतौ १८ अन्यत्र दृष्टस्येहापि सत्वादीशाभिधायिनः।मनोमयत्वादिगुण ईश एवेह नेतरः १९ कर्मक
र्तृव्यपदेशासंभवो ब्रह्मजीवयोः।तदभेदादिति प्रष्टुः स्मृतेश्चेत्याह तूत्तरं २० स्मृतेश्च ६ अ किं भेददर्शिन्याः श्रुतेः सत्वात्स्मृते मु
रपि।कर्मकर्तृव्यपदेशो युक्तो जीवेशयोरिह २१ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ७ ननु नेशइ १६
होपास्यो हृत्पुंडरीकायतनत्वतः।अणीयस्त्वोपदेशाच्च जीवोत्रोपास्य इष्यतां।इति चेन्न व्यापकस्याप्येवं ध्येयत्वसंभवात् २२

पत्त्वबोधकश्रुतिसंविदा।प्राणोस्मि मामितींद्रोपदेशः स्याद्वामदेववत् ६३ जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्यो
गात् ४ सत्यप्यध्यात्मसंबंधभूम्नि प्राणवचस्तु न।ब्रह्ममात्रपरं किं तु जीवाऽसुपरमप्यदः।ब्रह्मलिंगाज्जीवलिंगान्मुख्याऽसोरपि लिंगतः ६४ इति
चेन्न तथात्वे तूपास्तित्रैविध्यं तोत्र हि।तिस्रः स्वतंत्राः प्रत्येकं प्रसज्जेरन्नुपास्तयः ६५ तेनायुःप्राणममृतमुपास्स्वेत्यर्थभेदतः।त्रिरभ्यासप्रसक्त्या
त्र वाक्यभेदः समापतेत्।संभवत्येकवाक्यत्वे वाक्यभेदो न युज्यते ६६ प्रस्तावदेवताप्रश्नोत्तरे प्राण इतीरिते।ब्रह्मणि प्राणशब्दस्य दृष्टत्वेस्त्वत्राश्रि
तत्वतः ६७ ब्रह्मलिंगस्येह हिततमत्वादेर्हि योगतः।ब्रह्मसंबंधभूम्नश्च प्राणो ब्रह्मैव नेतरे ६८ न प्राणवायुर्नो जीवो न सुरेशाख्यदेवता।प्राणः
किं तु परब्रह्म प्राणो ह्येषोक्तयुक्तितः ६९ ईशायत्तायतः सर्वव्यापाराः प्रभवंस्वतः।प्राणवाय्वादिलिंगानां ब्रह्मलिंगैकदेशता ७० इति भाष्यक
तां व्याख्यारीत्या सूत्रार्थ ईरितः।वृत्तिकारास्त्वाकुरस्मत्सूत्रस्यार्थांतरं हि यत्।भाष्यकारैः खंडनाय संगृहीतं तदुच्यते ७१ तथाहि।जीवमुख्यप्रा
णलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ४ सत्यप्यध्यात्मसंबंधभूम्नि प्राणवचस्तु न।ब्रह्ममात्रपरं जीवप्राणलिंगविरोधतः।इ
ति चेन्न प्राणजीवलिंगयोः स्याद्विरुद्धता ७२ जीवधर्मप्राणधर्मब्रह्मधर्मैस्त्रिभिः सह।एकस्यैवोपासनस्य त्रैविध्यस्य विवक्षणात् ७३ अतो न प
रभेदेपि ब्रह्ममात्रपरत्वता।व्याहन्यते नापि वाक्यभेदो न प्रतिपद्यते ७४ मनोमयः प्राणशरीरो भारूप इति श्रुतौ।उपाधिधर्मैरेकस्या उपास्तेराश्रि
तत्वतः ७५ इहाप्युपाधिधर्माणां योगादेकमुपासनं।इत्याहुर्वृत्तिकारस्तन्न सम्यगिति भाष्यकृत् ७६ उक्तं चैतदन्यत्राभियुक्तैः।तथाहि।नानाध
प्पु

१७ सोत्तात्र परमात्मैव न जीवो ग्निरपीह न। चराचरस्याद्यतया प्रतीतेरत्तृहि श्रुतौ ३६ मृत्युविमक्षन्नमुखसर्वान्नत्वं न चाग्नयोः ३७ अत्रस्य
मोदनपदं संहार्यपरमिष्यते। मृत्युपसेकः संहारे तात्पर्यग्राहको त्र हि। तेन प्रतीयमानो त्ता संहर्तेतीह सिध्यति ३८ दुर्विज्ञेयत्वलिंगे
नानन्यसाधारणेन च। इहाप्यत्तापरमात्मैव न जीवो नाग्निरिष्यते ३९ प्रकरणाच्च २ न जायते म्रियते वा विपश्चिदिति हि श्रुतेः। ईशस्यै
व प्रकरणादस्य त्रात्ता महेश्वरः ४० इति श्री॰सुत्रत्वलक्षत्राद्यत्तृत्वेन प्रतीयमानस्य परमात्मत्वेन ज्ञेयत्वसाधकं ह्यद्वत्रमत्तृत्वाधिकरणं
द्वितीयं २ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् १ प्रागुक्तोदनवाक्योर्ध्वं कठोपनिषदि श्रुतिः। ऋतं पिबन्ताविति तु श्रूयते तत्र संशयः।
गुहां प्रविष्टौ जीवेशौ किं वा जीवमती इति ४१ गुहां प्रविष्टौ जीवेशावेव हि श्रुतिसंमतौ। यत्तत्तौ चेतनात्मानावतस्तावेव संमतौ ४२
न जीवबुद्धी अत्रेष्टे साजात्याभावतस्तयोः। संख्यावतोः श्रुतौ लोके साजात्यस्यैव दर्शनात् ४३ अन्वेष्टव्यो द्वितीयोस्य गोरित्युक्ते प्र
तीयते। अन्वेष्टव्यो द्वितीयो गोर्नाश्वोन्यो वा प्रतीयते ४४ विशेषणाच्च २ अस्यामेवोपनिषदि सुजीवपरमात्मनोः। गंतृगंतव्यभावे
न मंतृमंतव्यभावतः। विशेषितत्वादप्यत्र जीवेशावेव संमतौ ४५ विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोध्वनः परमाप्नोति तद्वि
ष्णोः परमं पदं ४६ तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ४७ १७
तत्त्वंपदार्थौ जीवेशौ हृदि सन्निहितावुभौ। ऐक्येन साक्षात्कृत्यातो निःशोको जायते नरः। इति श्रुतेरभिप्रायाद्द्वितीयं ज्ञेयपरा श्रुतिः ४८

इति श्री॰ऋतं पिबन्ताविति मंत्रे गुहां प्रविष्टत्वेन श्रुतयोर्बुद्धिजीवरूपत्वव्यावृत्तिफलकजीवेशत्वसाधकं गुहाधिकरणं द्वितीयत्वं तृतीयं ३
अंतर उपपत्तेः १ ध्येयः किं ब्रह्म खं ब्रह्मेत्युक्तोस्ति य उपक्रमे। सुखस्वरूप आकाशः परमात्मा स एव हि ४९ एषोक्ष्यंतःस्थितो ध्येयो ज्ञाय
ते पुरुषोत्तमः। अत्रोपदिष्टधर्माणामस्मिन्नेवोपपत्तितः ५० इच्छायाथवा जीवोथवाक्ष्यादेवता रविः। नेष्टोत्रोक्तधर्माणामीशान्यानु
पपत्तितः ५१ छांदोग्यगचतुर्थस्याध्याये खंडे शरेंदु १५ के। श्रूयते क्षिस्थपुरुषोपास्तिर्जाबालकीर्तिता ५२ विद्याफलं ब्रह्मलोकप्राप
केणार्चिरादिना। देवयानाख्यमार्गेण सहैहोपास्तिरीर्यते ५३ स्थानादिव्यपदेशाच्च २ उपास्त्यर्थं चक्षुरादिस्थानस्यान्यत्र कीर्तनात्।
हिरण्यश्मश्रुरित्यादौ रूपवत्त्वस्य वर्णनात् ५४ न तद्वदत्राप्यल्पचक्षुरंतस्थत्वोपपत्तितः। अक्ष्यंतस्थः परात्मैव ध्येयो न्यानुपपत्तितः ५५
सुखविशिष्टाभिधानादेव च ३ आदौ सुखविशिष्टस्य कथनात्परमात्मनः। य एष इति शब्दाभ्यां स एवात्रोपदिश्यते ५६ तादात्म्ये
नैव कखयोर्वैशिष्ट्यस्य त्वुपक्रमे। उक्ते श्वानूद्यते सोत्र य आकाशः सुखात्मकः ५७ तेन नाप्रकृतश्छायापुरुषादिरिहेष्यते। कं खं ब्र
ह्मेतिवाक्यस्थः कशब्दः सुखवाचकः ५८ किं चाग्निविद्या आत्मविद्या चोक्तास्ते तत्फलाप्तये। आचार्यस्तु गतिं वक्तेत्युक्तत्वादंतअ
ग्निभिः। अस्युक्तकखविद्यै वाक्षिण्युक्ते स्ववसीयते ५९ श्रुतोपनिषत्कस्य गत्यभिधानाच्च ४ अभ्यस्तब्रह्मोपास्तिकस्य पुंसो यान्य
त्र कीर्तिता। अर्चिरादिगतिस्तस्या अत्र संकीर्तनादपि। श्रुतो त्राक्षिस्थपुरुषः परमात्मैव नेतरः ६० अनवस्थितेरसंभवाच्च नेतरः ५
छायासंपादकस्याह्यस्या बिंबस्य तस्य सर्वदा॥ असन्निधानादस्याग्रेन छायासार्वकालिकी ६१ अमृतत्वादिधर्माणाच्छायादाव

७ त्रिमम्य न ष्मणे वास्यमुज्यते वैनि र्यतता।

व्यसंभवात्। न च्छायापुरुषो नापि रव्यादिर्ध्येय इष्यते। किंत्वक्षिस्थः परात्मैव ध्येयो योऽनेकगुणैर्युतः ६२ इतिश्री॰सुपंचरत्नं छांदोग्य
१८ गतोपकोसलविद्यायां श्रुताक्षिपुरुषस्य संयद्वाम त्वं वामनीत्वं भामनीत्वगुणकत्वेन ध्येयपरमात्मत्वसाधकमक्ष्यंतराधिकरणं चतु
र्थं ४ अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् १ बृहदारण्यकगततृतीयाध्याय इति। अस्त्यंतर्यामिसंज्ञं वै सप्तमं ब्राह्मणं पृ
थु ६३ तत्राधिदैवादिषं तर्यामीयः श्रूयते हि सः। अंतर्यामित्वयाज्ञेयः परमात्मैव नेतरः। अदृष्टत्वामृतत्वादितद्धर्माणामिहोक्तितः ६३
तत्ताभिमान्यधिदैवादिर्नियंता सुरोथवा। अंतःप्रविष्टो योगी वानां तर्यामित्वेष्यते ६४ अंतर्यामित्व पर्या नरीशान्य स्मिन्नसंभ
वात्। ईशान्यांतर्यामिणोत्रानवस्थान्यय हे भवेत् ६५ अधिदैवाद्धिभूताध्यात्मादिभिर्विविधैर्युवे। अंतर्यामिब्राह्मणेंतर्यामी संश्रु
यते स्फुटः ६६ न च स्मार्तमतद्धर्माभिलापात् २ सांख्यैः स्मृतं प्रधानं तु नेहांतर्यामिवाक्यभाक्। न स्मिन्प्रधाने संभाव्याद्दृष्टत्वस्यो
त्रकीर्तने। अप्यतद्धर्मभ्रममत्वद्दृष्टत्वादेरपीरणात् ६७ शारीरश्चोभयेपि हि भेदेनैनमधीयते ३ शारीरश्चैतनो जीवो यो गीद्रष्ट्रा
दिरप्यसौ। नांतर्यामी समस्तस्यां व्यापकोपाधिगतत्वतः ६८ किंचैनमुभये जीवं काण्वा माध्यंदिना अपि। अंतर्यामिनियम्यत्वा
श्रयत्वाभ्याम धीयते। भेदेनांतर्यामिणो तो नांतर्यामी स इष्यते ६९ अतोधिदैवादिषं तर्यामी हेशो वक्ष्यते ७० इतिश्री॰सुमि
त्रं नर्यामि शब्दस्येशपरत्वसाधकमंतर्याम्यधिकरणं पंचमं ५ अदृश्यत्वादिगुणको धर्मोक्तेः १ मुंडकाख्योपनिषदि श्रू
यते ह्याद्यमुंडके। अदृश्यत्वादिधर्मोपलक्षितं निर्विशेषकं ७१ भूतयोनिं यया धीराः साक्षात्कुर्वीत विद्यया। सा विद्या परमात्मेयात द १८

सूचीपाशाग्रवच्छेदतच्छिद्राभ्यां यथा नभः। अर्भकौकोप्यणीयोपि तथेशो व्यपदिश्यते २३ अणीयस्त्वार्भकौकस्त्वे एवं शब्दविवक्षिते। नि
ल चाय्यत्वमुपास्यं स्मर्भकत्वमिहाल्पता २४ संभोगप्राप्तिरिति चेन्न वैशेष्यात् ८ ननु सर्वगतेशस्य शारीरादपृथक्त्वतः। दुःखादिभोगसंप्रा
प्तिरिति चेन्न विशेषतः। अनश्नन्नन्य इत्यादि विशेषास्ति श्रुतौ श्रुतः २५ तस्मान्मनोमयत्वाद्यैरुपास्यो त्रेश एव हि २६ इतिश्री॰सुअस्पष्टब्र
ह्मलिंगवाक्यसमन्वयाख्यप्रथमाध्यायद्वितीयपादे अष्टरत्नं मनोमयत्वप्राणशरीरत्वादिगुणकेशोपास्त्यधिकरणं प्रथमं १ ॥
अत्ता चराचरग्रहणात् १ कठोपनिषदध्याय आद्यवल्लीत्रयात्मके। द्वितीयवल्ल्युत्तरार्धे परमात्मानमेव तु। न जायते म्रियते वेत्यधिकृत्य
ततः परं २७ नाविरतो दुश्चरितान्नाशांतो नासमाहितः। नाशांतमानसो वापि प्रज्ञानेनैनमाप्नुयात् २८ इति श्रुतिः इत्युक्तोपायरहितो ना
परोक्षीकरोति तं। इत्युक्तोपायहीनस्य पुंसो दुर्ज्ञेय तेर्यते। क इत्था वेद यत्र स इति तत्रेदमुच्यते २९ यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ३० उक्तसाधनहीनेन दुर्ज्ञेय इति कीर्तनात्। उक्तोपायैरिह ज्ञेयः परमात्मेति लक्ष्यते। अतो
ध्येयपरा नेयं किं तु ज्ञेयपरा श्रुतिः ३१ श्रुत्यर्थघटितः सूत्रार्थस्तु। ब्रह्मक्षत्रं च यस्योभे ओदनः सर्वमारकः। मृत्युर्यस्य घृतं सोस्य सर्वस्यात्ता
जगत्पतिः ३२ निर्विशेषे यत्र रूप आत्मारामइतीर्यते। निर्गुणं तत्त्वाविरत इत्युक्तैः साधनैर्युतः। यथा वेत्तीत्थमन्यस्तु को विद्यात्साधनैर्विना ३३
इति श्रुतौ कठोक्तायां कर्तृकश्चित्सतीर्यते ३४ तयोरन्यः पिप्पलं स्वाद्वत्ति जीव इति श्रुतेः। अग्निरत्तादइति च श्रुतेः संशय उत्थितः ३५

५ अप्राणोह्यमनाः शुभ्रोह्यक्षरात्परतः परः। ३ ईशप्रधानपक्षेतुल्युपादानपरंमतं

न्यात्वपरेतिसिद्धि ७२ अदृश्यत्वादिगुणकोऽभूतयोनिरीश्वरः। नप्रधानं नशारीरः परमात्मगुणोक्तितः ७३ यः सर्वज्ञः सर्वविच्चय
स्यज्ञानमयंतपः। तस्मादेतद्ब्रह्मनामरूपमन्नं चजायते। इतिसर्वज्ञत्वमुख्यागुणाः संतीरिताइह ७४ जीवोपिधर्माधर्माभ्यांभूतजातो
पसंग्रहात्। प्रतीयतेभूतयोनिनतयाव्यक्तं चसर्जनात् ७५ निमित्तवाचिवृक्षादिरथसेयोनिपदंतिहि ७५ विशेषणभेदव्यपदेशाभ्यां
चनेतरौ २ अत्रोक्तोयोऽभूतयोनिः परमात्मासनेतरौ। असाधारण्यद्व्यत्वामूर्तत्वादिविशेषणात् ७६ अक्षरात्परतःपरइत्यव्यक्तादि
दोक्तितः दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः ७७ रूपोपन्यासाच्च ३ सर्वात्मकस्वरूपस्यपौरुषस्यात्रईरणात्। अथवा
द्युक्तोऽभूतयोनिः परमात्मैवनेतरौ ७८ पुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतं। एतद्योवेदनिहितं गुहायांसो ऽविद्याग्रंथिंविकिरतीह
सोम्य। इत्यंतेशौनकंप्राहपौरुषंरूपमंगिराः ७९ इतिश्री०सु अदृश्यत्वादिगुणकभूतयोन्यात्मकाक्षरस्यपरमात्मत्वसाधकंनि
रूप्रमहदृश्यत्वाधिकरणंषष्ठं ६ वैश्वानरःसाधारणशब्दविशेषात् १ छांदोग्यप्रथमाध्यायेकादशंखंडमादिमं॥ ह्लत्वा चतुर्द
शेःखंडेविद्यावैश्वानराभिधा। वैश्वानराख्यपरमात्मोपासनपरेरिता ८० तेजोरूपोग्निः१ रथ्यवाजाठरोग्निः२ शारीरभृत्। अस्योरख्यादे
वतायात्रजीवात्मा४ वेशः५ एवचा। कोवावैश्वानरःपंचस्वेतेष्वितिहिसंशयः ८१ वैश्वानरपदंप्रोक्तमृत्रिगस्तं लिहा। कोन आत्मेत्यात्मप
दंत्विहजविशयोःसमं ८२ आत्मवैश्वानरपदेइतिसाधारणेइह। अप्यत्रसाधारणयोःशब्दयोरेतयोःसतोः ८३ द्युमूर्धतादिका

२ प्रादेशमात्रश्चुबुकादामूर्ध्नः परमेश्वरः। वैश्वानराख्यो ध्यातव्योऽभिविमानादिरश्नता। ८५। तथाहि।
३ आपो धनत्वाख्यगुणाः परस्य वस्तिः प्रतिष्ठाख्यगुणा धरित्री। पादौ चुरो वेदिरितीर्यते स्य लोमानि बर्हिर्हृदि गार्हपत्यः ८७

दीशो विशेषात्कसमंजसात्।। वैश्वानरपदार्थोऽत्र परमात्मैव नेतरे ८४ समस्तवैश्वानरचिंतनं तु यस्तेत मित्यादिगिरा प्रवक्ति। षण्णामृषी
१९ णां समुपागतानां वैश्वानरोपासनतत्त्ववेदी ८५ अथ स्तुतेजस्त्वगुणा द्युमूर्धा स्याद्विश्वरूपत्वगुणाऽर्कचक्षुः। प्राणस्तु नानागतियुक्त वायुः
स्याद्देहमध्यं बहुलत्ववत्त्वं ८६ वैश्वानराख्यस्य हि दक्षिणाग्निर्मनो निरुक्तः परमेश्वरस्य। वक्त्रं तु तस्याहवनीय उक्त इतीशरूपं परिचिंत
नीयं ८७ नियम्यभावेन समस्तजीवा अस्येति यद्धाम तयास्य जीवाः। इतिश्रुतो विश्वनरोऽयमुक्तो विश्वानरो वा सकलात्मकत्वात् ८९
नरे परे पूर्वपदस्य दैर्घ्याद्वैश्वानरः सार्थिकतद्धिताच्च।। वैश्वानरं तं भजते बुधो यः स सर्वलोकादिगभोगभाक्स्यात् ९० तद्यादिप्रदेशे
पुमीयते व्यज्यते यतः। विश्वमिमीते त्यपरोक्षरूपं जानाति यः सोऽभिविमान उक्तः। अप्याभिमुख्येन विमीयते ह ब्रह्मेति यः सोऽभिविमान
उक्तः ९१ भूराद्यलोकपदेरिताः स्युर्भूता निदेहास्तु रिहात्मशब्दात्। जीवाः स्युरन्नं भवतीह भोग्यमितीह लोकादिपदार्थ उक्तः ९२
तत्रैवं श्रूयते ह्याख्यायिका त्वेरिति बोधिका। प्राचीनशालोऽथ सत्ययज्ञेंद्रद्युम्नकावुभौ। जनो बुडिल इत्येवं पंचैते परमर्षयः ९३ श्रुताध्य
यनवृत्ताढ्या महाशाला निवासिनः।। अकुर्वन्को न आत्मा किं ब्रह्मेति तु विचारणां ९४ द्योरादित्यो वायुरिति यदस्माभिः पृथक्पृथक्।
वैश्वानराख्यं सर्वात्म ब्रह्म वै ध्यातमस्ति हि ९५ परस्परं हि संपृष्टे वेमसंदृश्यते त्विति। नन्वभ्येकेन रूपेण ध्यातव्यमिति संशयः ९६
समेतास्ततस्ते सर्वेऽनाजुवंतो विनिश्चयं। तादृशात्मोपदेष्टारमुद्दालकमुनिं हृदा ९७ संप्राप्यामासुरथाप्याजगमुस्तमुनिं सतु। १९
नाहं तन्निर्णयं वेद्मि दर्शयिष्यं हि तादृशं ९८ इत्यालोच्याब्रवीत्तान्वै केकेयोऽश्वपतिर्नृपः। तादृशोऽस्तीति तं सर्वे ब्रह्मामइति तं गताः ९९ ॥

दित्वं मोप्यपतिष्याच्छिरस्त्व १७ मूर्धत्वादे द्युलोकस्य ध्यानस्यास्तीह यत्फलं। नश्वरत्वं तस्य यत्तन्मूर्धपातो विवक्षितः १८ समस्तांगो
२० पेतवैश्वानरात्मध्यानजं फलं। पूर्वोत्तराघनाशादि तदसय्यमितीरितं १९ वास्तवो मूर्धपातादिर्यदीष्टः स्यात्तदा खलु। पृथग्ध्यानवतां ने
षां स पश्चात्पूर्वमेव वै। मूर्धाद्यभावात्संप्रश्नं कृतवंतः कथं नृपं २० एवमेवोत्तरो ग्रंथो व्याख्येयो वै विचक्षणैः। तस्माद्वैश्वानरव्यस्तध्यान
निरासमुखेन तु। समस्तध्यानकरणे तात्पर्यमवगम्यते २१ एवमेवोत्तरग्रंथे पप्रच्छाश्वपतिर्नृपः। द्यौ१ रादित्यो२ वायु३ रप्स४ मापः५
पृथ्वी६ ति तु क्रमात् २२ ध्येया यायेश्चतास्तेषु सुतेजस्त्वगुणादिकां। मूर्धत्वाद्यंगतामुक्त्वा व्यस्तध्यानं निनिंद वै २३ मूर्धपातस्तथां
धत्वं प्राणानामुत्क्रमस्तथा। शरीरशीर्णता वस्तिभेदश्चरणशोषणं २४ पृथक्पृथक्ध्यानयोग इति दोषाः प्रदर्शिताः। न तु उक्तद्यु
लोकादेरुक्ता वैश्वानरांगता २५ ततः समस्तावयवोपेतस्य परमात्मनः। वैश्वानरस्य सर्वात्मभूतस्योपास्तिमुक्तवान् २६ ~~[illegible]~~
~~[illegible] वैश्वानर~~ स्मर्यमाणमनुमानं स्यादिति २ किंच। परमात्मपरत्वे त्र वैश्वानरपदस्य वै। स्मृत्या प्रोक्तं द्युमूर्धादिस्वरूपमनु
मापकं २७ भवतीति स्मृतेरस्या मूलभूत श्रुता विह। द्युमूर्धकादिमद्रूपेणप्रयुक्तं परमात्मगं। वैश्वानरपदं बोध्यं नाग्निजीवपरं हितत् २८
यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः। सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः २९ इती ईदृग्रूपं श्रुतिगं प्राह भीष्मस्तवस्मृ
तिः ३० शब्दादिभ्योऽन्तः प्रतिष्ठानाच्चेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ३ द्युपृथिव्यंतरिक्षेषु व्याप्त्युक्ते २०
र्नानुरूपता। द्युपृथिव्यादिसंबंधो मंत्रादश्चेः प्रतीयते ३१ अग्नौ वैश्वानरपदं श्रुतं वाजसनेयके। ब्राह्मणेग्निरहस्याख्ये तथा त्राप्यस्तु तत्त

५ उक्तेभ्य एव हेतुभ्यो न भूताग्निर्न देवता। वैश्वानरस्तयोरेकदेशित्वान्नाखिलात्मता ३९

था ३२ सूत्रार्थस्तु। वैश्वानरपदं नेष्टपरं किंतु दराग्निगं। रूढत्वाद्वह्निपरो हि वैश्वानरशब्दादि हि श्रुतात् ३३ शारीरत्वय्यवत्वेनाप्यग्नित्व
य निरूपणात्। प्राणाहुत्याधारतोक्तेरपि वैश्वानरस्य हि। पुरुषेऽन्तःप्रतिष्ठानश्रवणाच्चेति चेन्नतत् ३४ जाठराग्निस्वरूपस्योर्दर्श
नो वाजगत्पतेः। द्युमूर्धादिस्वरूपेणोपास्तेरत्रोपदेशतः ३५ वैश्वानरे जाठरे तु द्युमूर्धत्वाद्यसंभवात्। वैश्वानरो जाठरो नोपास्यः किंतु
ते महेश्वरः ३६ किंच। एनं वैश्वानरं पूर्णं पुरुषाकारमप्यथ। अधीयते स्वशाखायां विप्रा वाजसनेयिनः। नैतत्सर्वं जाठरेऽग्नौ परिच्छिन्ने हि यु
ज्यते ३७ अतएव न देवता भूतं च ४ उक्तं चान्यत्राप्यभियुक्तैः। द्युमूर्धता हि सकलोदाहः समस्तलोकाश्रयभोगभाक्त्वं। आत्मादि ५
शब्दश्च न युज्यते त्रसतो न वैश्वानरता तयोः स्यादिति ३८ साक्षादप्यविरोधं जैमिनिः ५ जाठराग्नेर्विनाप्यत्र प्रतीकोपाधिकल्पनां। सा
क्षादपि महेशस्योपासनायाः परिग्रहे। विरोधाभावमाचार्यो मन्यते खलु जैमिनिः ४० पूर्वापरालोचनयोपासना परमात्मनः। उच्यते त्रे
ति निष्कर्षजाते सति तु तत्र हि ४१ छांदोग्यवाजसनेयशाखयोर्यैश्रुतेऽतु ने। अग्निवैश्वानरपदे योगशक्त्येशबोधके। भविष्यतस्तीहि परेऽभिप्रायो
हि जैमिनेः ४२ तदुक्तमभियुक्तैः। क्रियाफलं प्रापयतीति वाग्निर्गत्यर्थकः स्यादगिधातुरेषः। अग्नित्वमस्यैवमहेश्वरस्य स्यादग्रणीत्वादुपप
न्नमत्र ४३ उपासकस्यातिथिभोजनात्प्राग्यथोक्तविद्यांगतया विधिः स्यात्। प्राणाग्निहोत्रस्य तदर्थमग्नित्वेत्तादिकं कल्पितमीश्वरस्य।
४४ अभिव्यक्तेरित्याश्मरथ्यः ६ वैश्वानराख्यपरमात्मनोऽपरिमितस्य चाउक्तं प्रादेशमात्रत्वमभिव्यक्तिनिमित्तकं। इत्याश्मरथ्य
आचार्यो मन्यते स्मिन्नुपासने ४५ तदुक्तमभियुक्तैः। उपासनास्थानहृदादिकेषु हरेः प्रतीतेः क्वचिदाश्मरथ्यः। युक्तं भवेद्रूक्तकृपाक

स्य प्रादेशमात्रत्वमिति प्रभाषे। इति ४६ अनुस्मृतेर्बादरिः ७ इती खल्वनुवर्तते। उक्तं प्रादेशमात्रत्वमनुस्मृतिनिमित्तकं। इति बादरिराचा
२१ र्योमन्यतेस्मिन्नुपासने ४७ प्रादेशमात्रे हृदये तद्धृदा ध्येय इतीश्वरः। प्रादेशमात्र एवेहानुस्मर्तव्यो न चाधिकः। नापि प्रादेशतोन्यूनो ध्येय
इत्याह बादरिः ४८ संपत्तेरिति जैमिनिस्तथाहि दर्शयति ८ मूर्धादिचुबुकान्तेऽगे ध्यातुः प्रादेशमात्रके। ध्यानात्प्रादेशमात्रत्वमर्थोत्तं
पद्यते विभोः ४९ इत्याह जैमिन्याचार्यो दृष्ट्वा श्रुत्यंतरं तथा। यथा जैमिनिना प्रोक्तं तथा दर्शयति श्रुतिः ५० तदुक्तमभियुक्तैः। द्युलोक
मुख्यावयवान्शिवस्य संपादयन्स्वरूपमस्तकादौ। प्रादेशमात्रात्मकतां विभोश्च श्रुतेर्हरे वाजसनेयिवाक्यं ५१ निष्ठत्वती स्वेति भवेदिति
प्राचोरीशमूर्धा मम मस्तकः स्यात्। ध्यातास्त्मूर्धश्वरमूर्धदृष्टिः कार्येत्युवाचाश्वपतिर्मुनिस्तान् ५२ एवं स्वकीयावयवेत रंगं विचिंतनीयं
तदुपासकेन। सूर्यः सुतेजाः परमेश चक्षुस्तत्स्वीयनेत्रे परिचिंतनीयं ५३ प्राणोस्य नासेमुखसंस्थितं रंकं श्रीदिवसंदेहं न भाविभाव्यं। मुख
स्थलालापरमेशवस्तिस्थितोदकं स्याच्चुबुकं तु भूमिः ५४ दिवस्त्वतिष्ठात्वगुणं वदंति रवेः सुतेजस्त्वगुणं तथान्ये। तथापि शाखांतरधर्म
योगाद्वैश्वानरोपासनमेकमेव ५५ न चाल्पवैषम्यवशेन भिन्नं शाखाभिदावास्तु गुणं पूज्यवस्त्वा। प्रादेशमात्रश्रुतितोल्पसत्वाच्छागाविभे
देपि न भिद्यते तत् ५६ आमनंति चैनमस्मिन् १९ प्रादेशपरिमाणोसि मूर्धचुबुकांगयोः। अंतराले वदत्येनं जाबालाः परमेश्वरं।
अतोपि युक्तं प्रादेशमात्रत्वं परमात्मनः। ५७ तदुक्तमभियुक्तैः। मूर्धादिकं यच्चुबुकान्तमुक्तं तदंतराले कथयंति चैनं। अतोपि सर्वेशपरि
ग्रहेपि प्रादेशमात्रश्रुतिरक्षता स्यात् ५८ योनंत आत्मा खलु दुर्विभाव्यः कथं विजानेत महत्महेशं। इत्यत्रिपृष्टः प्रजगौ मुनींद्रः परेश्वरस्ति २१
ष्ठति सोऽविमुक्ते ५९ कामादिदोषौघनिबद्धजीवभेदप्रकल्प्यस्य यमात्मनीति। जीवस्थलं प्राह स याज्ञवल्क्यो नासाभ्रुवोर्मध्यगृहेति पृष्टः ६०

२ समागतोऽपि मुनीन्स्तान्विज्ञाय स तु भूमिपः। प्रागेव दर्शनात्कश्चानं बहिर्दत्वाभ्यपूजयत् ५०० अथ निद्रां स जन्प्रातर्दर्शनार्थं समागतः। विनयेन जगा
देदं गत्यतां भो धनं त्विति १ प्रत्याख्यातः स मुनिभिश्चिंतयामास मोपार्थिवः। मयि दोषधियानेमे गृह्णंतीति विशंकितः २ स्वस्य निर्दुष्टतां तेभ्यः
ख्यापयन्निदमब्रवीत्। न मे स्तेनो जनपदे न कदर्यो न मद्यपः ३ नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी न च। एवमुक्तेपि नाग्रहीत्सोराजाव्यचिं स्त
तयन् ४ मद्दत्तं स्वल्पमिति तेन गृह्णंतीति चिंतयन्। तेभ्यो बहुधनं देयमिति बुध्वाब्रवीन्मुनीन् ५ क्रतुभिर्यक्ष्यमाणोस्मि यद्दक्षिणाभ्यः पृथक्
पृथक्। दास्यामि तावद्युष्मभ्यमपि दास्ये पृथक्पृथक् ६ तावद्वंतस्तिष्ठंतु पश्यंतु मम चाध्वरं। इत्युक्तास्ते नृपं प्रोचुर्येनार्थेन यः प्रति
७ आगच्छति वदेत्सैव सतस्मैस्य प्रयोजनं। अतो नात्र वयं प्राप्ता धनस्य तु जिघृक्षया ८ किंतु वैश्वानरात्मानं त्वं तु जानासि संप्रति। तमेव
नो ब्रूहि राजन्नित्युक्तः प्राह तान्नृपः ९ प्रतिवक्तास्मि वः प्रातरित्युक्तास्ते द्विजास्तु षट्। श्वः पूर्वाह्णे समिद्धस्ता राजानं समुपागताः १०
यः सांगवेदाधीत्यर्थं गुरोरंतिकमिच्छति। तस्योपनयनं कृत्वा वेदमध्यापयेद्गुरुः ११ योन्यत्राधीतविद्यः सन्कांचिद्विद्यां समिच्छति। अ
कृत्वैवोपनयनं विद्यां तस्मै वदेदिति १२ तादृशोऽनुपनीयैव मुनीनेतन्नृपोऽब्रवीत्। प्राचीनशालं प्राहादावुपमन्योः सुतं नृपः १३ कं त्वं वैश्वा
नरात्मानमुपास्स्व इति सोऽब्रवीत्। द्युलोकमेव भगवो राजन्नित्युपमन्युजः १४ इत्युक्तवंतं प्राचीनशालं प्रत्याह भूपतिः। यं त्वं वैश्वानरा
त्मैकदेशं वैश्वानरस्त्विति। ध्यायस्यथापि मूर्धैष सुतेजस्त्वगुणः प्रभोः १५ एकदेशं ध्यायतोपि प्रोक्तमस्ति फलं श्रुतौ। तथापि सर्वांगोप
तध्यानाभावाद्विवस्थितः। नैवास्य तु नराहस्ति मार्गेनैवाधियोर्हति १६ सम्यक्कृतं त्वया सौम्य यस्मात्त्वं मामुपागतः। नागमिष्योप

नानुमानमतच्छब्दात् ३ द्युभ्वाद्यायतनंनात्र प्रधानंसांख्यकल्पितं। प्रधानबोधकस्यात्र शब्दस्याभावतःश्रुतौ ७५ सर्वज्ञइत्यादिशब्दाःप्रस्तुतेन
२२ हिराधिनः। अस्मिन्प्रकरणेसंती सत्त्र ब्रह्मैवसम्मतं ७६ ~~न सर्वज्ञ सर्वविद्धस्य~~ प्राणभृच्च। ४ विराड्ढिरण्यगर्भोवा अथवेंद्रियदेवताः।
यस्तेषुप्यलमोजीवः सोपिद्युभ्वाश्रयोत्रना। तद्साधारणस्यात्र शब्दस्याभावतःखलु ७७ भेदव्यपदेशात् ५ तमेवैकंजानथेतिज्ञातृज्ञेयत
योभयोः। जीवद्युभ्वाद्याश्रययोर्भेदोक्तेश्चासुभृन्नतत् ७८ प्रकरणाच्च ६ कस्मिन्नुभगवो ज्ञातेज्ञातंसर्वमिदंभवेत्। इत्याद्यमुंडकेज्ञेयब्र
ह्मोपक्रमदर्शनात् ७९ द्युभ्वाद्यायतनस्यात्र ज्ञेयस्यकथनादिदं। ब्रह्मप्रकरणंतस्मादपिद्युभ्वाश्रयंबृहत् ८० स्थित्यदनाभ्यां च ७
आभ्यांस्थित्यदनाभ्यां चद्युभ्वाद्यायतनंतुयत्। उपक्रांतंपूर्वमिहतद्ब्रह्मैवासुभृन्नतत् ८१ तथाहि। अत्र द्युभ्वाद्यायतनंप्रकृत्यश्रूयतेश्रु घा
तिः। द्वासुपर्णेतिलत्रोक्तोक्षेत्रज्ञपरमेश्वरो। ओदासीन्यस्थितिस्तोपार्जितस्वादनोक्तिः ८२ निर्दिश्येतेस्थित्यदनेयत्रसर्वेशजीव
योः। तेतुस्थित्यदनेपूर्वद्युभ्वाद्यायतनंतुयत्। उक्तंतस्यब्रह्मतायांसार्थकेस्तोनचान्यथा ८३ यदाद्युभ्वाद्यायतनंवेत्तिसात्मतयाहृदातदा
विशोकोभवतिक्षेत्रज्ञोब्रह्मतांगतः ८४ इतिवक्तुंप्रहृत्तेयंद्वासुपर्णेतिवैश्रुतिः। वक्तव्यनश्चस्थित्यदनेशोकहारककारके ८५ नचेदेवमिहाक
स्मात्तदुक्त्योःकिंप्रयोजनं। अस्याएवाशयस्यस्पष्टश्रुतिर्वक्त्यत्रदग्रिमा। समानेवृक्षेपुरुषइत्यादिपदसंयुता ८६ किंच। द्युभ्वाद्यायतनंब्र
ह्मसात्मेत्यविदितंवतः। तद्ब्रह्माहमितिज्ञातुमात्मशब्दः प्रयुज्यते ८७ द्युभ्वाद्यायतनंजीवोयदि चात्रविवक्षितः। तदाजानथआत्मान
मितीहात्मपदंहियत् ८८ तद्व्यर्थंभवतिद्युभ्वाद्याश्रयोक्त्यैवतद्विधः। जीवोविज्ञातएवेतिनात्मशब्दोर्थसार्थकः ८९ द्युभ्वाद्याय त्र
तनतस्यब्रह्मगतस्यसार्थकः। आत्मशब्दोत्यहंब्रह्मेत्यपूर्वज्ञानसाधकः ९० तदुक्तमभियुक्तैः। स्वभाववाच्यत्रनचात्मशब्दस्त

द्वस्तुकीर्त्यैवचतत्स्वभावे। सिद्धेप्रयोगोस्यनिरर्थकःस्यात्तस्मात्परेशःसकलाश्रयोत्र ९१ नचात्रविश्वायतनत्वकीर्त्यानानात्वसत्त्वंपरिशंक
नीयं। अत्रैवकारैकपदद्वयेनविज्ञेयमेतत्खलुनिर्विशेषं ९२ यथैवपिंडोलवणस्य चांतर्बहिर्विजातीयरसेनशून्यः। सर्वोभवेदेकरसस्तथाऽ
त्मा चिदेकरूपोभवतीतिवेदः ९३ सर्वंब्रह्मेतिबाधायांसामानाधिकरण्यगीः। सर्वोद्वैतेनात्मनोत्रविधानेसर्वबाधनं ९४ अदृश्य
ताद्युक्तनयेनसिद्धं द्युभ्वादिवाग्ब्रह्मपरत्वमेतत्। तद्वाक्यमध्येपठनात्तथापितत्स्यप्रपंचार्थमयंनयःस्यात् ९५ तद्भूतयानःपरमात्मभा
वःस्फुटीकृतःसेतुपदार्थकीर्त्या ९६ स्यात्सारवत्तेनगुणेनसेतुर्विधारकत्वेनभवेत्तथात्मा। तस्मादिदंब्रह्मणितत्कितोवाप्रवर्ततेसेतु
परंगुणेन ९७ उक्तमेवार्थदृष्टांतमुखेनस्फुटीकरोति। सेतुर्जलंधारयतीतियद्वद्ब्रह्माखिलंचतथैवधत्ते। यद्वात्मबोधोभवतीह
सेतुर्विजानथेत्येवमुपस्थितत्वात् ९८ अधिकरणार्थमुपसंहरति। द्युभ्वाद्यधिष्ठानमतःपरंयत्तद्ब्रह्मविज्ञेयमिहेतिसिद्धं। इति ९९
इतिश्री॰सुप्रथमाध्यायेतृतीयपादेब्रह्मलिंगकवाक्यसमन्वयाख्यतृतीयपादे द्युभ्वादिवाक्यस्यज्ञेयनिर्विशेषब्रह्मसमर्थनपरं समाप्तंद्युभ्वा
द्यधिकरणंप्रथमं १ भूमासंप्रसादादध्युपदेशात् १ छांदोग्यसप्तमाध्याये भूमविद्योदिताऽखिले। सनत्कुमारस्ताविद्यां नारदायो
पदिष्टवान् १०० षड्विंशतिरिहाध्यायेसंतिखंडाअतिमत्रहि। आद्येखंडेनारदर्षिर्ब्रह्मविद्यांसुखावहां। सनत्कुमारंब्रह्मिष्ठंशिष्य
भावेनपृष्टवान् १ यद्वेदसर्वंहितस्यसर्वंपश्चाद्वदस्वामितिद्दितं। इत्युक्तोनारदःप्राह ब्रह्मविद्यांविनाऽखिलं। वेद्यिवेदादिकंतेनसंत्र
वेत्तास्मिनात्मवित् २ श्रुतंमयाहशिष्योस्तिशोकंतरतिहात्मवित्। इतिशोचामिसोहंमातारयेत्याहनारदः ३ सनत्कुमारःप्रोवाचयज्ज्ञातश

हृतस्तया।वाचारंभणमेवैतच्छब्द्वाच्यतयेरितं ४ शब्दमूर्तौकेब्रह्मेतियउपास्तेसवैपुमान्।शब्दवाच्यंयावदस्तितावदेतस्याखिलंजगत् ५ इत्युक्तो
२२ नारदस्तेनपुनःपप्रच्छतंमुनिं।सर्ववेदकवेदाख्यब्रह्मशब्दाच्छ्रेष्ठतरंहिकिं ६ इत्थमस्तीत्येवमुक्तःप्राहवागिन्द्रियंत्विति।वागभिव्यक्तशब्देनसर्वं
विज्ञायतेत्विति ७ वाचोधिकतरंपृष्टःप्राहश्रेष्ठंमनस्त्विति।मुष्टिर्व्याप्नोत्यामलकेयथावाबदरीफले।यथाबेभीतकफलेलथावाङ्नामनीमनः
८ संकल्प४चित्त५ध्यानान्यानि६विज्ञानं७चततोबलं८।अन्नं९मापः१०स्ततस्तेजः११आकाशं१२स्मरणं१३ततः ९ ततआशा१४ततःप्राणः१५
श्रेष्ठमाहोत्तरोत्तरं।प्राणचेष्टाधीनचेष्टाआशान्ताअखिलाइति।सर्वक्रियाकारकादिप्राणांतर्भूतमेवहि १० अतोयःप्राणसंक्लेशकारीदु
ष्टःसउच्यते।प्राणहीनशवादेर्यद्दाहकोदोषभाक्तुन ११ अतोदाता गृहीत्रादिः सर्वोपिप्राणएवहि।अतःप्राणोत्कर्षवादीयातिवादीसउ
च्यते १२ श्रेष्ठ्यस्यास्यत।ताप्राणश्रेष्ठ्यवादावधिर्यतः।अतस्तथावादिनंतेचेद्ब्रूयुरतिवाद्यसि।इत्युक्तोप्यतिवाद्यस्मीत्यंगीकुर्याद्संशयः १३
एवंसनत्कुमारेणसंप्रोक्तोनारदोमुनिः।मत्वाश्रेष्ठंप्राणमतोन्यश्रेष्ठंनैवपृष्टवान् १४ सनत्कुमारोभगवान्ज्ञातवान्नारदाशयं।विकारि
ष्वधिकःप्रोक्तोमयाप्राणस्तथाप्यमुं।विकारिणंप्राणमवुद्ध्वात्मानंज्ञानवानिति १५ माभूद्बोधस्ताहृशोस्यनारदस्येतिवांछया।प्राण
श्रेष्ठ्यश्रेष्ठ्यवादपर्याप्तिंविगमय्यतां।सत्याख्यब्रह्मणःश्रेष्ठ्यएषत्वित्यादिनोक्तवान् १६ सत्यश्रेष्ठ्यश्रेष्ठ्यवादपर्याप्तिंनारदोगुरोः।श्रु
त्वासत्येनातिवदिष्यामीत्याहनिजंगुरुं १७ उवाचतंगुरुःसत्यं ज्ञात्वैवातिवदेत्सथ।ज्ञातुमिच्छामितत्सत्यंत्वत्तइत्याहनारदः १८ ज्ञाना २२
यसत्यस्योत्पाद्यश्रवणप्रश्नमात्मनः।श्रोतव्यब्रह्मणोनित्यनिःसीमसुखरूपता १९ बुबोधयिषुराचार्यःश्रवणसाधनक्रमं।वदन्क्रमान्नियस्य

ते वरणानास्यो।

सर्वेंद्रियोत्थपापनिवारकत्वाद्भ्रुघ्राणरूपावरणामतास्यात्।दोषांश्चनाशयती।तिनासीत्येवंजगौतेपरिपृच्छतेस्मै ६१ जीवाश्र यद्वारतईश्वरस्यस्थानंहि
नासीवरणाचतस्मात्।प्रोक्तंभवेद्दोषविनाशकत्वंनास्याघ्रुवोरित्यवधार्यमत्र ६२ विशेषजिज्ञासु मुनेश्चतत्रसंधिस्तयोःस्थानमितिस्मवक्ति।संधिस्त
योरेषविचिंतनीयःसंधिर्द्युलोकस्यपरस्यचेति ६३ तद्वैश्वानरवाक्यंश्रीमद्दशोपास्तितत्परं।नजाठरादिकार्थंहिवैश्वानरपदादिकमिति ६४ इतिश्री॰
सुधांदोग्यगतवैश्वानरोपास्तिगतवैश्वानरपदस्यपरमात्मपरत्वसाधकंनवस्रत्वंवैश्वानराधिकरणंसप्तमं ७ इतिश्री॰सुसमन्वयाध्यायेअस्प
ष्टब्रह्मलिंगकवाक्यनाममहात्रिंशत्स्त्रात्मकःसप्ताधिकरणोद्वितीयःपादः २ तृतीयेतुज्ञेयमात्रपरवाक्यसमन्वयः।प्रायेणकथ्यतेपादेते
नतन्नामकस्त्वसः ६५ द्युभ्वाद्यायतनंस्वशब्दात् १ यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः।तमेवैकंजानथआत्मानमन्यावाचो
विमुंचथामृतस्यैषसेतुः। इत्याथर्वणगेतुयमुंडकेपठ्यतेद्युभ्वाद्याधारस्तत्प्रत्यग्ब्रह्मैवनेतरत् ६६ जिज्ञासुनासएवैकःस्वात्मज्ञे
यइतीरणात्।स्वशब्दापरपर्यायादात्मशब्दादिहश्रुतात् ६७ तदुक्तमभियुक्तैः।यस्मिन्विराडिंद्रियदेवसृत्रमव्याकृतंकल्पितमप्रमेये।तमेवजा
नीथविसृज्यसर्वंसर्वाश्रियंप्रत्यगभिन्नमेकं ६८ विमुंचथानात्मवचांसिवाणीविमोकपूर्वात्मकबोधएषः।संसारसिंधोःपरपारमुक्तेःसंपाद
कःस्यादितिवक्तिवेदः ६९ यःसमस्ताश्रयःसेतुरमृतत्वस्यधारणात्।तानंवायस्यसेतुःस्यान्मुक्तिदःसोस्यहंहरिः ७० पूर्वपक्ष्याशयंप्रा
ह।द्युभ्वंतरिक्षग्रहणाद्विराट्स्याद्धिरण्यगर्भस्तुमनःप्रदोक्तः।प्राणास्तदधिष्ठानसुराभवेयुरव्याकृतंवक्तिचकारएषः।इति ७१ मुक्तोपसृप्य
व्यपदेशात् २ किंच।निवृत्ताविद्यकैर्मुक्तैःप्राप्यब्रह्मणएवहि।निरूपितत्वाद्द्युसेवद्युभ्वाद्यायतनंत्विह ७२ भिद्यतेहृदयग्रंथिरित्युक्तंतु
र्मुंडके।तथाविद्वान्नामरूपाद्विमुक्तइतिपंचमे ७३ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः।क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे ७४

स्वमभूमसुखाप्यत्वथ २० विज्ञातुमिच्छामिसुखमितिसंप्रार्थितोमुनिः।योवैभूमातत्सुखंहिनाल्पेस्तिसुखमित्ययं २१ भूमैव
सुखमित्येषविचार्यःसुखमिच्छता।विचाराज्जायतेज्ञानंभूम्नइत्याहनारदं २२ भूमसाक्षात्कारएवप्राप्तिर्नित्यसुखस्यहि।कंठ
स्थविस्मृतमणेःस्मृतिराप्तिर्यथानथा २३ जिज्ञासुनानिजंरूपंनित्यंभूमसुखात्मकं।यदज्ञाततन्मतिर्यासातत्प्राप्तिरुच्यते २४
इत्युक्तोनारदःप्राहभूमरूपंवदेतितं।तज्ज्ञातृज्ञेयभावेनहीनमित्याहनारदं २५ सनत्कुमारोभगवान्यत्रनान्यदितीरयन् २५ कस्मिंस्थि
तःसभूमेतिसंपृष्टःप्राहनारदं।निजैश्वर्येस्थितोभूमाव्यवहारदृशासदा २६ वस्तुतःपृच्छसियदितर्हिनोमहिमन्यपि।लोकेगोश्वादिसं
भोग्यंमहिमेतिवदंतिवै २७ लोकोन्यस्मिन्वास्तवेच्चास्तिष्ठतीतिब्रवीतिह।नाहमेवंमूर्खवत्त्वांब्रवीमीत्याहनारदं २८ किंतर्हिवक्ष्यमाण
नप्रकारेणवदामियत्।तच्छृणुत्वत्याशयेनाहा पृष्टोपिदयानिधिः २९ तथाहि।आधाराधेयपूर्वादिदिग्गादिकमिदंजगत्।भूमैवनि
लयस्मात्तस्मादन्यन्नवास्तवं ३० अहंकारालंबनस्यइष्टुर्भूमैक्यसिद्धये।अहंशब्देनभूमैवादिश्यतेब्रह्मजानता। ३१ [illegible]
विलक्षणभूमैवात्मपदेनसः।आदिश्यतेशरीरादिव्यावृत्त्यैब्रह्मजानता ३२ आत्मैवेदंसर्वमितियःपश्यतिविचारवान्।सवाएषभव
त्यात्मरतिमित्यनुश्रुतितः।आत्मक्रीडात्ममिथुनआत्मानंदश्चसर्वदा ३३ सएवंलक्षणोविद्वाञ्जीवन्नेवस्वराडपि।प्रारब्धांतेदेहपाते
स्वराडेवभवत्ययं ३४ अन्यानधीनज्ञानोयोलोकदृष्ट्याखिलाश्रयः।स्वतःसिद्धज्ञानरूपःसस्वराट्सर्वशक्तिमान् ३५ तस्यसर्वेषुलो
केषुकामचारोभवत्यथ।येन्यथातोविदुस्तेन्याधीनाक्षय्यफलाउत।तेषांसर्वेषुलोकेषुकामचारोनविद्यते ३६ तस्यैवंविदुषःसर्वस्वस्मादेवस

जायते।इतिनिष्कर्षसत्त्वेननिर्दुःखत्वेनतिष्ठति ३७ सम्राक्स्त्वहेरेकथंवैवब्रह्मभावेनतिष्ठति।स्रष्टावनेकोऽभवतिसृष्ट्यतेऽथैकएवतु ३८
२४ सर्वज्ञब्रह्मरूपेणनिर्धर्मब्रह्मरूपतः।लोकदृष्ट्याविहरतिस्वयंनिधर्मकोपिसन् ३९ इत्यात्मविद्यामहात्म्यमुक्त्वालोकोत्तरंमुनिः।
ब्रह्मविद्यासाधनेषुसारंप्राहसुरर्षये ४० घ्राणाद्यभिष्टिविषयज्ञानमाहारउच्यते।तस्यशुद्धिरसंसृष्टिःकामक्रोधमदादिभिः ४१
आहारशुद्धौमनसोनैर्मल्यंजायतेततः।उक्तरीत्याश्रुतेर्भूमब्रह्मणिस्याद्ध्रुवास्मृतिः।निदिध्यासनसंपत्तौभिद्यंतेब्रह्मयोखिलाः ४२
इतिकामादिदोषाख्याःकषायायेनमर्दिताः।तस्मैयोग्यायशिष्यायनारदायमुमुक्षवे ४३ सनत्कुमारोभगवानज्ञानतमसःपरं।पारद
र्शयितिस्मेतिश्रुतिराहहितैषिणी ४४ उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं।वेत्तिविद्यामविद्यांचसवाच्योभगवानिति ६४५ अ
थभूमाधिकरणार्थस्तु।भूमासंप्रसादादध्युपदेशात् १ छांदोग्यभूमविद्यायांसर्वोत्कृष्टतयेरितात्।संप्रसादाभिधप्राणादूर्ध्वंस
त्यस्यवस्तुतः ४६ भूमाभिधब्रह्मणोत्रसर्वश्रेष्ठतयेरणात्।भूमासपरमात्मैवयोत्रज्ञेयतयेरितः ४७ प्राणोभूमतयानैवात्रोपा
स्योऽप्रकृतत्वतः।शोकंतरत्यात्मविदित्येतस्यात्मोपक्रमेश्रुतः ४८ धर्मोपपत्तेश्च २ किंच।भूम्निश्रुतानांधर्माणांब्रह्मण्येवोपपत्ति
तः।भूमात्रपरमात्मैवनप्राणोऽनुपपत्तितः ४९ भूम्निसर्वव्यवहृतिशून्यत्वंसुखरूपता।अमृतत्वादियत्प्रोक्तंतद्ब्रह्मण्येवयुज्यते ६५०
इतिश्री०सुछांदोग्यसप्तमाध्यायांतोक्तभूमविद्यास्थभूमशब्दार्थस्यपरमात्मत्वसाधकंहिसूत्रंभूमाधिकरणंद्वितीयं २ अक्ष २४
रमंबरांतधृतेः १ बृहदारण्यकगततृयाध्यायगाष्टमे।ब्राह्मणेश्रूयतेयाज्ञवल्क्यगार्ग्योर्मिथोवचः ५१ तथाहि।जनकस्यसभा

यंवैयाज्ञवल्क्यजिगीषया। विवादेयाज्ञवल्क्येनसंप्रवृत्तेद्विजन्मनां ५२ ब्रह्मवित्सन्ब्रह्मवादीयःसब्रह्मोघउच्यते। तादृशंयाज्ञवल्क्यंसागार्ग्याहब्रह्म
वादिनी ५३ गार्ग्युवाचक्नवीसभ्यविप्राननुज्ञांप्रगृह्यसा। संबोध्ययाज्ञवल्क्यंतिवक्तुंसमुपचक्रमे ५४ यथाकाश्योनृपःकश्चिद्वैदेहोवोग्रजोन्वयः। वि
ज्यंधनुरधिज्यंतुकृत्वाहस्तेशरावुभौ ५५ बाणवंतौसपत्नानांदुःखदौसंप्रगृह्यच। कर्तुंदिग्विजयंयातेतथाहंत्वमुपागता ५६ प्रश्नाभ्यांवक्ष्यमाण
भ्यांतौमेब्रूहीतिसाब्रवीत्। लौह्याशल्यकयायुक्तःशरएषबाणउच्यते ५७ कस्मिन्नोतंप्रोतमिदंजगदित्याहतंमुनिं। अव्याकृताख्यआकाश इतितांमु
निरब्रवीत् ५८ याज्ञवल्क्यनमस्तेस्तुयोभवान्सम्यगुक्तवान्। इत्युक्त्वाहद्वितीयंमेप्रश्नंसमवधारय ५९ इतिपृष्टस्तुतज्ज्ञात्वागार्ग्याःपृष्टवतीमुनिं। आ
काशओतःप्रोतश्चकस्मिन्नित्यथसोब्रवीत् ६० गार्ग्येतदक्षरंविप्राःसर्वधर्मनिराकृतं। वदंत्यध्यक्षयाशास्त्यानिखिलस्यनियंतृच ६१ यस्याज्ञा
यांस्थितिष्ठंतिसूर्यचंद्रादयःसदा। दातृंस्तुशंसंतिजनायजमानंहिदेवताः ६२ दर्वीहोमादिकर्तारंपितरोनुगताःसदा। यत्रयेधिकृतास्तेतुतत्रतिष्ठं
त्यनुव्रताः ६३ अविदित्वाक्षरंगार्गिजुहोतिकुरुतेतपः। बहुवर्षाणितत्सर्वमंतवन्नैवशाश्वतं ६४ गार्ग्येतदक्षरंज्ञात्वालोकादस्मात्प्रयातियः। स
ब्राह्मणोब्रह्मवित्सन्कृतार्थोनैवसंशयी ६५ गार्ग्येतदक्षरंचक्षुःश्रोत्रादिकरणैर्विना। सर्वेंद्रियाणांव्यापारंकरोतिनिजमायया ६६ गार्ग्येतदक्ष
रादन्योद्रष्टादिर्नास्तिकश्चन। एतस्मिन्नक्षरेगार्गिखल्वेवापराक्षके ६७ आकाशओतःप्रोतश्चेत्येवंश्रुत्वाब्रवीन्मुनीन्। गार्गीवाचक्नवीसभ्याःश्रु
णुतेतिमयेरितं ६८ याज्ञवल्क्यंनमःस्कृत्यमुक्ताःस्यामेतियद्हृदि। तदेवबहुमन्यध्वंनास्यजेतास्तिकश्चन। इतिवाचक्नवीगार्ग्यस्तातुक्त्वोपर
रामह ६९ सूत्रार्थस्तु। अक्षरमंबरांतधृतेः १ भूम्याद्यव्याकृतांताकाशपर्यंताधारत्वाच्छ्रुतेः। इहाक्षरंपरंब्रह्मनवर्णःप्रणवात्मकः॥१०॥ साचप्रशासनात् २

नन्वत्राकाशशब्देन भूताकाशो विवक्षितः। तदंतधारणस्यात्र प्रधानेप्युपपत्तितः ७१ प्रधानमक्षरपदबोध्यमस्त्विति चेदिह। तथापि साऽपि
२५ स्वांतस्य धृतिर्ब्रह्मण एव हि। युक्तात्र न प्रधानस्य प्रशासननिरूपणात् ७२ यात्याद्यौन्यैरतुल्लंघ्या सा प्रशासनमुच्यते। प्रशासनं चेतने
प्राधर्मो नैव प्रधानगः। अतोत्राक्षरशब्देन परमात्मा विवक्षितः ७३ अन्यभावव्यावृत्तेश्च ३ ब्रह्मान्यधर्माऽदृष्टत्वादिकव्यावृत्तिमद्गुणाः।
ये दृष्टत्वमुखास्तेषामप्यत्र कथनादपि। अक्षरं परमात्मैव न प्रधानमचेतनं ७४ अत्रैव वर्णकांतरं। ब्रह्मान्यद्रष्टृश्रोतृभेदस्य प्रतिषेध
तः। अक्षरं परमात्मैव न जीवोक्षरमत्र हि ७५ इति श्री० सुगार्गीब्राह्मणस्थाक्षरपदस्य परमात्मपरत्वसाधकं त्रिसूत्रमक्षराधिकरणं तृ
तीयं ३ ईक्षतिकर्मव्यपदेशात्सः १ प्रश्नोपनिषदः प्रश्ने पंचमे क्रमसूक्तये। परब्रह्म ध्येयमुक्तं प्रतीकेन वाभिधे ७६ तथाहि। योम
नुष्येषु भगवन्नोंकारमरणावधि। अभिध्यायेत्स कतमं लोकं ध्यानादवाप्नुयात् ७७ इति पृष्टवते प्राह पिप्पलादो महामुनिः। शिष्यपृश्या
य शिष्याय सत्यकामाह्वयाय वै ७८ भोः सत्यकाम ओंकारः परं चापरमेव च। यद्ब्रह्म तत्स्वरूपोऽयं यथाध्यानस्तथैव सः। ७९ तस्मादेत
न प्रणवध्यानेनावाप्तिहेतुना। द्वयोरन्यतरद्ब्रह्म यथाध्यानमुपैति हि ८० तत्राक्षरं परं ब्रह्म साक्षी पुरुष उच्यते। प्राणाख्यमपरं ब्रह्म सू
त्रात्मेति पठ्यते। ८१ हिरण्यगर्भ इति वयज्जीवघन उच्यते। आदिजीव इति प्रोक्तं मूर्तिर्घन इतीर्यते। समस्तजीवसमष्टित्वात्तज्जीवघन उ २५
च्यते ८२ यत्सत्यलोकपालं च यत्सत्यमिति चेरितं। एवं बहुविधैः प्राद्वैरपरं ब्रह्म कथ्यते ८३ मांडूक्यसंज्ञकाथर्वशिरखाद्युपनिषत्स्वपि।
मात्राविभागास्तारस्य देवताछंद आद्यः ८४ पादा लोकास्तथा वेदा ध्यानं ध्येयं विक्षतयः। उक्तास्तान्वेत्ति यः स्यात्स सर्वमात्राविभागवित् ८५

ध्यात्वा समध्यातारस्य सर्वमात्राविभागवित्। उपासकस्तत्प्रसादादखंडब्रह्मविद्भवेत् ८६ प्रणवार्थानवरतध्यानात्सद्यो विमुच्यते ८७ सर्व
मात्रानभिज्ञोऽपि किंचिन्मात्राविभागवित् यः सोऽपि तारेणोंकारोपासायाः प्रभावतः। क्रममुक्त्या ब्रह्मलोकं प्राप्य प्राप्नोति परं पदं ८८ ब्रह्मोपास्ति
मकुर्वाणः प्रतीके प्रणवाभिधे। किंचिन्मात्राविभागेन तारं ध्यायति केवलं ८९ सोऽपि लोकांश्छुभान्याति तारोपास्तेः प्रभावतः। अतस्तारः परब्र-
ह्मविभूतिः सर्वकामधुक् ९० इति गूढाशयो विद्वान्पिप्पलादो महामुनिः। तारस्योपासनाः प्राह जन्महारककारिकाः ९१ एकमात्राविभाग-
ज्ञमुपास्ते प्रणवं यदि। ध्यानेन तेनैवैश्वर्यसंस्काराद्योऽमृतः पुमान् ९२ क्षिप्रं भूमौ समायाति तं मात्रा तेन भाविताः। ऋचो मनुष्यो तमतां प्रा-
पयंति ह्युपासकं ९३ स तत्र तपसा ब्रह्मचर्येण श्रद्धयापि च। संपन्नो ब्राह्मणो भूत्वानुभवत्यतुलां श्रियं ९४ यस्तु द्वितीयमात्राज्ञमुपास्ते प्रण-
वं यदि। सम्यक्स्वकाले मनसि स्वप्नावस्थां गतः पुमान् ९५ मृतो यजुर्भिः सोमस्य लोकमुन्नीयते दिवि। स सोमलोके ऐश्वर्यं भुक्त्वा थावर्तते पुनः
९६ यस्तु तृतीयमात्राया विभागेनान्वितः पुमान्। ओमित्येकाक्षरं त्वेतमोंकारं प्रणवाभिधं ९७ सूर्यांतर्यामि परमपुरुषात्मकमीश्वरं।
अभिध्यायेद्ब्रह्मचर्यतपःश्रद्धासमन्वितः। ९८ एतेनैव प्रतीकस्य ध्यानेन मरणं गतः। स ध्याता तेजसि रवौ क्रमाद्भवति संस्थितः ९९ नावर्त्त-
ते पुनस्तस्मात्सोमलोकादिवलब्धः। पुण्यपापैर्विनिर्मुक्तो यथा सर्पस्त्वचा तथा १०० स सामभिः सत्यलोकं नीयते सूर्यलोकतः। स एतस्मात्स-
र्वलोकश्रेष्ठाज्जीवघनात्परात् १ सत्यलोकाधस्तनाब्रह्मकेवल्ये समुपस्थिते। निर्विशेषं सर्वगतं परं पुरुषमीक्षते २ हिरण्यगर्भ एवात्र सर्वजीवस-
मष्टिमान्। समस्तजीवमूर्तित्वादेव जीवघनो मनः ५ लोकपक्षे जीवघनशब्दाल्लोको हि लक्ष्यते। यथाश्रुते जीवघनशब्दस्य तु न लक्षणा ५

अथवा। स एतस्माज्जीवघनात्कार्यब्रह्मण उत्तमात्। अप्युत्तमं सर्वगतं परं पुरुषमीक्षते २

अप्रतीकालंबनाख्यो न्यायः सूत्रकृतेरितः। यत्र सा सा श्रुतिर्नास्ति तत्र सार्थक इष्यते ६ प्रतीकालंबनस्यापि ब्रह्मलोकः श्रुतेर्बलात्। क्वचित्सौ कि
२६ यत्पंचाग्न्युपास्तौ हि यथा तथा। त्रिमात्रिकप्रतीकस्याप्युपास्तौ स श्रुतेर्बलात् ७ त्रिमात्रेणाक्षरेण तितृतीया श्रूयते त्रया। सा द्वितीयार्थिका ब्रह्म
तादैक्यस्य ह्युपक्रमात् ८ सूत्रार्थस्तु। ईक्षतिकर्मव्यपदेशात्सः १ त्रिमात्रोंकाररूपेण याभिध्येयत्वयेरितः। परो हि पुरुषः सोऽत्र परमात्मैव नेतरः।
तस्येक्षतेः कर्मतया वाक्यशेषे निरूपणात् ९ एतदेव विशदयितुमाह। वाक्यशेषस्तु वाक्येन समानविषयो यतः। अतो वाक्यार्थसंदेहनिवर्त
कतयेष्यते १० वाक्यशेषपरं ब्रह्म वीक्षाकर्मतयेरितं। समानविषयत्वेन वाक्ययोत्यंतदेव हि ११ अत्र युक्त्यंतरेणापि भाष्यकारोक्तया
दिशा। समानविषयत्वं हि स्याद्ध्यानेक्षणवाक्ययोः १२ यः परं पुरुषं ध्याता ब्रह्मलोकमुपागतः। स परं पुरुषं ध्यानेक्षत इत्येकवाक्यता।
उभयोर्वाक्ययोर्यत्तच्छब्दाभ्यामवगम्यते १३ ये अत्रान्तिमवाक्यस्थे परं पुरुषमित्युभे। यत्तदाभ्यां पूर्ववाक्यगतयोरुभयोस्तयोः १४
वाक्यैकत्वानुग्रहाद्धि प्रत्यभिज्ञा प्रजायते। तया ध्यानस्येक्षणस्य कर्मैक्यमवगम्यते १५ इति श्री० सु त्रिमात्रोंकारतादात्म्येन ध्येय
परपुरुषपदार्थस्येक्षतिकर्मत्वोपलक्षणेन लक्षितेन पापनिर्मोकहेतुना पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति श्रुत्या परमात्म
त्वेन निर्धारितपरमपुरुषपदार्थत्वेन च परमात्मपरत्वसाधकमेकसूत्रमीक्षतिकर्माधिकरणं चतुर्थं ४ दहर उत्तरेभ्यः १ सूक्ष्म
स्याकाशस्य ह्रस्वस्य हृत्स्थस्य परमात्मनः। छांदोग्यस्याष्टमाध्यायादावुपास्तिः समीरिता १६ अस्मिन्ब्रह्मपुरे देहे हृदब्जं दहरं हि य
त्। वेश्मभूतं प्रभोरस्मिन्दहराकाश आंतरः १७ अस्ति यत्रास्ति तस्मिन्वै सुसूक्ष्मे विमले शुभे। हृत्पुंडरीके दहर आकाशो योंतरीरितः। २६

विचार्यत्वेनविज्ञेयतया चात्रमुमुक्षुभिः १८ परमात्मैवसोत्रैतद्वाक्यशेषस्थहेतुतः। भूताकाशोथवाजीवोनैवसोनुपपत्तितः १९ उप
लब्धेरधिष्ठानंब्रह्मणोदेहइष्यते। विद्याधिकारिणोदेहस्तेनब्रह्मपुरंभवेत् २० तदेतदुक्तमभियुक्तैश्च। ब्रह्मैवयुक्तंदहरंनभोत्रतद्वाक्य
शेषास्थितहेतुवृंदात्। द्यावापृथिव्यादिसमाश्रयत्वव्योमोपमादिःखलुहेतुसंघः २१ तदल्पमत्रत्यमतीवचाल्पंकिमत्रखेतिष्ठतियद्वि
चार्यं। इतिस्मपृष्टोगुरुराहयावानित्यादिनाल्पत्वनिवृत्तिमस्य २२ यद्वाकाशश्चतस्मिन्यद्वतेनेतश्चतद्द्वयं। अन्वेष्टव्यमितिज्ञेयाविषय
श्रुतियोजना २३ निर्विशेषंविचार्यापिसाक्षात्कर्तुमनीश्वराः। येतेरूपास्यआकाशःस्वात्मानिर्दोषितामुखैः। लक्षणैरष्टभिःश्रेष्ठैरि
त्याहसघृणाश्रुतिः २४ आकाशएषसर्वेषांप्रत्यगात्माहिपाप्मभिः। पुण्यपापात्मकैर्नित्यमसंस्पृष्टोऽजरःसदा २५ विमृत्युश्च
विशोकश्चानशनेच्छुःपिपासया। रहितःसत्यकामश्चसत्यसंकल्पकःसदा २६ एषआत्मेतिदहराकाशस्यात्मत्वकीर्तनं। कृत्वाप
हतपाप्मताद्यष्टलक्षणवर्णनात् २७ ईशोपहतपाप्मत्वप्रमुखैर्लक्षणैःसह। स्वात्मत्वेनोपास्यइतिश्रुतितात्पर्यमुच्यते २८ आ
त्मानंतद्गतांश्चधर्मांश्चानुविद्यव्रजंतिये। तेषांसर्वेषुलोकेषुकामचारइतीरणात् २९ ईशोशैश्वर्ययोःस्वत्मतपात्रानुभवोक्षियः। सोनु
वेदमशब्दार्थइतिभाष्येनिरूपितं ३० तेनायमर्थःसंपन्नोभवत्यत्रश्रुतीक्षितः। वक्ष्यमाणेप्रतेनात्रब्रह्मचर्यादिसाधनैः ३१ एवंल
क्षणआकाशःस्वात्माचार्योपदेशितः। ध्यातव्योहृदयेस्वात्मत्वयास्वाराज्यमिच्छता ३२ षड्गुणैश्वर्यसंपन्नपरेशस्यगुणैःसह। स्वा

त्मलोपास्तिरादर्श्येन सत्यसंकल्पतामुखा: ३३ स्वस्मिन्नाविर्भवंतीशधर्माहीहैव जन्मनि। देहपातेपितेधर्मा नेवमुंचंत्युपासकं ३४ येत्वीशं
२७ तद्गुणांश्चात्मतयानानुभवंतिते। इहामुष्मिन्नस्वतंत्राराजाधीना:प्रजाइव ३५ या:प्रजा अनुवर्तंते यथाराजानुशासनं। तायंप्रदेशंदेशंवा से
त्रभागमिहप्रजा: ३६ स्वराजतोभिवांछंतिस्वाधिकारत्वनुरूपत:। तद्दत्तंतंतमेवोपजीवंतिनततोधिकं ३७ यथासेवाकर्मजितोलोक:क्षयस्त
थापर:। य:पुण्येनजितोलोक:सोपिक्षीयतएवहि ३८ उपासकस्त्वीश्वरवत्पुण्यपापविवर्जित:। सार्ष्टैश्वर्यसमापन्नऐश्वरंभावमश्नुते ३९
आत्मानंतद्गतान्धर्मांश्चानुविद्यव्रजंतिये। तेषांसर्वेषुलोकेषु कामचारोमहात्मनां ४० आत्मानमनुविद्येतिह्युपास्तिंदहरात्मन:। अनुघफ
लसंबंधोऽपूर्वेनेनविधियते। फलोपास्त्योर्विधानेतुवाक्यभेदोभवेदिति ४१ सत्यसंकल्पआकाश:स्वात्मास्वस्मिंस्थिताअपि। सर्वेतसत्यसंक
ल्पमात्रजाविषयाइमे। यतोनृतापिधानादेजातास्तस्मात्कदुर्लभा: ४२ सत्यसांकल्पासिद्धेषुतेषात्मन्येवसत्स्वपि। याबाह्यविषयेलिप्सा
साऽनृताख्यंपिधानकं ४३ येनात्मोपासकस्तस्य पित्रादि:कोपिवामृत:। नेहतंपरलोकेवालभतेदर्शनायस: ४४ यस्त्वात्मोपासकस्तस्य
येजीवंतिमृताश्चये। यच्चेच्छन्नपिलोकोनलभतेस्यंतदुर्लभं। तत्सर्वंहृदयाकाशेस्मिन्नात्महिसविंदति ४५ यद्यप्यत्राकाशएतेसत्या:कामा:
सदास्थिता:। तथाप्यस्यानात्मविदोह्यनृताच्छदनाअत:। सुषुप्तौतत्रगत्वापितान्कामान्नस्वविंदति ४६ यथाहिरण्यंनिहितंक्षेत्रज्ञानविवर्जिता:।
उपर्युपरिगच्छंत्योनाविंदेयु:प्रजाइमा: ४७ तथासुषुप्तौगच्छंतोब्रह्मलोकंस्वयंप्रभं। नविंदंतिमहामोहपिहितंदहरांबुजं ४८ सवाआकाशआत्मै २७
षयस्मात्तिष्ठतिहृद्ययं। तस्माद्हृदयमित्युक्त:सनिजात्मेत्यहर्निशं। जानन्हार्दाकाशरूपस्वर्गंसंप्रतिपद्यते ४९ यद्दहरोपासनाया:संप्राप्यफलमीश

तां।संप्रसीदतिसा।र्वात्म्यात्संप्रसादःसखल्विह ५० सुषुप्तिःसंप्रदोस्यांसुप्रसन्नत्वदर्शनात्।तयोपलक्षितोजीवःसंप्रसादइतीर्यते ५१ सर्वत्रात्रतुयच्छ
ब्देनच्छब्दाभ्यामुदीरितः।विद्वान्कालुष्यरहितःसंप्रसादोविवक्षितः ५२ अभिमानंपरित्यज्यशरीरत्रितयेष्वयं।सच्चिदानंदमात्मानंसाक्षाज्जीवो
नुभूयतु।आविर्भवत्यात्मरूपेणैवनागतुकात्मभिः ५३ परमात्मैवेषमुक्तइतिशिष्यंगुरुर्जगौ।अमृतंचाभयंब्रह्मवापमित्यपिचाब्रवीत् ५४ सत्यना
मतयाकाशाख्यब्रह्मोपास्यमत्रहि।स्तूयतेसत्यशब्दस्यसकाराद्यक्षरार्थतः ५५ सत्यनामायआकाशःसनिजात्मेत्यहर्निशं।ध्यायन्हार्दाकाशरूपंस्व
र्गेस्तत्रनिपद्यते ५६ वक्ष्यमाणंब्रह्मचर्यमुख्यंतल्लब्धिसाधनं।इतिवक्तुंपुनर्ध्येयोध्याताचस्तूयतेक्रमात् ५७ तथाहि।यआत्मादहराकाशःसएषसेतुर्वि
धृतिःसुराः।असंभेदायलोकानामेषामंतमहेश्वरं ५८ अहोरात्रेनतरतोनमृत्युर्नजरापिच।नशोकोनैवसुकृतंनदुष्कृतमपीश्वराः ५९ अतःसर्वेनि
वर्ततेपाप्मानःसुरपुंगवाः।एषोपहतपाप्माहिब्रह्मलोकःस्वयंप्रभः ६० तस्माद्धैसेतुमेतंतुप्राप्यांधःसन्करप्रभाः।भवत्यनंधोविद्वान्सन्विद्धस्सन्नदेवतु
६१ उपतापीतुसन्देवानोपतापीभवत्यपि ६२ अपिनक्तमहर्नित्यमभिनिष्पद्यतेखलु।सदाविभातएवैषब्रह्मलोकःस्वयंप्रभः ६३ यएवैतंब्रह्म
लोकंविंदंतिब्रह्मचर्यया।तेषामेषब्रह्मलोकःकामचारोखिलेष्वपि ६४ यःकामिनीविषयकतृष्णात्यागःसएवहि।मुख्यत्वेनब्रह्मचर्यमत्रेष्टमितिभा
ष्यहृत् ६५ यज्ञेष्टसत्र३मौनानि४तथैवानशनव्रतं५।अरारण्यण्यारव्यसरसीब्रह्मलोकगतेउभे ६६ ऐरंमदीयंत्वसरोश्वत्थःसोमसवस्त
था।तत्रापराजितपुरंप्रभुविनिर्मितं।हिरण्मयंचैवमादिकममुक्तिफलंचयत् ६७ यज्ञादिकंचयत्प्रोक्तंपुरुषार्थस्यसाधनं।तत्सर्वमस्यात्मकतं
यास्तूयतेब्रह्मचर्यकं ६८ संपादनीयंयत्नेननिजसाम्राज्यमिच्छता।ब्रह्मचर्यंज्ञानसहकारिधावश्यकंत्विति ६९ ब्रह्मचर्यविहीनानांब्रह्मोपास्तिं
प्रकुर्वतां।नास्तिकार्यंब्रह्मलोकःकामचारोपिनास्तिवै ७० मनसाकल्पितास्त्वेवविषयाब्रह्मलौकिकाः।संकल्पजाश्चपित्राद्यायेप्रोक्तास्तेपिमानसाः।

विशुद्धसत्वसंकल्पजन्या अतिसुखावहाः ७१ सार्ष्टिश्वर्यप्राप्तवतांयावदिच्छंहिसंतिते। अतोनंतेभ्रतमयाइतिभाष्येनिरूपितं ७२ सार्ष्टै
२८ श्वर्यप्राप्तवतांसंकल्पायेभवंतिते। अनादिनित्यमुक्तेशसंकल्पस्याविरोधिनः। फलाध्यायेतुर्यपादइदंसर्वंप्रकीर्तितं ७३ सत्कार्यवादांगीका
राज्जगत्सत्कारणात्मना। विशेषाकारमात्रेतुमिथ्यात्वंस्यपहेतुकं ७४ अतोदहरआकाशेसत्याःकामास्तदात्मना। तिष्ठंतितत्प्रसादेनस्फुट
तांयांतिजानता ७५ यस्तुतत्सुंडरीकरूपथ्याकगुणकंविभुं। उपास्तेदहराकाशंब्रह्मतच्चर्याभामादिमान् ७६ तस्यमूर्धन्ययोद्याहार्दतुष्ट ना
हलब्धया। वक्तुमंतेगतिर्नाडी। ह्यस्यबंधोथकथ्यते ७७ याएतात्हृदयस्यनाड्यःसूक्ष्माविनिःसृताः। नाड्यंतःशुक्लनीलादिसौरतेजोभि
योगतः। शुक्लपिंगलनीलस्यपीतलोहितकस्य च ७८ रसस्यपूर्णास्तिष्ठंतिवात्तपित्तकफात्मनः ७९ यतोसौशुक्लनीलादिरूपआदि
त्यउच्यते। अतोनाड्यंतरस्थतेजोयोगात्तस्थरसस्तथा ८० यथामहापथोदीर्घउभयग्रामसंततः। आदित्यरश्मयस्तद्वन्नाड्यादित्येषुसंत
ताः ८१ एकोत्तरशतंनाड्योहृत्संबद्धाइहेरिताः। यास्तासांद्विविधोवास्तिह्युपयोगइतीरितं। सुषुप्तिरथचोत्क्रांतिःक्रमेणात्रप्रदर्श्य
ते ८२ यदासमग्रंसुप्तःसन्प्रसन्नःस्वप्नमप्ययं। नजानातितदाकाशमाभिर्नाडीभिरेतिवै ८३ संपन्नंतंसतापाप्मानकश्चित्स्पृ
शत्यपि। सौरेणतेजसाव्याप्तस्तदानाडीगतेनसः। आनंदमयकोशस्थोनतद्दिग्नतिविंदति ८४ ब्रह्मविद्याकृतानाशोनत्वविद्याकामव
मणां। अदग्धत्वात्तुदुष्कोधेपुनर्दुःखानमेतिसः ८५ यदातुव्याधिवार्धक्यैरसामर्थ्यंगतःपुमान्। क्लिष्टोमुमूर्षुर्भवतितदातज्ज्ञानतयो
मुहुः। आसीनाःपरितःसर्वेप्राकृजनाःसिमामिति ८६ सर्यादस्मात्त्वादेहादुत्क्रांतोभवस्यं। तावज्ञानातितासर्वान्स्थयभातिमा २८

स्थित: ८७ यदोत्क्रामत्यविद्वांस्तच्छरीराद्देशिरेव हि । सुषुम्नाभिन्ननाडीस्थैरूर्ध्वमाक्रमते शुभै: ८८ यथाक्रमंजितक्लो
कानविद्वांस्तु गच्छति ८९ यथोक्तसाधनोपेतो विद्वांस्त्वाकाशसंज्ञकं । उत्क्राष्टगुणमोंकारेणात्मानं चिंतयन्नदा । एतिहार्दानुग्र
हात्तमूर्धन्यधमनीबिलात् ९० योवेदादौस्वर:प्रोक्त इतिश्रुत्यर्थईरित: । यस्त्वउआत्मभि:सोत्रस्फुटत्वस्यैवविलिख्यते ९१ तथाहि । वेदस्य
चादौकथितत्वदंते प्रतिष्ठितोय: प्रणव:स्वराख्य: । सध्यानकाले जगदेकहेतौव्याकृताख्यप्रकृतौविलीन: ९२ ध्यातावराजं च हिरण्यग
र्भमव्याकृतं च प्रणवाक्षरेषु । विराडकारं प्रविलाप्य स्वनेनं चाप्युकारं प्रकृतौ मकारे ९३ विलापयेत्तस्य च कारकस्य लीनस्य तस्यां प्रकृतोप
रोय: । चतुर्थमात्रात्मकनारनाद ध्येय: समुत्कृष्टतरोस्तिदेव: ९४ सोयं महेशो विबुधैरुपास्य: संसारबंधस्य विनाशनाय । अनेन मंत्रेण तु पू
र्वमुक्तं प्रपंचितं वै गगनाख्यवस्तु । इति ९५ ऊर्ध्वोर्ध्वमुक्रमिष्यन्स एतैर्वाशुभिर्बुध: । यावत्क्षिप्येन्मनस्तावदादित्यं शीघ्रमेति स: ९६ एतद्वै
ब्रह्मलोकस्य द्वारमादित्य उच्यते । गंतव्यो विदुषां पंथा अवेत्तॄणां निरोधक: ९७ तदेतस्मिन्यथोक्तेर्थ एष श्लोक उदीरित: । शतं चैका च हृदस्य
नाड्यस्तासां मूर्धानमभिनि:सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंति । इति ९८ गतिशब्दाभ्यां तथाहि दृष्टं लिंगं च २
उत्तरेभ्यो व्हेतुभ्यो दहर: परमेश्वर: । इत्युक्तं पूर्वसूत्रे यत्तदेवाग्रे प्रपंच्यते ९९ इमा: प्रजा ब्रह्मलोकं गच्छंत्योहरह स्वमुं । न विंदंतीहि रह ब्रह्मलो
हा
कगति: श्रुतौ १०० श्रूयतेत्र ब्रह्मलोकशब्दश्चैवमुभयं त्विदं । हार्दाकाशस्य परमात्मत्व एव समंजसं १ ब्रह्मैव हार्दाकाशाख्यं लोकोत्राहरहर्गति: ।
तथात्वे घटते सुप्तौ नान्यथा प्रत्यहं गति: २ घटते ब्रह्मणो लोके षष्ठीतत्पुरुषाद्धतौ । कर्मधारय एवातो ब्रह्मलोकपदे हित: ३ सत्ताक्षरार्थस्तु ।

प्रत्यहागतिब्रह्मलोकशब्दाभ्यामप्युपक्रमे।ध्येयत्वेनोक्तआकाशः परमात्मेतिगम्यते ४ यथात्र प्रत्यहं ब्रह्मलोकस्य गमनं श्रुतं। तथान्यत्रा
 पिदृष्टं सुषुप्तौगमनं श्रुतौ ५ कर्मधारयएवात्रब्रह्मलोकपदेहितः। अस्मिन्नर्थेलिंगमिदं संप्रोक्ताहरहर्गतिः। षष्ठीतत्पुरुषेदोषोलक्षणेतिचसूच्यते ६
धृतेश्चमहिम्नोस्यास्मिन्नुपलब्धेः ३ जगद्धारणरूपस्यप्रकृताकाश आत्मनि। अत्रोक्तस्यमहिम्नोस्यनरत्रश्रुतावपि। उपलब्धेश्चदहरआका
शः परमेश्वरः ७ जगत्प्रशासकत्वेनत्यात्माविधृतिरुच्यते। वर्णाश्रमाद्यसांकर्यहेतुत्वात्सेतुरीर्यते ८ प्रसिद्धेश्च ४ श्रुतावाकाशशब्दस्य
ब्रह्मण्येवप्रसिद्धितः। जीवप्रसिद्ध्यभावाच्चात्राकाशः परमेश्वरः ९ भूताकाशः प्रसिद्धोपिनात्राकाशतयेष्यते। यावान्वाअयमाकाशस्तावानेषो
तराह्णितः १० इतिभूताकाशाद्दहरस्योपमानतयेरितः। उपमानस्योपमेयदहराकाशतानहि ११ इतरपरामर्शात्सइतिचेन्नासम्भवात् ५
वाक्यशेषबलेनात्रयदीशोदहरोमतः। नोहिजीवस्यापिपरामर्शोस्तिदहरोस्तिह १२ इतिचेन्नोक्तधर्माणामत्रजीवअसंभवात्। नसंभवतिजीवेस्मिन्
पापासंस्पर्शनादिकं १३ उत्तराच्चेदाविर्भूतस्वरूपस्तु ६ हार्दाकाशोपासनोर्ध्वेनमेवोपासनांपुनः। प्राहब्रह्मात्यपहतपाप्मत्वादिप्रकारिका
१४ चिरकालब्रह्मचर्यगुरुशुश्रूषणादिभिः। युक्तेनसाधनैः पुंसात्मात्मनोन्वेषणेकृते १५ विपरीतात्मावबोधनिवृत्तिर्जायतेततः। स्वसंवे
द्योभवत्यात्माशास्त्राचार्योपदेशतः १६ इतिख्यापयितुंविधेयंप्रजापतिनेरिता। अन्वेष्टव्योविजिज्ञासितव्यआत्मेत्यपिविधिः। नापूर्वः किंतुनि
यमविधिरित्युक्तमाकरे १७ विपरीतात्मावबोधनिवृत्त्यैवफलप्रदा। नकेवलात्यपहतपाप्मत्वादिप्रकारिका। दहराकाशविधेयंफलदेतिनिय
म्यते १८ सूत्रार्थस्तु। ननुजीवेत्यपहतपाप्मत्वादेरसंभवः। इत्युक्तंपूर्वसूत्रेयन्नोपपन्नंहितत्खलु १९ तथाहि। हार्दाकाशोपासनोर्ध्वप्रजा

पलिसमीरितात्॥विहज्जीवेप्यपहतपाप्मत्वादिनिरूपकात् २० श्रौतवाक्यादपहतपाप्मत्वादिकसंभवः॥ अतोदहरआकाशोजीवएवास्त्विहेति
चेत् २१ ध्यानेनाविर्भूतनिजरूपोजीवस्त्विहश्रुतौ॥उत्तमःपुरुषःप्रोक्तोनतुजीवमयेत्यतः २२ नासंभवादितिप्रोक्तोहेतुजश्वनिराकृतौ॥ना
९ सिद्धत्वेनपरमात्मैवैदहरोमतः २३ अन्यार्थश्चपरामर्शः ७ नन्वत्रदहराकाशवाक्यशेषेप्रदर्शितः॥अस्तिजीवपरामर्शःसंप्रसादपदेरितः॥
अतोत्रदहराकाशोजीवएवेतिचेच्छृणु २४ श्रुत्यर्थघटितस्सूत्रार्थस्तु॥स्वप्नजागरितस्थानरूपदेहाभिमानकं॥त्यक्त्वाभ्रत्वानिर्विशेषस्वप्रकाश
स्वरूपकः॥सुषुप्तौसंप्रसादोयंस्वेनरूपेणतिष्ठति २५ येनरूपेणजीवोयंसुषुप्तौस्वस्वरूपकः॥सस्वयंज्योतिराकाशउत्तमःपुरुषःस्तु २६
परमात्माह्यपहतपाप्मत्वादिगुणोहृदि॥उपास्यइत्येवमीशार्थःपरामर्शईरितः॥नतुजीवोपासनार्थंतेनाकाशइहेश्वरः २७ अल्पश्रुतेरि
तिचेत्तदुक्तं ८ उपास्याकाशस्यहृदिदहरत्वश्रुतेरिह॥आकाशोदहरोजीवइतिचेदुत्तरंशृणु २८ यदुक्तंव्यसमाधानमत्रतस्माक्तमीरि
तं॥द्वितीयपादस्याद्याधिकरणेत्यष्टमसूत्रके॥अर्भकौकस्त्वादित्यत्रसूत्रेव्योमोपमानतः २९ अत्रैवमाख्यायिकाश्रूयते॥तथाहि॥आत्मानं
ज्ञानमिच्छंतोस्सुरास्सुरपतीउभौ॥प्रजापतिंजग्मतुःस्मयुक्तमिंद्रविरोचनौ ३० अकुर्वाणावुभावेवमिथःसंविदंतोफलेप्सया॥समित्पाणीउपा
गत्यास्योषतुर्ब्रह्मचर्यकं ३१ द्वात्रिंशद्वर्षपर्यंतंगुरुसेवनपूर्वकं॥ब्रह्मचर्येपरोद्दृष्ट्वातावुवाचप्रजापतिः ३२ किमिच्छंतोयुवामत्रोषितवंता
वुभाविति ३२ तावूचतुरपहतपाप्मत्वाद्यष्टधर्मकं॥विनाप्यात्मानमपरोक्षंकरोतिसयःपुमान् ३३ सर्वांल्लोकान्सर्वकामानाप्नोतीतिस्वद
च॥आवेस्यतेविबुधावसावोत्रतदिच्छया ३४ इतिश्रुत्वातावुवाचप्रजापतिरिदंवचः॥यएषोक्षिणिपुरुषोदृश्यविज्ञायतेबुधैः॥एषआत्मेतद

मृतमभयंब्रह्मखल्विति ३५ आग्रद्रष्टारमात्मानमक्षिस्थं समुदीरितं॥ अबुध्वाब्रह्मणाप्रोक्तं छायात्मेति विबुध्यते॥ छायात्मैकोथवानेक इति पप्रछतुः
पुनः ३६ यश्चक्षुषिमयापूर्वेद्रष्टाप्रोक्तः स एव हि॥ सर्वांतर्याम्येक एवात्मेत्यभिप्रायवान्विधिः॥ सर्वेषांमध्य आत्मैक इतितावुक्तवान्पुनः ३७ तदा
शयमबुध्वैवछायात्मैवोक्त इत्यमू॥ बुध्वातत्तौ स्थितौदृष्ट्वा विपरीतग्रहाविमौ॥ माभूतामिति तौप्राह कृपयाविश्वसृट् पुनः ३८ उदपूर्णशरा
वेस्वमवेक्ष्यात्मानमत्रयत॥ भवेदविदितंतन्मांब्रूतमित्यब्रवीद्विधिः ~~३८~~ ३९ यदत्राविदितंब्रूतमितिवक्तुः प्रजापतेः॥ आशयोवक्ष्यमाणेन ग्रंथे
नैवप्रदर्श्यते ४० देहत्वेनगृहीतस्य नखलोमादिकस्य वै॥ जलादौ दृश्यते छाया सांछिन्नस्य न दृश्यते ४१ आगमापायिनो दंतनखलोमा
द्ययोयथा॥ तथादेहोप्यनित्योयमागमापायदर्शनात् ४२ तस्यछायाप्यनित्यत्वान्नात्माभवितुमर्हति॥ श्रुत आत्मात्वपहतपाप्मत्वाद्यष्टधर्मकः ४३
तस्मादनित्यदेहस्य छायाप्यात्मा न देहवत्॥ अक्षिस्थः पुरुषस्त्वात्मेत्युक्तोविज्ञायतेनसः ४४ आवेदयिष्यतोरिक्षं द्रष्टारं ज्ञापयाम्यहं॥ इत्याशयोत्रा
विदितंब्रूतमित्युक्तिमद्विधेः ४५ तदाशयमबुध्वैवंछायात्मैवोक्त इत्यमू॥ बुध्वातत्तौ स्थितौदृष्ट्वा विपरीतग्रहाविमू॥ माभूतामितितौप्राह कृ
पयाविश्वसृट् पुनः ४६ युवांनिजगृहेयद्वन्महार्हाभरणांशुकौ॥ तिष्ठथोनिर्मलौ तद्वद्भूत्वेदानीं युवांपुनः ४७ उदपूर्णशरावेस्वमवेक्ष्यात्मा
नमत्रयत॥ भवेदविदितंतन्मांब्रूतमित्यब्रवीद्विधिः ४८ यदत्राविदितंब्रूतमितिवक्तुः प्रजापतेः॥ आशयोवक्ष्यमाणेन ग्रंथेनैवप्रदर्श्यते ४९ तथाहि॥
वस्त्रालंकृतिवत्स्वंयदात्मीयतयामतं॥ सुखदुःखादितदपि कादाचित्कतयाध्रुवं ५० तेनदेहस्तदीयंतच्छायाप्यात्माभवेन्नहि॥ अक्षिस्थः पुरुष राम:
स्त्वात्मेत्युक्तोविज्ञायतेनसः ५१ आवेदयिष्यतोरिक्षं द्रष्टारं ज्ञापयाम्यहं॥ इत्याशयोत्राविदितंब्रूतमित्युक्तिमद्विधेः ५२ तदाशयमबुध्वैवंछाया २०
त्मैवेरितामम॥ इतीदंज्ञातवान्देह आत्मेतितुविरोचनः ५३ विपरीतग्रहौदृष्ट्वास्वस्वदोषेणकेनचित्॥ प्रतिबुद्धविवेकौतौ कृपयाहाविधिः पु

नः५४ यएषोक्षिणिपुरुषोदृश्यतेविज्ञायतेबुधैः॥ एषआत्मैतदमृतंमभयंब्रह्मखल्विति॥ जाग्रद्द्रष्टारमक्षिस्थमात्मानंप्रोक्तवान्विधिः
५५ तदाशयमबुद्ध्वैवंस्वस्वदोषेणतावुभौ॥ छायांदेहंक्रमात्ज्ञात्वात्मानंस्वस्थौप्रजग्मतुः ५६ तावप्रबुद्धौगच्छंतौदृष्ट्वाप्राहप्रजा
पतिः॥ देवताअथवादैत्यायएतांबुद्धिमाश्रिताः॥ अकृतार्थाभविष्यंतितइत्याहप्रजापतिः ५७ कृतार्थंतांमन्यमानोदैत्या
नाहविरोचनः॥ देहआत्मादेहमेवरक्षन्संपूजयन्निमं॥ अमुंचलोकमाप्नोतिदेहात्मज्ञानवानिति ५८ तस्मादद्यापिलोकेस्मिन्नद
दानमयज्वकं॥ अश्रद्दधानमसुर्यामितिप्राहुरार्यकाः ५९ तत्संप्रदायगालोकेसद्वस्त्राभरणादिभिः॥ संस्कुर्वंतिविमानेनमारो
प्यप्रेतविग्रहं॥ जेष्यंतोवयमेतेनामुंलोकमितिमन्वते ६० प्रतिबद्धविवेकौतौनिजदोषेणकेनचित्॥ ब्रह्मचर्यंविनानैवशुद्धस्वां
तोभविष्यतः॥ इतिध्यात्वास्वमनसितावुपेक्षितवान्विधिः ६१ छायात्मज्ञानवानिंद्रस्त्वप्राप्यैवनिजान्सुरान्॥ विज्ञातायामात्म
तयाछायायांदोषदृष्टिमान्॥ भूत्वापुनःसमित्पाणिःप्रजापतिमुपागमत् ६२ सार्धंविरोचनेनेंद्रःसमाहितमनाभवान्॥ गतः
पुनःकिमायातइतिप्राहप्रजापतिः ६३ इंद्रःप्रोवाचागतोस्मिदोषदृष्टिवशादिति ६४ तथाहिछायात्माभगवन्नस्मिन्छरी
रेसाध्वलंकृते॥ यथादेहस्तथाभातिसद्वस्त्रेविमलीकृते ६५ एवमेवशरीरेस्मिन्नसवन्नासाविलोचने॥ छिन्नांगेंधेपिभ
वतियथादेहस्तथैवसः ६६ शरीरनाशमन्वेषछायात्मापिविनश्यति॥ अतोदेहात्मविज्ञानेछायात्मावगमेपिवा॥ भोग्यं
फलंनपश्यामिभोक्तुरेवाक्षवत्ततः ६७ अतःसमित्करोहंत्वामात्मानंप्रष्टुमागमं॥ इतींद्रवचनंश्रुत्वातमुवाचप्रजापतिः ६८ तथाहि॥
इंद्रत्वयैषआत्मानछायेत्यवगतोहियत्॥ तदेवमेवेत्युक्त्वेंद्रंपुनःप्राहप्रजापतिः ६९ योक्षिण्युक्तोमयापूर्वंद्रष्टात्माधुनैवतं॥ पुन
र्वक्ष्याम्यविज्ञातंत्वयादोषेणकेनचित् ७० वसकर्तुंब्रह्मचर्यंपुनर्द्वात्रिंशतंसमाः॥ इतिप्रजापतेर्वाक्यंतदाकर्ण्यकृतब्रह्म॥ आत्म

प्र०सू०सं०का० नंज्ञातुमिच्छंतमिंद्रमाहप्रजापतिः ७१ तथाहि॥ यउक्तआत्मापहतपाप्मत्वाद्यष्टधर्मकः॥ यएषोक्षिणिपुरुषोदृश्यतेतितिवर्णितः ७२
३१ सैवैषस्वप्नआत्मीयैः पूज्यमानोमनोरमान्॥ स्वप्नदृष्टानुभवतिविषयान्स्वप्ननिर्मितान् ७३ एषआत्मैतदमृतंमभयंब्रह्मखल्वि
ति॥ इतिप्रजापतेर्वाक्यंतदाकर्ण्यसुराधिपः ७४ देहछायातिरिक्तंतंस्वप्नस्थंदेहमेवहि॥ बुध्वात्मानंस्वस्थचित्तोजगामाभिमतांदि
शं ७५ अप्राप्यैवसुरानिंद्रः स्वाप्नदेहात्मदर्शने॥ दोषंदृष्ट्वापरावृत्यप्रजापतिमुपागमत् ७६ मघवन्मद्वचनतः समाहितमनाभवा
न्॥ गतः पुनः किमायातइतिप्राहप्रजापतिः॥ इंद्रःप्रोवाचागतोस्मिदोषदृष्टिवशादिति ७७ तथाहि॥ जाग्रद्गात्रंयद्यपीदमंधंस्या
मम्यथापिसः॥ स्वाप्नदेहात्मकोह्यात्मानंधोस्रामेप्यदृश्यते ७८ नदुष्यत्यस्यदोषेण नवधेनास्यहन्यते॥ देहस्रामेपिनस्रामोथापि
दोषोत्रदृश्यते ७९ तथाहि॥ स्वप्नेविद्रावयंतीवघ्नंतीवैनंहिकेचन॥ किंचाप्रियस्यवेत्तेवरोदितीवेषदृश्यते ८० घ्नंतित्वेवैनमेवका
रइवार्थकइहश्रुतौ॥ इवशब्दः साहचर्यादितिव्याख्यातमाकरे ८१ अतःस्वप्नस्थदेहात्मविज्ञानेदोषदर्शनात्॥ भोग्यंफलेनपश्या
मिभोक्तुःशोकादिमत्वतः ८२ एषआत्मात्वपहतपाप्मत्वाद्यष्टधर्मकः॥ त्वयावर्णितइत्यार्याः कथयंतिभवद्वचः ८३ अतःसमि
त्पाणिरहमात्मानंप्रष्टुमागतः॥ इतींद्रवचनंश्रुत्वातमुवाचप्रजापतिः ८४ इंद्रत्वयैषस्वात्मानह्यात्मेत्यवगतंतुयत्॥ तदेवमे
वत्स्ततेंद्रपुनःप्राहप्रजापतिः ८५ योक्षिण्युक्तःस्वप्नगःसद्दृष्टात्माह्येनमेवतं॥ पुनर्वक्ष्याम्यविज्ञातत्वयादोषेणकेनचित् ८६ व
सकर्तुंब्रह्मचर्यंपुनर्द्वात्रिंशतंसमाः॥ इतिप्रजापतेर्वाक्यंतदाकर्ण्यकृतव्रतः॥ आत्मानंज्ञातुमिच्छंतमिंद्रमाहप्रजापतिः ८७ तथाहि राम:
यउक्तआत्मापहतपाप्मत्वाद्यष्टधर्मकः॥ यएषोक्षिणिपुरुषोदृश्यतेतितिवर्णितः ८८ सएषस्वप्नआत्मीयैःपूज्यमानोमनोरमान्॥ ३१

स्वप्नद्रष्टानुभवतिविषयान्स्वप्ननिर्मितान् ८९ सएषस्फूतोनिखिलःसंप्रसन्नस्वरूपकः॥ नविजानातिवैस्वप्नंमनोवृत्तेरनुद्भवात् ९०
एषआत्मेतदमृतमभयंब्रह्मखल्विति॥ इतिप्रजापतेर्वाक्यंतदाकर्ण्यसुराधिपः ९१ सविशेषज्ञानशून्योह्यचिद्रूपोविरिंचिना॥ आ
त्मोक्तइतिविज्ञायप्राप्राजीक्लांतमानसः ९२ अप्राप्यैवसुरानिंद्रोह्यचिद्रूपात्मदर्शने॥ दोषदृष्ट्यापरावृत्यप्रजापतिमुपागतः ९३
मघवन्महद्वनतःसमाहितमनाभवान्॥ गतःपुनःकिमायातइतिप्राहप्रजापतिः॥ इंद्रःप्रोवाचागतोस्मिदोषदृष्टिवशादिति ९४
तथाहि॥ नाहंखल्वयमित्यादिवचनैर्दोषमुक्तवान्॥ अहेतितुनिपातोयंखेदार्थकइहस्फुतो ९५ यथाजाग्रत्स्वप्नकालेप्यहमं
स्मीतिबुध्यति॥ इमानीभूतानीसेवंसुषुप्तेनैवबुध्यति ९६ अतोविनाशंसंप्राप्तइवभातिसुषुप्तिगः॥ एषआत्मेतदमृतमिति
तूक्तंत्वयाखलु ९७ अतःकारणदेहात्मदर्शनेदोषदर्शनात्॥ भोग्यंफलंनपश्यामिभोक्तुर्दृष्टेरभावतः ९८ अतःसमित्करो
हंत्वामात्मानंप्रष्टुमागतः॥ इतींद्रवचनंश्रुत्वातमुवाचप्रजापतिः ९९ इंद्रकारणदेहोयंनात्मेत्यवगतंत्वया॥ तदेवमेवेत्युक्त्वेंद्रंपु
नःप्राहप्रजापतिः १०० पर्यायैस्त्रिभिरप्येकमेवात्मानंमयेरितं॥ पुनर्वक्ष्याम्यविज्ञानंत्वयाशेषपाकेनाचितं १ पर्यायत्रितयप्रो
क्तादस्मादन्यंनकंचन॥ आत्मानंसंप्रवक्ष्यामिव्याख्यास्याम्यनमेवहि॥ अन्यत्रशब्दस्यैवान्यमित्यर्थोभाष्यईरितः २ पर्यायत्रित
येब्रह्मचार्यविरणतस्तव॥ अल्पोवशिष्टोदोषोस्तितद्दोषस्यापनुत्तये॥ वसकर्तुंब्रह्मचर्यंपुनःपंचसमाइह ३ इतिप्रजापतेर्वाक्यंतदा
कर्ण्यकृतव्रतं॥ आत्मानंज्ञातुमिच्छंतमिंद्रमाहप्रजापतिः ४ वर्षाण्येकशतंहींद्रोप्यात्मज्ञानस्यलिप्सया॥ प्रजापतेःसमीपेवैब्रह्मचर्यं
चचारह ५ अतोनास्त्येवपुरुषार्थांतरंज्ञानतोधिकं॥ निरंकुशानंदहेतुरितिप्राहुर्मनीषिणः ६ उक्तंपरिंद्रमाहेतिविशदीक्रियतेहि

ब्र॰सू॰सं॰ तत्॥ तथाहि॥ इदंशरीरंमघवन्मर्त्यग्रस्तंमृत्युना॥ अशरीरस्यामृतस्यतदधिष्ठानमात्मनः १०७ स्वाधिष्ठानेशरीरेस्मिन्विशन्ना
३२ मेवसर्वदा॥ प्रियाप्रियाभ्यांग्रस्तःसशरीरोहमितिभ्रमंन ८ शरीरत्रयतादात्म्यमापन्नस्यकदापिन॥ प्रियाप्रियवियोगोस्तितदु
नंस्पृशतोनते ९ स्पर्शास्पर्शोस्तितोह्यतोलोकेनैवासतःक्वचित्॥ अतःस्पृष्टोवसन्नेवनासन्नालेतिबोध्यते १० त्रिरःपाप्या
घंगहीनाअशरीराउदाहृताः॥ अशरीरोवायुरभ्रंतथाविद्युद्बलाहकः ११ यथैतान्यशरीराणिखस्थानिखसरूपतां॥ संप्रा
प्योर्ध्वाकाशतयादृश्यंतेशरदादिषु १२ तान्येवशिशिरापायेवैलक्षण्यमवाप्यखात्॥ सावित्रंश्रेष्ठमग्रंज्योतिःप्राप्यतत्प्रा
नितेनवै १३ स्वेनरूपेणवर्षतोवाविर्भावंव्रजंतिवै॥ एवमेवैषजीवस्तत्त्वमसीतिप्रबोधितः॥ एतच्छरीरत्रितयेत्यक्ताहंमम
ताग्रहं १४ १०० स्वयंप्रकाशमात्मानंसाक्षादेवानुभूयवै॥ आविर्भवत्यात्मरूपेणैवनागंतुकरात्मभिः १५ योभिनिष्पद्यते
स्वेनरूपेणाबाधितेनसः॥ व्याकृताव्याकृतात्मभ्यामुत्तमःपुरुषःखलु १६ यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥ अतोस्मिलो
केवेदेचप्रथितःपुरुषोत्तमः १७ इत्युत्तमोयःपुरुषोगीतास्वहरिणेरितः॥ तदभेदोमुक्तजीवेनयात्मसात्रबोध्यते १८ विलीनक
रणग्रामःसुषुप्तौसंप्रसीदति॥ इतिजीवःसंप्रसादशब्देनेहविवक्षितः १९ प्राप्तेविदेहकैवल्येसंप्राप्यानिखिलात्मतां॥ तस्मिन्सर्वस्या
त्मभूतेस्वस्मिंस्तादात्म्यतोवसन् १२० क्वचित्तज्जीवरूपेहसन्भक्ष्याणिभक्षयन्॥ प्राप्नोत्यभीप्सितान्कामान्निखिलस्यात्म
भावतः २१ क्वचित्संकल्पमात्रेणसंभूतैर्ब्रह्मलोकिकैः॥ स्त्रीभिर्यानैर्ज्ञातिभिर्वाक्रममुक्तस्वरूपतः २२ मनसैवक्रीडमानोरममाण राम:
श्वतेःसह २२ स्त्रीपुंसयोःसंनिकर्षादिदंजातंनिजंवपुः॥ अस्मरन्नेवैविहरतिपरब्रह्मस्वरूपतः १२३ येयेकामाःश्रेष्ठजीवैरनुभ ३२

ताभवंतिते॥सर्वात्मभूतमुक्तेनसंबध्यंतइतिश्रुतिः॥ब्रह्मविद्याप्ररूप्यर्थमात्मज्ञानंप्रशंसति १२४ अथ॥सिंहावलोकनन्यायात्व
श्चमिदंमनोगतं॥ज्ञात्वातदुत्तरंवक्तुंग्रंथआरभ्यतेग्रिमः २५ तथाहि॥यएषोक्षिणिपुरुषोदृश्यतेविबुधैर्धिया॥एषआत्मेतदमृतमभयं
ब्रह्मखल्विति २६ यदुक्तंतत्रसकथंसाक्षाद्दक्षिणिदृश्यते॥तद्वक्तव्यमितिप्रश्नेप्राहोत्तरमिदंविधिः २७ तथाहि॥यथारथंवाशकटंवोढुमश्वो
धवावृषः॥तत्रप्रयुक्तोभवतितथाप्राणइहवपुः २८ सदाचेष्टयितुंगात्रेप्रयुक्तःपरमात्मना॥देहेनदेहिनांकर्मफलभोगमभीप्सता २९ देहे
स्मिन्नींद्रियद्वाराहृदिवृत्तिरुदेतिया॥दर्शनश्रवणाद्याख्याव्याप्नोतिविषयंहिया १३० तयोपलक्षितंज्ञानंतत्तद्विषयकंहियत्॥प्रतीयते
चक्षुरादौव्यापारैर्दर्शनादिभिः॥सआत्मेतिख्यापयितुमथयत्नेत्युपक्रमः ३१ अथयास्मिन्देहएतत्कृष्णतारोपलक्षिते॥सुषिरात्मकमाका
शंतत्रानुगतमिंद्रियं॥चक्षुःसआत्मातत्कृष्णःसंस्थश्चाक्षुषःपुरुषोमतः ३२ तत्कर्त्तैकरूपिवस्तूपलब्धपरनामकः॥यद्दर्शनंत
दुपतोकरणंचक्षुरिंद्रियं ३३ उक्तोयोह्यपहतपाप्मत्वाद्यष्टधर्मकः॥परमात्माकाशसंज्ञोयद्रूपोजीवउच्यते ३४ योवस्तु
त्रितयेसाक्षीसएवात्मात्रचक्षुषि॥दर्शनाख्येनलिंगेनदृष्टेतिज्ञायतेबुधैः ३५ अस्यानयाक्षिपुरुषोदृश्यतेज्ञानिभिःक
थं॥इतीदृमानसप्रश्नोत्तरंस्पवतिकीर्तितं ३६ दृष्टत्वेनाक्षिणाविज्ञातस्यात्मनोज्ञानरूपता॥ननुज्ञानाश्रयोरूपमित्याख्या
पयितुंविधिः॥स्वरूपमात्मनःप्राहयोवेदेतिपुनःपुनः ३७ दृश्यदर्शनकालीनात्मसत्ताज्ञानकर्त्तता॥ननुव्यापृततेयास्तसूर्यप्र
काशस्येवकर्त्तता ३८ प्रकाशरूपस्सूर्यस्यदृश्यदर्शनकालिका॥स्वरूपसत्तालोकेहिप्राप्रकाशनकर्त्तता ३९ जिघ्राण्यभि
व्याहराणिमन्वानिश्रृणवानिच॥इतियास्त्रिपुटीवेदसआत्माज्ञप्तिमात्रकः १४० मनोस्यदैवंकरणंनेतरैरिंद्रियैःसमं॥

प्र०सू० सं०का ३३ यतारूस्त्रैकालिकांतः स्थबाह्यार्थज्ञानसाधनं॥ चष्टे सर्वमनेनेति चक्षुरित्युच्यते मनः ४१ सर्वज्ञ ईश्वरो देवो नेन मनसाखिला ह्य१
न्॥ वेत्त्येक देव विषयान्निजसंकल्पमात्रजान्॥ इति दैवं चक्षुरिति मनः श्रुत्यानयोच्यते ४२ सोहं मुक्तो ब्रह्मभावमापन्नो ब्रह्मवि
द्यया॥ अनाद्यविद्यारचितदेहेंद्रियमनोमुखैः॥ वियुक्तो व्योमवच्छुद्धोय आप्तो निखिलात्मता ४३ स वै मुक्तो ह्ययं आत्माका
शाख्यः परमेश्वरः॥ दैवेन चक्षुषैतेन मनसोपाधिनार्कवत्॥ साक्षी संनाविषया नेतान्संपश्यन्रमते निशं ४४ ब्रह्मैव लोका
यस्तास्मिन्य एतो निजमायया॥ संकल्पजन्याविषयास्तान्पश्यंन्रमते निशं ४५ तं वा एतं मुक्तजीवस्वरूपमखिलेश्वरं॥ हार्दा
काशाख्यमात्मानं देवेंद्रप्रमुखामराः॥ उपासते ह्यपहतपाप्मत्वाद्यष्टधर्मकं ४६ तस्मादुपासनात्तेषां स्फुरणानां निखिला अपि॥
प्राप्ता लोकास्तथा सर्वकामाः संकल्पमात्रतः ४७ एवं यः पुरुषो लोके शास्त्राचार्योपदेशतः॥ विचारेण तमात्मानमपरोक्षं करोति
वै॥ स८ं स वात्मतया सर्वान्लोकान्कामानुपैति हि ४८ यस्तूपास्ते तमात्मानं सोपि संकल्पमात्रतः॥ सर्वान्लोकान्सर्वकामाना
प्नोति क्रममुक्तितः ४९ इति प्रजापतिर्ज्ञेय ब्रह्मविद्यास्फुगर्भितां॥ दहरोपास्तिमाहेति श्रुतिरार्हहितैषिणी १५० इयमाख्यायि
का छांदोग्याष्टमाध्यायगामिन्या॥ विवृता भगवत्पादकृतभाष्यानुसारतः ५१ आत्मापहतपाप्मादिः परमात्मा परः पुमान्॥
दहराकाशसंज्ञोत्रोपास्य उक्तो खिलार्थदः॥ अकर्त्ता साक्षिबोधात्मेवरुद्धात्र युमीरित ५२॥ ॥अत्र द्रविडपाठानुसारेण श्रीवि
द्यारण्यपादव्याख्यातायास्तैत्तिरीयनारायणीयोपनिषदां मध्ये प्रोक्तं दहराकाशोपास्तिप्रकरणं लिख्यते॥ तथाहि॥ दहरं विपाप्मप रामः
रवेश्मस भूतं हृत्पुंडरीकं पुरमध्यसंस्थं॥ तत्रापि दहरं गगनं विशोकस्तस्मिन्यदंतस्तदुपासितव्यं १ यो वेदादौ स्वरः प्रोक्तो वेदा ३३
न्ते च प्रतिष्ठितः॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः २ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवं॥ विश्वं नारायणं देवमक्षरं परमं प्रभु ३

विश्वतः परमां नित्यं विश्वं नारायणꣳ हरिं॥ विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ४ पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतं॥ नारा
यणं महाज्ञेयं विश्वात्मानं परायणं ५ नारायणपरं ब्रह्म तत्त्वं नारायणः परः॥ नारायणपरो ज्योतिरात्मा नारायणः परः ६ यच्च किंचि
ज्जगत्यस्मिन्दृश्यते श्रूयतेपि वा॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ७ अनंतमव्ययं कविꣳ समुद्रांतं विश्वशंभुवं॥ पद्म
कोशप्रतीकाशꣳ हृदयं चाप्यधोमुखं ८ अधोनिष्ट्या वितस्त्यांते नाभ्यामुपरि तिष्ठति॥ हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् ९
संततꣳ शिराभिस्तु लंबत्याकोशसंनिभं॥ तस्यांते सुषिरꣳ सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितं १० तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतो
मुखः॥ सोग्रभुग्विभजंस्तिष्ठन्नाहारमजरः कविः ११ संतापयति स्वं देहमापादतलमस्तकं॥ तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता॥
१२ नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा॥ नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा १३ तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः॥ स
ब्रह्मा स शिवः सेंद्रः सोक्षरः परमः स्वराट् १४ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं॥ ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः १५॥ ॥इति पंच
दशमंत्रात्मिका नारायणीयोपनिषदुक्ता दहराकाशसंज्ञिका सगुणब्रह्मविद्या॥ ॥सहस्रशीर्षमित्याद्यैरुक्तं तत्त्वं परे त्विह॥ पद्मकोश
प्रतीकाशमित्याद्युक्तप्रकारतः १ चिंतयेदिति तात्पर्यं मंत्राणामुपासितुर्मुनेः॥ उपास्यदेववर्यस्य प्राप्त्यै मंत्र उच्यते २ विद्याख्यानवि
ज्ञश्रीविद्यारण्यमुनीरितः॥ अस्यार्थः कथ्यतेस्माभिः संतः कुर्वंतु विहादरं ३ विद्यारण्यादिकाचार्यैर्वेदगूढार्थबोधिभिः॥ अस्यार्थः कथि
तो ग्राह्यः कोन्यः स्यार्थतत्त्ववित् ४ लालारिकादिकप्रोक्तं न्यूनाधिक्यं हरीशयोः॥ कार्यं हितार्थिभिः सद्भिर्नैवमानविरोधतः ५ श्रीम
न्नारायणीयेस्मिन्नतिस्पष्टं प्रतिभासते॥ हरेर्हरस्य चाप्यत्रोभेदमाकुर्मुधा बुधाः ६ नारायणी येयदुदीरितं स्यादुपासनं तच्च निरूप्यतेत्र॥
तत्राद्यतो द्राविडपाठ एव प्राह्यैरतो व्याक्रियते स एव ७ तथा हि॥ ॥दलाष्टकोपेतहृदब्जमध्ये विपाप्मने काश्यप दृष्टहेतोः॥ ब्रह्मोपलब्धे

स्तदुपासनायाः स्थानत्वतो ब्रह्मनिवेशभूतं १ प्रासादवद्यत्पुरमध्यसंस्थं तत्रापि चाल्पं गगनं समास्ति॥ हृदि स्थितत्वादुपचारतोल्पं
ह्यपेतशोकं परमात्मतत्वं २ अत्रापि वाक्ये दहरं नभः स्याद्ब्रह्मैव पूर्वोक्तनयौघसाम्यात्॥ एवं च तस्मिन् हृदयांबुजेत्र यद्ब्रह्मतत्वं
तदुपासितव्यं ३ वेदस्य चादौ कथितस्तदंते प्रतिष्ठितोयः प्रणवः स्वराख्यः॥ स ध्यानकाले जगदेकहेतावव्याकृताख्यप्रकृतौ वि
लीनः ४ ध्यात्वा विराजं च हिरण्यगर्भमव्याकृतं च प्रणवाक्षरेषु॥ विराडकारं प्रविलाप्य सूत्रे तं चाप्युकारं प्रकृतौ मकारं ५
विलापयेत्तस्य च तारकस्य लीनस्य तस्यां प्रकृतौ परो यः॥ चतुर्थमात्रात्मकतारनादध्येयः समुत्कृष्टतरोस्ति देवः ६ सो
यं महेश्वरो विबुधैरुपास्यः संसारबंधस्य विनाशनाय॥ अनेन मंत्रेण तु पूर्वमुक्तं प्रपंचितं स्याज्जगनाख्यवस्तु ७
तस्मिंस्त्वनुपास्यं गुणजातमीशेस्त्वमूर्धादिकमुच्यतेत्र॥ समस्तलोकात्मविराड्वपुः स्यादीशस्य चैवं सति यो
स्मदादेः ८ मूर्धादिकः सोपि तदीय एवेत्यनंतमूर्धा परमेश्वरः स्यात्॥ सर्वास्मदीयानि विलोचनानि तस्यैव वि
श्वाक्ष उदीरितोतः ९ तं सर्वलोकस्य सुखस्य हेतुं श्रीमन्महेशं परिचिंतयीत॥ विराड्वपुःस्थस्य महेश्वरस्य रूपं नि
जं मंत्रगतोत्तरार्धे १० विश्वस्य विष्णोपरिकल्पितत्वाद्विश्वात्मकोयं परमेश्वरः स्यात्॥ नरो भवत्वान्ययनं यतस्त्वं
नारायणो देव इतीरितश्च ११ इंद्रादिरूपेण च संस्थितत्वात्तथाक्षतेन क्षरतीति चासौ॥ हेतुत्वतः स्यात्परमः प्रकृ
स ष्टः प्रभुः समर्थः सकलं नियंतुं १२ जध ओघतः परमः प्रकृष्टो नाशो न हीनो भवतीति नित्यः॥ विश्वस्य सर्वात्मक उच्य राम: २४
ते यं नारायणत्वं तु निरुक्तमस्य १३ हरस्य यत्तेन हरिर्यदेतज्जगत्प्रतीतं पुरुषोर्थतस्तत्॥ विश्वं तदस्य व्यवहा

रसिद्ध्यैसमाश्रयेदिस्वरूपजीवतीति १४ अत्रप्रतीतःपुनरुक्तदोषोमंत्रांतरत्वेननिवारणीयः॥ तथातथाध्येयतया
स्फुतिखान्नास्त्येवत्वासौपुनरुक्तिदोषः १५ पतिर्जगत्पालनतोनियंतात्जीवात्मनोतेनतदीश्वरःस्यात्॥ निसत्व
तःशाश्वतशाब्दितःस्याच्छिवोमहामंगलमस्तुतच्च १६ भवेन्महान्व्योढतयेतरेषुयतोमहाज्ञेयइतीरितोतः॥ विश्व
स्वरूपःप्रकृतित्वतःस्यात्परायणंश्रेष्ठसमाश्रयत्वात् १७ नारायणोब्रह्मणएवतत्त्वंमहत्त्वतोसोपरएवत्वात्मा॥
ज्योतिर्यदुत्कृष्टमुदीर्यतेतन्नारायणोतःपरमात्मरूपः १८ अस्मिन्लोकेदृश्यतेयत्त्वकिंचिद्दूरस्थंवाश्रूयतेतत्स
मस्तं॥ अंतर्बहिश्चव्यापनारायणोसावास्तेयस्मात्स्यादुपादानहेतुः १९ परिच्छेदहीनंविनाशव्यपेतंसमस्त
क्रमंतंसमुद्रेभवाब्धौ॥ स्वत्वस्याखिलस्योद्भवस्योपजीव्यंभजेतामुमेवापवर्गस्यसिद्ध्यै २० नारायण
स्यसद्रूपंसंगृह्योक्तंतुपूर्वतः॥ उत्तरार्धेनमंत्रस्योपासनस्थानमुच्यते २१ पद्मस्यमध्याच्छिद्रेणतुल्यंहृदय
शाब्दितः॥ लौकिकंपद्ममूर्ध्वास्यंहृत्पंकजमधोमुखं २२ ग्रीवाबंधाधःप्रदेशोस्तिनाभेरूर्ध्वेभागेयावित
स्तिस्तदंते॥ नाभिग्रीवाबंधमध्येहृदब्जंजानीयात्तत्सर्वलोकास्पदंस्यात् २३ मनोहिहृदयाब्जोस्तितेनेदं
कल्पितंजगत्॥ ततोहृदब्जंविश्वस्यमहदायतनंस्मृतं २४ हृत्पंकजंपंकजकुड्मलाभंमध्येशरीरस्य
तुलंबतेधः॥ व्याप्तंशिराभिर्हृदयस्यचांतेसमीपदेशेसुषिरंचसूक्ष्मं २५ नाडीसुषुम्नाप्रथिताहितस्या

नालंतुसूक्ष्मंस्फाषिराभिधेयं॥तस्मिञ्जगत्तिष्ठतिलग्नचित्तेप्रतिष्ठितेसर्वपातीहितिष्ठति २६ तन्नालमध्ये
स्यनलःप्रवृद्धोयुतःशिखाभिर्बहुभिस्ततश्च॥सर्वासुनाडीषुशिखाविशेषैर्व्याप्यैवतोविश्वमुखःसवाग्निः
२७ भुंक्तेयगान्नंविभजन्शरीरेसर्वंस्वभुक्तंसमवास्थितोन्नं॥नजीर्यतेसोजरयेत्स्वभुक्तंकाविःस्मृतोयंकुश
तोतएव २८ आस्यपादस्यतलंशिरोंतंसंतापयत्यग्निरयंस्वदेहं॥तदग्निमध्येऽग्निशिखातिसूक्ष्मा नाले
नमूर्ध्वेतमवास्थितासो २९ मध्येस्थितानीलघनस्थविद्युल्लेखेवसादीप्तिमतीवतन्वी॥स्यात्सीतवर्णाचलन्
पर्ण्वभासासूक्ष्मांतरापामुपमानयोग्या ३० स्थितःशिखायाज्वलनस्यमध्येतस्याःपरेशोजगदेकहेतुः॥
ध्यानंचतस्याल्पमुपासनार्थंतथापिनाल्पोपितुस्तवेरूपः ३१ ब्रह्माशिवःस्वर्गपतिःसईशोमायाविशेषो
क्षरउच्यतेसो॥मायाविहीनःपरमोतएवस्वातंत्र्यतःस्यात्स्वयमेवराजा ३२ ब्रह्मातिसत्यंसमुपासकानामनु
ग्रहायैववपुमानुमेशः॥स्याद्दक्षिणेपिंगलवर्णयुक्तोवामेतुकृष्णोभवऊर्ध्वरेताः ३३ स्वकीयरेतःखलुनीलकंठः
स्वब्रह्मरंध्रेधृतवान्महात्मा॥अयंविरूपाक्षउदीरितःस्यात्त्रिलोचनत्वात्तमिमंमहेशं ३४ स्मसाप्रणामःक्रियते
चतस्मैविश्वात्मकायाखिलहेतुभावात्॥श्रीकार्तिकेशंप्रणमाम्युमेशंत्रिलोचनंब्रह्मपरंतदास्मि ३५॥ ॥इतिश्रीमत्पुरु
षोत्तमानंदतीर्थयतिवरप्रणीतेश्लोकबद्धवेदांतन्यायरत्नावलीग्रंथस्थेतैत्तिरीयनारायणीयोपनिषद्गतदहरोपासना
व्याख्यानंसमाप्तं॥आदितःपादादितएतावत्पर्यंतमाद्यंतकारिका४ २७४ १००९ इतिश्री॰ऽथप्रथमाध्यायेज्ञेयब्रह्मलिंगक
वाक्यसमन्वयाख्यतृतीयपादेअष्टसूत्रंदहराधिकरणंपंचमं ५ अनुकृतेस्तस्यच १

न विल क्षणत्वादस्य तथात्वं च शब्दात् ।१। विलक्षणत्वाज्जगतो नात्मप्रकृतिकं जगत् । अचेतनत्वादिरूपं वैलक्षण्यं श्रुतं श्रुतेः ।१२।
अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां ।२। प्राणादीनां चेतनत्वं श्रुतौ संवाददर्शनात् । इति शंकापनोदार्थं तु कारः सूत्रगो ध्रुवं ।१३।
प्राणादिकाचेतनाभिमानिनां हि दिवौकसां । विशेषानुगतिभ्यां स व्यवहारो वधार्यते ।१४। श्रुतौ विशेषिताः प्राणा देवतात्वप्रकारतः ।
तत्राभिमानिदेवानां तत्त्वशब्दाभिधेयता ।१५। तत्र तत्रार्थवादेभ्यो मंत्रेभ्यश्चावगम्यते । अतो विलक्षणत्वेन नात्मप्रकृतिकं जगत् ।
।१६। विशुद्धं चेतनं ब्रह्म जगज्ज डमशुद्धिभाक् । तेन प्रधानसारूप्यात्प्रधानस्यैव विक्रिया ।१७। इत्याक्षिप्य समाधत्ते दृश्यते त्वि
ति सूत्रतः ।१८। दृश्यते तु ।३। दृश्यते तु नखादीनां जडानां चेतनाज्जनिः । अचेतनाच्च पंकादेः कृम्यादिप्राणिसंभवः ।१९। सारू
प्यस्य विशुद्ध्यादेरभावेपि चिदाश्रिता । दृश्यते जडकार्येषु सत्तारूपा सरूपता ।२०। सर्वसाम्यं न कुत्रापि दृश्यते हेतुकार्ययोः । तथात्वे भिन्न
ताबुद्धिर्नैव स्याद्विशेषतः ।२१। असदिति चेन्न प्रतिषेधमात्रत्वात् ।४। नामरूपविहीनाद्धि यदि चेज्जायते जगत् । असत्स्याज्जन्मतः पूर्व
मभावान्नामरूपयोः ।२२। सत्कार्यवादभंगः स्यात्तथात्व इति चेन्न तत् । असच्छब्देन सद्दस्य प्रतिषिद्धत्वमात्रतः । सिध्यसत्त्वनो न स्यसे
तः सत्कारणात्मना ।२३। [illegible]
[illegible] नामरूपविहीनमपि जगदु
पादानं ब्रह्म सत् । सद्रूपकारणात्मना सत्त्वेः पूर्वमनंतरं च जगत्सत्त्वं ब्रह्मस्वरूपसत्तातिरिक्तं जगत्सत्तायाः पुरुष एवेदं सर्वमि[illegible]दिश्रुतिभिर्ने
ह नानास्ति किंचनेति श्रुत्या सद्रूपे ब्रह्मणि नानात्वविशेषाद्बाधाभावसा[illegible]धारणनानात्वस्य पारमार्थिकत्वेन प्रतिषिद्धत्वादिति भावः । सत्त्वस
त्ता इति पर्यायशब्दौ । सत्तायाः सत्त्वानंगीकारे असत्त्वापत्तिः स्यात् । तत्र प्रत्ययः प्रमेयप्रमेयत्वशब्दवत् प्रकृतार्थस्यैव बोधक इति भेदपि
कारस्य ग्रंथकृद्भिरुक्त[illegible] । प्रमेयत्वस्य प्रमेयत्वानंगीकारे प्रमेयत्वमप्रमेयं स्यादतः प्रमेयप्रमेयत्वशब्दयोः पर्यायत्वमिति तदाशयः ।
। अतः कार्यमसत्स्यादिसाक्षेपो वाचारंभणमात्रमिति साभिप्रायः ।२४।

ये
अपीतौ तद्वत्प्रसंगादसमंजसं ।५। कार्यवत्कारणे दोषाः स्युर्लैः कारणात्मना । अतोऽसमंजसं ब्रह्मोपादानमिति शंकते ।२४। परिहर
ति । न तु दृष्टांताभावात् ।६। कारणे लीयमानं हि कार्यं स्यात्कारणात्मकं । नैव कार्यात्मको हेतुर्दृष्टांताभावतस्ततः ।२५। नैव कार्यं दूषयति
कारणं स्वं निजैर्गुणैः । यथा नित्यत्वे प्रकृतिर्नो नित्या कार्यधर्मतः ।२६। स्वपक्षदोषाच्च ।७। वैलक्षण्यादयो दोषा उक्ता ब्रह्मसमन्वये ।
त सांख्यैस्ते तेषां तु स्वपक्षेप्येव संभवात् ।२७। अपि स्मृतमेवं दृष्यत्वादसमंजसं । नास्मन्मतमनिर्वाच्यख्यातिवादमुपेयुषां ।२८। तर्का
प्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसंगः ।८। वेदोक्ते हि तदनुमानस्य मेयानिश्चायकत्वतः । अपि तेनानुमानेन
नाद्वैतमसमंजसं ।२९। आम्नायनिरपेक्षेणानुमानेन बलीयसा । तदन्यथानुमेयं स्याद्द्वैतमिति चेच्छृणु ।३०। वेदानपेक्षा
नुमाने स्वे स्वे स्वसमले न हि । निर्दुष्टत्वस्य कथनाद्बुधैर्वैविध्ययोगतः ।३१। नियामकाभावतश्च व्यवस्थापादयुत्तेति तु । अनिश्चया
दनिर्मोक्षप्रसंगः स्याद्विशेषिणां ।३२। वेदाविरुद्धतर्कस्तु सर्वेषामिष्ट एव हि ।३३। तस्मात्साक्षाद्वेदमूलाद्द्वैतवादसमन्वये ।
सांख्यतर्कविरोधो नो श्रोतव्यात्खंडनादपि ।३४। इति श्री सांख्यतर्कखंडनं नामाष्टसूत्रं तृतीयाधिकरणं ।३। एते
न शिष्टापरिग्रहा अपि व्याख्याताः ।१। एतेन शिष्टैस्सांख्यमतापाकरणेन वै । शिष्टानिष्टकणादादिस्मृतितर्का नि
राकृताः ।३५। इति स्वमन्वादिवैदिकशिष्टापरिगृहीतकणादादिमतखंडनं नामैकसूत्रं चतुर्थाधिकरणं ।४। भो
क्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ।१। भोक्तृब्रह्मात्मकत्वेन भोग्यस्य जगतः सदा । भोक्तृत्वापत्तितो न स्यात्परस्परविभि
न्नता । प्रत्यक्षसिद्धा भोग्यानामिति चेदुत्तरं शृणु ।३६। मृदात्मना ह्यभिन्नानामपि भेदः परस्परं । शरावक
शादीनां तथा भोग्यभिदा मिथः ।३७। नाहं कार्यात्मको हेतुः कार्यं वै कारणात्मकं । तेन कार्यविभेदेपि कारणेन भिदा

भवेत्।३८। नाद्वैतवादः श्रुत्युक्तः प्रत्यक्षेण हि बाध्यते। व्यावहारिकभेदेन प्रत्यक्षस्य कृतार्थता।३९। इति६एकसूत्रं कार्यस्योपा
दानकारणाभेदेऽपि कार्यस्य मिथो भेदसाधकं पंचमाधिकरणं।५। तदनन्यत्वमारंभणशब्दादिभ्यः।१। असत्वे हि पृथक्त्वेन त
स्मात्कार्यस्य कारणात्। आरंभणादिशब्देभ्यः श्रुतिगेभ्योऽवगम्यते।४०। पृथक्सत्ताशून्यतात्रानन्यत्वं कारणादिह। नेह तु
कार्ययोरैक्यं कार्यमिथ्यात्वतो हितं।४१। वाङ्मात्रव्यवहार्यत्वं तद्वाचारंभणमुच्यते। वंध्यासुतादिवद्घटरज्जुसर्पादिवा
स्तवं।४२। निवर्त्यज्ञानतोऽत्रेष्टं वाचारंभणशब्दतः। न चात्यंतमसत्त्वस्यानुपयोगाद्विवक्षितं।४३। सदेव सोम्येत्याद्यत्रसादि
श्रुत्याद्विवक्षितं। शुक्तिजातं सद्रूपमपि हेतुनन्यत्वसाधकं।४४। तद्बुद्धिर्यत्तु लोकानां नांतदभाववती हि सा। भ्रमाध्यासारोपश
संभूय ब्दैर्विद्वद्भिः परिकीर्त्यते।४५। सत्यानृतयोर्मिथुनी ... ध्यासलक्षणं। अनाद्यविद्याध्यासस्यासाधारणतयेष्यते।४६। आरो
पो द्विविधः प्रोक्तो नाहार्याहार्यभेदतः। अधिष्ठानावबोधेनानाहार्यस्तु निवर्तते।४७। आहार्यः स्वेच्छयैवेह जायते विनिवर्तते। म
णिमंत्रादिजारोपलब्धत्वच्च बाधितिष्ठति।४८। आहार्यो द्विविधः प्रोक्त आरोपः शास्त्रकोविदैः। आश्रयाहृतिपूर्वश्च तदनाहृति
पूर्वकः।४९। ऐंद्रजालिकसर्पादिराश्रयाहृतिपूर्वकः। अयं धूर्जटिरित्यादिस्तदनाहृतिपूर्वकः।५०। भावे चोपलब्धेः।२। हे
तोर्नियतसत्त्वेन ज्ञानपूर्वकमेव यत्। कार्यसत्त्वपरिज्ञानं स्यात्तस्मादप्यनन्यता।५१। भावपदं कारणसत्तोपलब्धिपरं। उप
लब्धिपदं कार्यसत्त्वोपलब्धिपरं। विकारः कारणादनन्यः। कारणसत्तोपलंभानुविधायिसत्तोपलंभकत्वात्। यन्नैवं
तन्नैवं यथा घटात्पटः। अतः आरंभणादिश्रुत्योऽनुमानेन च कार्यस्य कारणानन्यत्वमित्यर्थः। अस्य सूत्रस्य पाठांतर
।५१।

अथाविरोधाख्यद्वितीयाध्यायारंभः। स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्।१। सर्वज्ञे सर्वशक्त्या
ढ्ये जगज्जन्मादिकारणे। परब्रह्मण्यभ्युते वेदांतानां समन्वये।१। महर्षिकपिलप्रोक्ता सांख्यस्मृतिरतिस्फुटं। जगतः कार
णं वक्ति प्रधानं बहुयुक्तिभिः।२। तस्या अनवकाशत्वदोषस्यात्र प्रसंजनं। इति चेन्न तथा वाच्यमुक्तब्रह्मसमन्वये।३। श्रुतिमूला
स्मृतिस्त्वन्या मन्वादिविहिताऽस्ति या। तस्या अनवकाशत्वदोषस्यात्र प्रसंगतः।४। दृष्टश्रुत्यनुसारिण्या स्मृत्या सा मन्वादिकीर्तकया।
कपिलाख्यमुनिप्रोक्ता निर्मूला बाध्यते स्मृतिः।५। अतर्ई त्रोविरुद्धो न वेदांतानां समन्वयः। श्रुतौ प्रसिद्धः कपिलः सर्वज्ञो विष्णु
रेव सः। योऽवतीर्णो देवहूत्यां कर्दमाख्यात्प्रजापतेः।६। सांख्याचार्यस्तु कपिलः सोऽग्निवंशसमुद्भवः। सांख्यशास्त्रप्रवक्ता स
इत्युक्तं ह्यादिपर्वणि।७। इतरेषां चानुपलब्धेः।२। परिणामतयोक्तानि प्रधानस्येतराणि च। महदादीनि तत्त्वानि सांख्ये यानीह ता
नि तु।८। तात्विकानि न दृश्यंते दृष्टश्रुतिषु केवलात्। साक्षात्काराद्ब्रह्मणस्तु निवर्त्यानीति दृश्यते।९। प्रधानादीतरेषां च ह्यन्यत्रानु
पलब्धितः। सांख्यस्मृतिः ... प्रमाणं नो प्रधानाद्यनुसारिणी।१०। इति भगवद्वेदव्यासप्रणीतशारीरकब्रह्मवेदांतमीमांसासू
त्रेषु अविरोधाख्यद्वितीयेऽध्याये स्मृत्यविरोधतर्काविरोधाख्यप्रथमे पादे अधिकरणार्थसंग्राहककारिकासु सांख्यस्मृ
तिखंडनाधिकरणं द्विसूत्रं प्रथमं।१। एतेन योगः प्रत्युक्तः।२। सांख्यस्मृतेर्निरासेन विरुद्धा या पतंजलेः। स्मृतिर्या योगशा
स्त्राख्या ज्ञेया सापि निराकृता।११। इति श्री सुविरुद्धत्वात्तत्त्व प्रधानाद्यंशे योगशास्त्रखंडनं नामैकसूत्रं द्वितीयाधिकरणं।२।

दिहेतुना। इत्याक्षिप्य समाधत्तेऽधिकं त्वित्यादिसूत्रतः। ६७। अधिकं तु भेदनिर्देशात्। २। शारीरादधिकं ब्रह्म सर्वज्ञं सर्वशक्ति च।
नित्यमुक्तं नित्यशुद्धमुपादानं स्वयंप्रभं। ६८। स्वस्वरूपानभिज्ञेन ज्ञेयं जीवेन मुक्तये। इति भेदेन निर्देशात्प्रोक्तदोषप्रस
ञ्जनं। ६९। फलितं दोषदृष्टिः स्याद्विद्यातत्त्वज्ञान। जीवाभेदप्रधीशस्य न जीवाहितकारिता। ७०। व्यावहारिकभेदस्य ह्यामुक्ते
रनिवर्तनात्। अज्ञो जीवः स्वसंसारं यथार्थं परिपश्यति। ७१। मिथ्यात्वं संसृतेः स्वस्य निर्लेपत्वं च सर्ववित्। औपाधिकेन भेदेन सा
नियम्यानियन्तृता। ७२। अश्मादिवच्च तदनुपपत्तिः। ३। यथा पृथ्वीत्वसामान्यान्विताश्मादिविचित्रता। तथैकब्रह्मकार्याणां स्वाध्यस्तात्म
नतोभिदा। ७३। अतो वैचित्र्यदोषस्योपपत्तिर्न वैचिती। ७४। इति श्री सु त्रिसूत्रं हिनाकरणादिदोषखंडनाधिकरणं सप्तमं। ७। उपसंहा
रदर्शनान्नेति चेन्न क्षीरवद्धि। १। यथा लोके कुलालादेर्घटाद्युत्पादने सदा। चक्रचीवरदंडादिः सहायो दृश्यतेऽपि च। ७५। उपादानस्य म
त्स्यादेः कुलालादिः सहायकः। उपसंहारशब्दार्थः सहायादर्शनात्तथा। उपादानत्वकर्तृत्वे ब्रह्मणो नेति चेच्छृणु। ७६। विना बाह्यं सहा
यं हि पयसोऽदधिकर्तृता। उपादानत्वं च तथा ब्रह्मणोऽप्युभयात्मता। ७७। अग्नितापाकृयोगादिर्यद्बाह्यं साधनं तु तत्। दधिभावत्वरा
यां हि केवलं दधिजन्मनः। ७८। देवादिवदपि लोके। २। लोकशब्देन दृष्टवेदे देवर्षिपितरो यथा। संकल्पादेव नानानो कानानारूपास्तथैव चित्। ७९।
इति श्री सु बाह्यसहायखंडनं नामाद्विसूत्रमष्टमाधिकरणं। ८। कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा। १। कृत्स्नांशप्रसक्तिः स्यात्कृत्स्नं चेत्प
रिणामवत्। एकांशो चेदवयवशून्यत्वश्रुतिबाधनं। ८०। इत्याक्षिप्य समाधत्ते श्रुतेस्त्वित्यादिसूत्रतः। ८१। श्रुतेस्तु शब्दमूलत्वात्। २। श्रुताव
वश्रूयते हि विकृतेर्हेतुनन्यता। कार्यातिरेकतः सत्वं तत्रैव श्रूयते च नः। ८२। अन्यथानुपपत्त्यैवोभयोरप्येकधर्मिणि। विवर्तवादः श्रुत्यैव भव

३

त्प्रकटीकृतः। ८३। एकविज्ञानतः सर्वविज्ञानप्रतिपादनं। तत्क्यानुपपत्त्यैव विवर्तपरमुच्यते। ८४। आत्मस्य परिणामाख्यवादमाशंकितं
हि तत्। श्रुतावेवं श्रुतेः कृत्स्नप्रसक्त्यादिर्न सिध्यति। ८५। कारणानन्यसत्ताकं प्रतीतं हेतुनोन्यथा। ज्ञानमात्रनिवर्त्यं न द्विवर्तं श्रुतिसाक्षि
तं। ८६। श्रुतिमात्रप्रमाणो न ज्ञेयं निर्धर्मकं स्वहतु। श्रुतिमूलत्वतो ब्रह्मांगी कार्यं हि यथाश्रुतं। ८७। आत्मनि चैवं विचित्राश्च हि। ३। यथा
निरंशेऽपि तस्य स्वप्नदृष्टिस्थः। मायाविनि यथा लोके मंत्राद्यैर्बहुरूपता। एवं ब्रह्मणि विज्ञेया विचित्राः सृष्टयोऽखिलाः। ८८। स्व
पक्षदोषाच्च। ४। मूलाख्यां प्रकृतिं सांख्या निर्विकारां निरंशकां। परिणामवतीं प्राहुर्नित्यां मूलस्वरूपतः। ८९। परमाण्वोस्तु संयोगद्वा
रा सृष्टिं तु तार्किकाः। कृत्स्नप्रसक्त्यादिदोषः सांख्यपक्षे स्फुटः खलु। ९०। तस्य दोषस्य संप्राप्तिस्तार्किकाणां मतेऽपि हि। अव्याप्यवृत्तिसं
योगः किं वा स्याद्व्याप्यवृत्तिकः। ९१। निरंशित्वमणोर्योगो न स्यादव्याप्यवृत्तिकः। अव्याप्यवृत्तिता सोकापास्याद्देशावृत्तिता। संयोगे व्या
प्यवृत्तित्वं न साक्षात्कापि दृश्यते। ९२। व्याप्यवृत्तित्वपक्षे स्यान्नभानं युक्तयोर्द्वयोः। अवच्छेदेन येनासौ दृश्यते सति रोहितः। ९३। कृत्स्न
प्रसक्त्यादिदोषवादिनां पक्ष एव हि। सदोषः स्याद्विवर्ताख्यवादे शंका न युज्यते। ९४। इति श्री सु चतुःसूत्रं कृत्स्नप्रसक्त्यादिदोषख
ण्डनपूर्वकं विवर्तवादसमर्थनाधिकरणं नवमं। ९। सर्वोपेता च तद्दर्शनात्। १। सर्वशक्तियुता गात्रहीनापि परदेवता। तत्सर्वशक्तियोगस्य
श्रुतौ सम्यक्प्रदर्शनात्। ९५। विकरणत्वान्नेति चेत्तदुक्तं। २। नेत्रादिकरणाभावान्नसा कर्त्रीति चेन्न तत्। अबाधकत्वमश्रौततर्कस्योक्तं पुरैव
तत्। ९६। इति श्री सु द्विसूत्रं दुर्घटघटकशक्तिमत्वाधिकरणं दशमं। १०। न प्रयोजनवत्वात्। १। फलेच्छया यथा लोके कर्तृत्वं दृश्य
ते तथा। स्रष्टृत्वं निस्तत्त्वस्य ब्रह्मणो घटते न हि। फलाभिसंधिविरहादित्याक्षिपति सांख्यवित्। ९७। समाधत्ते लोकवत्तु लीलाकै
वल्यं। २। व्यवच्छेदः फलेच्छाया अत्र कैवल्यशब्दतः। ९८। स्वभावतः कृचिल्लोके लीलारूपाः प्रवृत्तयः। राजादेरात्तकामस्य

थातद्दर्शिहेशितुः।९८।अनिच्छन्क्रीडमानो वा दृश्यतेतिलघुः शिशुः।अथवा केवलाभ्रांतिः सा सृष्टिः स्वप्नसृष्टिवत्।९९।
इतिश्री॰सु द्विसूत्रं स्वाभाविकलीलापरनामकप्रवृत्त्यधिकरणमेकादशं।११।वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति।१।
स्रष्टुर्वैषम्यनैर्घृण्ये प्राणिकर्मवशान्नहि।यथायं कारयत्यात्मा तथा दर्शयति श्रुतिः।१००।न कर्माविभागादिति चेन्नानादित्वा
त्।२।सृष्टेः प्राक्कर्मणोऽसत्वमवाक्षिपति वै पुनः।सृष्टेः प्रागविभागावधारणात्कारणात्मनः।कर्मणः कर्मसापेक्षा न सृष्टि
रिति चेन्न तत्।१।सृष्टिबीजांकुरन्यायेनानादित्वाच्च कर्मणः।अनादित्वात्पूर्वपूर्वकर्माग्रे कारणं मतं।२।उपपद्यते चाप्युपलभ्यते
च।३।अकस्मात्कृतहान्यादिप्रसंगात्सृष्ट्यनादिता।युक्त्योपपद्यते वेदे च श्रुता वाप्युपलभ्यते।३।धाता यथापूर्वमकल्पयदि
त्यादिना स्फुटं।४।इतिश्री॰सु त्रिसूत्रं वैषम्यादिराहित्यबोधकं द्वादशमधिकरणं।१२।सर्वधर्मोपपत्तेश्च।१।उक्तरीत्या म
हामाये सर्वज्ञे परमात्मनि।सर्वेषां हेतुधर्माणां संभवात्तत्समन्वयः।१०५।इतिश्री॰सु एकसूत्रं मद्वितीयात्मनि अनाद्य
ध्यस्तमायया सर्वज्ञत्वादिसर्वधर्मोपपत्त्यधिकरणं त्रयोदशं।१३।इतिद्वितीयाध्यायेऽविरोधाख्ये स्मृत्यविरोधनकीविरो
धोनाम त्रयोदशाधिकरणात्मकः प्रथमः पादः।१।अत्र पादे सूत्रसंख्या।३७।अथ विरुद्धमतखंडनाख्यो विरोधाख्यद्वि
तीयाध्याये द्वितीयपाद आरभ्यते।ईक्षत्याद्यधिकरणचमसाद्यानुमानिकैः।त्रिभिरत्राधिकरणैर्वेदांतप्रतिपाद्यता।निराकृता
प्रधानस्य तेनात्रार्थं न दीर्यते।१।अचेतनप्रधानस्य जगद्धेतुत्वसाधने।वेदानपेक्षयुक्तीनामप्यभावोऽत्र कथ्यते।२।रचना
नुपपत्तेश्च नानुमानं।१।कर्तव्यकौशलैः शून्याच्चेतनेनाप्रवर्तितात्।रचनायाअशक्यत्वान्न प्रधानं हि कारणं।३।

मात्रिसमसत्त्वज्ञानादप्यनन्यत्वं सिध्यतीत्याह।भावाच्चोपलब्धेः।इति।२।वितानालानसंयोगवंतस्तंतव एवहि।पट इत्यप्य
नन्यत्वे सत्वज्ञानसत्वतः।५२।कार्यस्याकारणावस्था विशेषस्तथ्यतात्त्विकं।निवर्त्यं कारणाज्ञानाभिव्याप्युत्पद्यते चि
ति।५३।विशेषः कालिको वस्तोः स्मरः।५३।सत्वाच्चावरस्य।२।उत्पत्तेः प्राक् श्रुतौ सत्वश्रवणात्कारणात्मना।तदूर्ध्व
मप्यनन्यत्वं विकारस्य हि कारणात्।५४।असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्।४।असद्वा इदमित्या
दिश्रुतिभिः कारणात्मना।विकारासत्वकथनादसत्वमिति चेन्न तत्।५५।अव्याकृतस्वरूपेण सत्वं धर्मांतरेण
हि।असद्वा इदमित्यादिश्रुतिभिः प्रतिपाद्यते।अव्याकृतमसच्छब्दाद्बोध्यते वाक्यशेषतः।५६।युक्तेः शब्दांतराच्च
।५।उत्पन्ने घटोऽत्रेति प्रयोगे कारणात्मनां।विनोत्पादाश्रयत्वेन न प्रतीयात्सुराजने।५७।किंच मृद्घट इत्यादि सामानाधिकरण्यतः।मृत्कुंभयोः
प्रतीतिर्न भूयात्ताक्वभेदसंघटः।५८।इत्यादियुक्तिभिः कार्यमनन्यत्सत्त्वहेतुगं।असच्छब्दान्यसच्छब्दाच्छ्रुतिगादपि तत्तथा।५९।पटवच्च।
।६।पूर्वसूत्रोक्तयुक्तीनां प्रपंचः क्रियतेऽधुना।विभिन्नधर्मवत्वेन प्रतीता वपुनोऽभिदा।प्रसारितो वेष्टितो वा न हि भिन्नोऽपि पटो यथा।६०।यथा च प्राणादिः।
।७।विभिन्नकार्यकारित्वमपि नो भेदसाधकं।यथानिरुद्धः प्राणादिः कार्यं जीवनमेव हि।६१।आनिरुद्धः स एवान्यत्करोत्याकुंचनादिकं।६२।नैताव
न तास्य हेतोः स भिन्नो भवति मारुतात्।तस्मादन्यता हेतुकार्ययोरुक्तहेतुभिः।६३।एकविज्ञानतः सर्वविज्ञानप्रतिपादनं।कार्यस्य हेत्वनन्यत्वास्सि
द्धं भवति वेदगं।६४।इतिश्री॰सु सप्तसूत्रं कार्यस्योपादानसत्तातिरिक्तसत्ताशून्यत्व बोधनद्वारा मिथ्यात्वप्रतिपादकं तदनन्यत्वाधिकर
णमष्ठ।६।इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।१।शारीरस्यात्मनो ब्रह्माभेदेन व्यपदेशनात्।चितो वा जीवभावेन प्रवेशव्यपदेशतः।
।६५।जीवे स्याद्धितकारित्वमुखदोषसमागमः।ब्रह्मण्यपि च दोषाः स्युर्जीवभावेन सर्जनात्।६६।तस्मान्न युक्ता हि चितो जगज्जन्मा

प्रधानं नेदुःखमोहसुखात्मकमिति स्थितिः। सुखादीनामांतरत्वादुपादानं नतद्वहिः। ४। प्रवृत्तेश्च। २। अचेतनरथादी
नांप्रवृत्तेश्चेतनेन तु। प्रवर्त्तितत्वं दृष्टं हि प्रधानं न प्रवर्त्तते। ५। प्रवर्त्तते स्वतंत्रं तदिति सांख्यागमोऽशुभः। ६। साम्यावस्थाप्रच्यु
तिस्तु चेतनप्रेरणां विना। घटते न प्रधानस्य तस्मान्नो विश्वहेतुता। ७। पयोंबुवच्चेत्तत्रापि। ३। वत्सार्थं तु यथा क्षीरं स्वयमे
व प्रवर्त्तते। यथा वा स्पंदते नीरं प्रधानं तद्वदिति चेत्। ८। परमात्मा प्रेरको हि तत्रापि श्रूयते श्रुतौ। ९। व्यतिरेकानवस्थितेश्चा
नपेक्षत्वात्। ४। किंच स्वतंत्रे हेतुत्वे सहायमनपेक्ष्य तु। कार्याभावावस्थितिस्तु न कदापि भवेत्सदा। कार्योत्पत्तिप्रसंगः स्यादतोऽ
व्यक्तं न कारणं। १०। [struck] अन्यत्राभावाच्च न तृणादिवत्। ५। अनपेक्ष्य तृणं यद्वन्निमित्तांतरमंबु तु। क्षीरी भवति तद्वद्धि प्रधानमि
ति चेन्न तत्। ११। तृणादिकं तु धेन्वादिसापेक्षं हि पयो भवेत्। बलीवर्दे क्षीरभावाभावस्य खलु दर्शनात्। १२। अभ्युपग
मेप्यर्थाभावात्। ६। स्वभावेन स्वतंत्रस्य प्रवृत्त्युपगमेपि वै। नापेक्षा पुरुषार्थस्य भविष्यति सहायवत्। १३। भोगापवर्गार्थ
तस्य हानिः सांख्यमते भवेत्। १४। यद्वा प्रयोजनोपेतप्रवृत्त्युपगमेपि वै। भोग्यानंसान्नमोक्षः स्यात्सर्वभोगोतएव न। १५।
साम्यावस्थाच्युतेः पूर्वस्वरूपस्थितिलक्षणा। मुक्तिः सिध्यैव वा प्रवृत्तिरपि स्यादफलत्वतः। १६। भोगार्थं चापवर्गार्थं प्रवृत्तिर्नो
चिता ह्यतः। अल्पभोगेन चेन्मुक्तिस्तर्हि स्यात् समपात्रतः। १७। कृते भोगे प्रधानस्यानिवृत्तेर्वाह मोक्षणात्। स्वभावेन स्वतंत्रस्य स
हकार्यनपेक्षणात्। अयुक्तं सहपुरुषान्यताख्यातिप्रतीक्षणं। १८।

पुरुषाश्मवदितिचेत्तथापि।७।पंगुरंधमयस्कांतोलोहंयद्वत्तद्वर्त्तयेत्।अप्रवर्त्तनोपिपुरुषःप्रधानंवर्त्तयेदितिचेत्।१९।तथापिप्रकृतौ
हानिःस्वातंत्र्यस्यभविष्यति।कौटस्थ्यहानिःपुरुषेतद्वनिष्टंनयेतव।२०।वाग्व्यापारस्त्वस्तिपंगावयस्कांतेतुसान्निधिः।व्यापारो
स्तितत्तोलोहेंऽधेप्रवृत्तिरनर्गला।२१।पुरुषेनित्यसंयोगोव्यापारस्तेननोहितः।हितश्चेन्नित्यसंयोगःस्यान्निवृत्तिःकदापिन।
।२२।आधिदैविकनियोक्तृमिष्टमद्वैतिनांनृये।२३।अंगित्वानुपपत्तेश्च।८।साम्यावस्थागुणानांयाप्रकृतिःसेतिकथ्यते।तच्च्यु
सनंतरंतेषामंगांगीभवनेनहि।उत्पत्तिर्महदादीनामितिसांख्यमतस्थितिः।२४।कूटस्थनित्यासाप्रकृतिरितिचेदुत्तरंशृणु।
साम्यच्युतेरभावेनकार्यानुदयआपतेत्।२५।स्वरूपहानिःप्राप्नोतिप्रच्युत्युपगमेसति।विकारिणीसाप्रकृतिरितिचेदुत्तरं
शृणु।२६।स्युतश्च्युतोनिवृत्तिस्तुकदापिनभवेत्खलु।परंतुच्युतौपुंसःकौटस्थ्यहानिआपतेत्।२७।तस्माद्गुणानामंगांगिभा
वस्थासंभवेनवै।सेश्वरभावप्रसंगेनप्रधानंकारणंनहि।२८।अन्यथानुमितौचज्ञशक्तिवियोगात्।९।अव्यक्तस्यतुकार्यानु
मेयत्वात्साम्यभागिनः।अपिवैषम्याद्गुणानुमितौविश्वहेतुता।सुलभैवेतिचेदत्रप्रागुक्तंदूषणंस्मर।२९।तवेष्टस्यैवप्रधानस्य
ज्ञानशक्तेरभावतः।रचनानुपपत्त्यादिदोषःप्रागुक्तएवहि।३०।विप्रतिषेधाच्चासमंजसं।१०।महतःपंचतन्मात्रसर्गश्च
चिदहंकृतेः।क्वचित्सप्तेंद्रियाण्याहुःसांख्याएकादशक्वचित्।३१।ज्ञानेंद्रियंत्वगेवैकंरूपादेर्ग्राहकंक्वचित्।परस्परविरो
धाच्चनसांख्यंस्यादसमंजसं।३२।इतिश्री·सुदर्शसूत्रंप्रधानस्यरचनानुपपत्त्यधिकरणंप्रथमं।१।१।

येन हि। व्यवस्थायाअभावात्सस्समवायो न सिध्यति। ५३। तदसिद्धौ सृष्टिसिद्धिः समवायेन नो भवेत्। अतः कारणतावादो न युक्तः परमा
णुगः। तादात्म्य संबंधसत्वाद्दोषोऽद्वैतिनां नये। ५४। नियमेवं च भावात्। ३। यदा तु परमाणूनां स्यात्प्रवृत्तिस्वभावता। एवं भावात्सदा सृष्टेः प्र
लयः स्यात्कदापि न। ५५। सदा स्वभावप्रसंगः स्याच्चेन्निवृत्तिस्वभावता। अतः कारणतावा॰ गः। ५६। रूपादिमत्वाच्च विपर्ययो दर्शनात्। ४। स्थू
लाअनित्या रूपादिमत्वात्स्युः परमाणवः। स्वस्वकारणसापेक्षाः पटादौ दर्शनात्तथा। ५७। उभयथा च दोषात्। ५। वाय्वग्निजलभूभेदाच्चैत
वै धुपरमाणवः। क्रमेणैकैकवृध्याढ्यस्पर्शादिगुणका अमी। ५८। तथैकैकहासाढ्यगुणा व्युत्क्रमस्तुते। हेतवः पंचभूतानां सृष्टौ वैशेषिके नये। ५९। यद्यस्य
दधिकगुणं तत्तस्मात्स्थूलतामिति। एवं व्याप्तिस्तैजसादिपरमाणुष्वणुत्वघातः स्यात्। ६०। यद्येकैकगुणाः परमाणवः स्वीकृतास्ते स्युः। स्याद्रूपोपेतकार्ये
जा तैजसानामेव कारणता। ६१। आरंभंते स्वैर्नीयानगुणान्कारणगा गुणाः। इति। पार्थिवे नहेतुत्वमरूपाणां हि पार्थिवे। ६२। तस्मादुपचितापचितगु नां
णकत्वे परमाणूनां तदभावे वा। उभयथापि दोषसत्वाद्युक्तोऽणुकारणतावादः। ६३। अपरिग्रहाच्चात्यंतमनपेक्षा। ६। अनंगीकरणाच्छिष्टैर्दूषि
तत्वाच्च युक्तिभिः। वैशेषिकनयो भ्रांतिमूलो नो मानमूलकः। काऽर्पात्तस्मादुपेक्ष्यैव वैदिकब्रह्मवादिभिः। ६४। इति श्री॰ सुबद्धसूत्रं परमा
णुकारणतावादखंडनाधिकरणं तृतीयं। ३। समुदाय उभयहेतुकेऽपि तदप्राप्तिः। १। बुद्धागमो बुद्धशिष्यैर्बुद्धिवैचित्र्ययोगतः। प्रवर्तितो ने
कधा हि तत्रेति स्वड्यते धुना। ६५। वैभाषिकस्य शैघांते तथा सौत्रांतिकस्य च। द्वौ समूहौ जगत्सर्वं बाह्यआभ्यंतरस्तिति। ६६।
भूम्यादिपरमाणूनां समूहो बाह्यउच्यते। स्कंधानामथ पंचानां गण आभ्यंतरो मतः। ६७। रूपविज्ञानयोः स्कंधौ वेदनासंज्ञयोरुभौ। संस्कारस्कंध इत्येवं पंचस्कंधा उदी
रिताः। ६८। बाह्यमाभ्यंतरं सर्वं सत्सं च क्षणिकं मतं। घटाद्याकारभूतेन ज्ञानेन तु घटादयः। ६९। प्रत्यक्षेणानुमीयंते सौत्रांतिकमतं हि दं। वैभाषिकमते प्र॰ क्षाः वे
घटादयः। ७०। समम त्य द्वयोः पक्षएकयुत्याऽत्र खंड्यते। अणुस्कंधोभयारब्धो भयोरपि समूहयोः। ७१। असंभवः समूहस्य नियंतारं विना भवेत्। स्थिरस्चेत

२ प्रसक्षा ६

विज्ञानं नाम रूपे द्वे।

नश हि यात्स्वयं चाचेतनत्वतः। ७२। इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्। २। अविद्यासंस्कारौ षडायतनस्पर्शौ वेदनातृष्णाप्रवृत्तिश्च। ७३। भवजा
तीजरामरणे शोकः परिदेवनात तो दुःखं। अथ दुर्मनस्त्वमाद्याउत्तरोत्तरोत्पत्तिहेतवः पूर्वपूर्वे। ७४। घटीयंत्रवदनिशमावर्तंते परस्परहेतुभूतास्ते। द्विविधो हि कार्यो
त्पादो हेत्वधीनः कारणनिचयाधीन इति हि। ७५। तत्राद्यो बीजादंकुरोंऽकुरात्तत्र पत्रकांडं। अन्यस्त्वण्वाकाशकालविशेषादिमेलनादंकुरनि। ७६। इत्यादिर्हि मत
स्थितिः सामान्यतो नास्तिकानां वै तत्राद्यः पक्षः कार्योत्पादे स्ति चेदस्तु। ७७। कारणनिचयाधीनः कार्योत्पादो त्र नैव संभवति। इत्याह सूत्रकारो त्राक्षेपसमाधिभ्यां।
७८। अविद्याहेतुका जन्मादयो जन्मादिहेतुकाः। अविद्यादय इत्येवं हेतवस्ते परस्परं स्परं। ७९। मिथः कारणभावेन घटीयंत्रमिवानिशं। आवर्तमाने विद्यादौ जन्मम
सुजरादिके। ८०। अर्थाद्दाक्षिप्त एवात्र संघात उपपद्यते। विनापि चेतनं नियमिति चेन्नोपपद्यते। ८१। मिथः कारणभावस्याविद्याद्युत्पत्तिमात्रके। हेतुत्वेन
कृतार्थत्वान्न संघोत्पत्तिहेतुता। ८२। अभावान्नियमस्य हेतुः संघोत्पत्तिर्न सिध्यति। सूत्रस्य प्रत्ययपदं कारणार्थकमत्र हि। ८३। उत्तरोत्पादे च पूर्वनिरोधात्। ३।
कार्यावस्थितिकाले विद्यमानस्यैव मदादेः कारणता। दृश्यते न तु दृष्टं स्यभवन्मते सर्वक्षणस्थायि। ८४। कार्योत्पादक्षणे हेतोर्नष्टांगीकरणात्तथा। हेतु
ध्वीनोपि कार्याणामुत्पादो नैव संभवेत्। ८५। असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा। ४। हेतोः कार्याभ्युगमे ह्यसति स्याग मेवुया। हेतोः कार्या
भ्युगम प्रतिज्ञा सो च यथा भवेत्। ८६। आकार्यचेत्स्थितिर्हेतोः स्थितिः स्याद्युगपद्द्वयोः। एककालेऽतेन तथाक्षणिकोपगमो भवेत्। ८७। प्रतिसं
ख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्। ५। प्रमेयमात्रमुत्साद्यं क्षणिकं च त्रयं विना। बुद्धिपूर्वो बुद्धिपूर्वो नाशो नभ इदं त्रयं। ८८। अवस्तु भाव
रूपत्वे निरूपाख्यमिति स्थितिः। तत्रह्यावरणाभावस्त्वयाख्यो काशमुच्यते। ८९। यच्च स्वर्थक्रियाकारित्वं तत्सदिति कथ्यते। कार्यकारणभावेनत्र
याहो यो निरंतरं। भावानां सो त्र कथितः संतान इति सौगतैः। ९०। प्रतिसंख्यानिरोधः स्यात्तयोर्बुद्धिपूर्वकः। अबुद्धिपूर्वो नाशः संतानोच्छेद आ
नं विना। ९१। अबुद्धिपूर्वको नाशोऽप्रतिसंख्यानिरोधकः। संख्या बुद्धिरिति प्रोक्ता निरोधो नाश उच्यते। ९२। बुद्धिपूर्वाबुद्धिपूर्वनाशयोरप्यसंभवः। संतानिनश्च स
तानस्याविच्छेदान्मतेतयाः। ९३। नाशः क्षणव्यवहितो सत्स्त्वसंभवोपि च। नष्टे भावांतरोत्पादिक्रियायाअप्यभावतः। संतानिनामलीकत्वस्यात्खपुष्पवत्। ९४।

२ बुद्धिपूर्वकं।

२विना हेतुं कार्यनाशः सर्वत्रेतिमतंतव।

३ गता

उभयथाचदोषात्।६। सोपक्रवाख्यविज्ञानसंतानस्यक्षयोथवा। सर्वज्ञविज्ञानसंतानां तर्भावोविमुक्तता।९५। स्थिरत्वबुधिः क्षणिकेह्यविद्यात्रतदादिकं।
सम्यग्ज्ञानात्सौगतोकात्र श्यतीतिमतस्थितिः।९६। सम्यग्ज्ञानादविद्यादिनश्यतीसूच्यते यदिहितुर्विनैवनाशस्योपगमस्तेयथाभवेत्।९७। स्वतएवहनाशश्चेद्बु
धः स्यात्सौगमः।९८। उक्तरीतोभयथाचदोषान्मतमसाध्विदं।९९। आकाशेचाविशेषात्।७। नयुक्तं खेपिबोधानानिरूपाख्यत्वकल्पनं। भ्यादिवद्वस्तुभूतत्वप्रति
पत्तिविशेषतः।१००। अनुस्मृतेश्च।८। क्रमात्स्मृत्यनुभूत्योस्तुभिन्नक्षणिकयोः क्रमात्। एकस्मिन्नेवसंनिहान्नात्माक्षणिक इष्यते। क्षणिकेत्वन्यभूतस्मृतिरनु
न्यस्यनो भवेत्।९। नासतोदृष्टत्वात्।१। अतितुच्छाद्भावाद्धाकार्योत्पत्तिस्त्वयेरिता। सानैवयुक्तातस्यास्तुदृष्टत्वात्स्वन्मतादिनः।२। उदासीना
नामपिचैवंसिद्धिः।१०। अतितुच्छाद्भावाच्चेत्कार्योत्पत्तिर्हिताभवेत्। अप्युदासीनपुंसांस्यात्कार्यसिद्धिः कृतिंविना।३। वैनाशिकमतस्यैवंसौ
त्रांतिकमतस्यच। भ्रांतिमूलतयाताभ्यांनविरोधः समन्वये।४। इतिश्री सुदशसूत्रंवैनाशिकसौत्रांतिकबौधमतखंडनाधिकरणंचतुर्थं
।४। नाभावउपलब्धेः।१। विज्ञानंक्षणिकं बाह्यक्रियोगाचाराख्यसौगतः। तदन्यबौधैस्तूनामभावंचसदृष्यते।५। विज्ञानव्यतिरिक्तानामसंतास्त्व
समनुपपन्। नसभवतितत्तेषांप्रत्यक्षेणोपलंभतः।६। वैधर्म्याच्चनस्वप्नादिवत्।२। असत्वमिति चेत्तेषांभवेत्स्वप्नपदार्थवत्। नैवंबाध्यमबाधेनवै
धर्म्याद्बाह्यवस्तुषु।७। नभावोनुपलब्धेः।३। बाह्यार्थानामभावेपिवैपिवैचित्र्यंसंभवेच्चेति। अनादिभिर्वासनाभिरितिवक्तुंनशक्यते।८। बाह्यार्थानुभ
वव्याप्यवासनानांनसंभवः। बाह्याभावेनबाह्यार्थानुपलब्धेर्मतंतव।९। क्षणिकत्वाच्च।४। वासनाभिधसंस्काररस्याश्रयासंभवादपि। असंभ
वतेश्च।५। अपशब्दप्रयोगाच्चतथादुष्टार्थवत्ततः।१०। अहमाकारकंदेहाल्लयविज्ञानमस्तितत्। क्षणिकंवासनाधारः कथंस्यादस्थिरंवद।११। सर्वथानुप
पत्तेश्च।५। अपशब्दप्रयोगाच्चतथादुष्टार्थवत्ततः। सौगतंमतमग्राह्यंसर्वथानुपपत्तितः।१२। इतिश्री सुपंचसूत्रंबाह्यार्थापलापिक्षणि
कविज्ञानमात्रस्वीकर्तृयोगाचाराख्यसौगतमतखंडनाधिकरणंपंचमं।५।

६

।३३।

वैशेषिकाक्षेपशांत्यैप्राहाधिकरणंत्विदं। महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यां।११। वाशब्दोणुत्वह्रस्वत्वयुतस्याहसमुच्चयं। द्व्यणुकंह्रस्वशब्देनपरिमंडलशब्दतःप
रमाणुस्तत्प्रमानंपरिमांडल्यमुच्यते।३४। परमाणुगताणुत्वंनैवकस्यापिकारणं। अणुदीर्घमहत्ह्रस्वभावोमानंचतुर्विधं।३५। द्व्यणुकेणुत्वह्रस्वत्वेअणुत्वादितज्जे
मते। महत्वदैर्घ्यत्र्यणुकेद्व्यणुकत्रितजेमते।३६। द्वाभ्यामणुभ्यांद्व्यणुकंजायतेद्व्यणुकत्रयात्। त्र्यणुकंजायत इतिवैशेषिकमतस्थितिः।३७। सूत्रार्थस्तु।
पारिमांडल्यसहितात्रिसाधिपरमाणुतः। द्व्यणुकंजायतेणुत्वह्रस्वत्वाभ्यांयुतंयथा।३८। ह्रस्वत्वाणुत्वसहिताद्व्यणुकात्र्यणुकंयथा। दैर्घ्येणपरिमाणे
नमहत्वेनचसंयुतं।३९। चेतनाद्ब्रह्मणस्तद्वदचेतनमिदंजगत्। जायतेचिद्विसदृशाजाड्यादिगुणसंयुतं।४०। चेतनाद्ब्रह्मणोजातमचेतनमिदंक
थं। इत्याक्षेपोनैवयुक्तस्तथात्वेनीदृततः।४१। आरंभतेसजातीयान्गुणान्कारणगागुणाः। न्यायस्यास्यत्र्यणुकादौव्यभिचारोहिदृश्यते।४२।
इतिश्री सुएकसूत्रंकारणगुणविसदृशगुणककार्यसाधकंह्रस्वपरिमंडलाधिकरणंद्वितीयं।२। उभयथापिनकर्मातस्तदभावः।१। सृष्ट्यर्थंपर
माणूनांसंयोगासंभवोमिथः। संयोगहेतुभूतस्यकर्मणोऽसंभवात्तदा।४३। जीवादृष्टंकारणंनतदाजीवोप्रवर्तकः। नेशोपिप्रेरकस्तस्यजीवादृष्टस्य
कर्मणि।४४। निराकरिष्यमाणत्वात्ताकिंकाभिमतेशितुः। निराक्रियापृथुरसामंजस्यादितिसूत्रतः।४५। एवंविभागश्चाणूनांनसंभवतिनिके
र्मजः। नसंभातिकर्मात्रप्रळयार्थमहेतुकं।४६। भोगार्थत्वादृष्टस्यकर्मणः कारणंनतत्। नसंभवतिकर्मातस्तत्संयोगविभागयोः।४७। नेन
सृष्टिप्रळययोरभावोजगतोभवेत्। अतः कारणतावादोनयुक्तः परमाणुगः।४८। अनाद्यध्यास्तमज्ञानंस्वतएवास्तिवेधिति। निवर्त्यस्याश्र
यज्ञानात्तेनसत्स्यादितिध्वनिः।४९। प्रधानाध्यासानादित्वात्तत्रहेत्वंतरंनहि। सर्वानंतोभयाभासः संभूमाध्यासउच्यते।५०। पूर्वपूर्वदृष्टसंस्कारज
न्यउत्तरोत्तराध्यासइतिकार्याध्यासोपिबीजांकुरवत्प्रवाहरूपेणानादिः। अविद्याध्यासेतुनादित्वात्नुकार्यं।५०। समवायाभ्युपगमाच्चसा
म्यादनवस्थितेः।२। आधेयमाश्रयेणास्तुयथाह्युपुतसिध्धयोः। विभिन्नत्वादाश्रयतः समवायमपेक्षते।५१। समवायांतरंवीच्छेत्समवायेपि
वैतथा। संबंधस्याश्रयेणाधाधारभिन्नत्वसाम्यतः।५२। सोप्यन्यमथसोप्यन्यमेवंस्यादनवस्थितिः।५२। समवायांतराकांक्षाविश्रांतसनुद
१तदभावपदंपूर्वसूत्रादत्रानुवर्तते। समवायस्योपगमादप्यभावोविशिष्यते। ३स्वरूपतो॰

शून्यवादीमाध्यमिकोऽनेनाधिकरणेनतु।वर्णकांतरमाश्रित्यतुच्छोदूषयितुंक्षमः।इतितत्खंडनेयत्नःपृथक्कृतैःकृतोनहि १३ शून्यस्यस्वप्रकाशत्वंनोररीक्रियते
ततः।असत्साक्षिशून्यस्यासिद्धेःशून्यवादोऽसमंजसः १४ इतिपंचमाधिकरणसूचितंशून्यवादखंडनतत्वं ५ नैकस्मिन्नसंभवात् १ निरस्यमुक्तकच्छानांजैनाना
मितिदर्शनं।आर्हतानांविवस्त्राणांजैनानांखंड्यतेमतं १५ पदार्थाद्विविधस्तत्रजीवोऽजीवःप्रकीर्तितः।भोक्ताजीवोभोग्यजातमजीवइतिकथ्यते १६ जीवाजी
वाऽऽजीवाऽऽस्रवसंवरनिर्जरबंधमोक्षाख्याः।सप्तानयोःपदार्थास्तिथान्येपंचसंप्रोक्ताः १७ जीवआद्योद्वितीयस्तुपुद्गलःपरिकीर्तितः।धर्मस्तृतीयःसंप्रोक्तस्त्वध
र्मस्त्रिचतुर्थकः १८ आकाशःपंचमश्चैवस्तिमिकायाःप्रकीर्तिताः १९ जीवास्तिकायस्त्रिविधःपुद्गलःषड्विधःस्मृतः।आकाशोद्विविधःप्रोक्तःशिष्टावेकविधौम
तौ २० बंधःकर्माष्टकंप्रोक्तंविषयोन्मुखताऽऽस्रवः।संवरोष्टांगयोगःस्यान्निर्जरस्तपउच्यते २१ अलोकाकाशगमनंमोक्षआर्हतसम्मतः।अस्तिकायःपदार्थो
त्रपुद्गलाःपरमाणवः २२ विरुद्धसत्वासत्वादिसप्तधर्मान्वितंजगत्।एकैकोपिपदार्थोत्रसप्तधर्मान्वितोमतः २३ एकस्मिन्नेवकलशाद्यस्तिकायेक्रमादिना।
प्राप्तित्यागस्थापनादिव्यवहारस्यसिद्धये।अनेकरूपतास्थेयासप्तभंगीनयेनहि २४ तथाहि।स्यादस्ति१स्यान्नास्ति२स्यादस्तिचनास्ति३स्यादवक्तव्यः४
स्यादस्तिचावक्तव्यश्च ५ स्यान्नास्तिचावक्तव्यश्च ६ स्यादस्तिचनास्तिचावक्तव्यश्च ७ इतिसप्तभंगाः।स्यादितियथाकथंचिदित्यर्थकंतिङंतप्रतिरूपकम
व्ययं।एकस्यैववस्तुनोस्तित्ववांछायांस्यादस्तीत्याद्यभंगः १ नास्तित्ववां० द्वितीयः २ क्रमेणोभयवां० तृतीयः ३ युगपदुभयवांछायांअस्तिनास्तीतिशब्दद्वय
स्यसकृदुक्तुमशक्यत्वाच्चतुर्थः ४ आद्यचतुर्थभंगयोर्वांछायांपंचमः ५ द्वितीयचतुर्थयोर्वां० षष्ठः ६ तृतीयचतुर्थयोर्वां० छायांसप्तमोभंगः ७ इतिएकस्यै
वसत्वरूपत्वसर्वस्वसर्वत्रसर्वदास्येवेति।घटादेःसर्वात्मनासदेकरूपत्वेप्राप्त्यात्मनाप्यस्यैवसदितितत्प्राप्तयेयत्नोनस्यात्।नोघटत्वादिरूपेणकथंचिदस्तिप्रा
प्यत्वादिरूपेणकथंचिन्नास्तीत्यनेकरूपत्वंवस्तुमात्रस्यत्सदैवसमन्वयोनघटतद्वत्तत्आह।नैकस्मिन्निति।विरुद्धानांतुधर्माणामेकस्मिन्पारमार्थिके।
असंभवादनिर्वाच्यकोट्यानिर्वाहसंभवात् २५ नानेकरूपताकल्प्यासप्तभंगीनयादिह २६ एवचात्माऽकार्त्स्न्यं २ यथाविरुद्धधर्माणामेकवस्तुन्यसं
भवः।एवंजीवोयतोभीष्टःस्वदेहपरिमाणवान् २७ स्यात्तस्यच्छिन्नतादोषस्ततस्तस्यत्वनित्यता।अनित्यस्यनवैमोक्षःसततोर्ध्वगमात्मकः २८ स्थूलदे

हस्यास्यसूक्ष्मे प्रवेशोपि च नो भवेत्। सूक्ष्मस्य स्थूलगते नो नद्देहपरिमाणकं २९ नच पर्यायादप्यविरोधो विकारादिभ्यः ३ जीवए वस्थूलसूक्ष्मावयवश्चेत्तथापि हि। मा
८ पर्यायतोप्यवयवोपचयापचयित्वतः। स्थौल्यसौक्ष्म्याविरोधो न विकारमुखदोषतः ३० आत्मनि मध्यमपरिमाणरूपस्थौल्यसौक्ष्म्याविरोधो न नोपयोगी। पर्यायः
परस्परासंताभावसामानाधिकरण्यमन्यतरस्य मुखशब्दोत्राद्यर्थकः। विकारानित्यत्वा विमुक्त्य आदिपदसंग्राह्याः ३० यद्वा संतानरूपेण पर्यायादपि नित्य
ता। नानित्यत्व विरोधः सविकारमुखदोषतः ३१ सः तादृशः अनित्यत्वेन सह विरोधाभावः। न नोपयोगी ३१ वस्तुत्वं यदि संतानेस्वसंतान्यतिरेकतः। संतानिजत्वाद्वि
कृतिमुखदोषसमागमः ३२ संतान्यनतिरिक्तत्वे संतानो नैव सिध्यति। संतानः क्षणिकविज्ञानप्रवाह एव न सिध्यति। इति दोषात्रयुक्तो सो संतान्यात्मपरिग्रहः
३२ बौद्धाभिमतस्य स्वानभिमतस्य परिग्रहेप्यनिर्वाहात् ३३ अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः ४ मोक्षावस्थाभाविजीवपरिमाणस्य तन्मते। नि
त्यत्वनिश्चयात्तद्वदाद्यमध्यमयोरपि ३४ नित्यत्वस्य प्रसंगः स्यादुभयोः परिमाणयोः। तेन तत्परिमाणानामैक्यं स्यान्न पृथक्तता ३५ विरुद्धपरिमाणाना
मेकप्राणिन्यसंभवात्। तस्य सर्वेपि देहाः स्युरामोक्षं तुल्यमानकाः ३६ अथ वर्णकांतरं। परिमाणस्यानित्यस्य मुक्तौ जीवगतस्य तु। महत्वाणुत्वयोरन्य
तरत्वेन व्यवस्थितेः ३७ नित्यत्वादेकरूपत्वादृशयोराद्यमध्ययोः। स्थितत्वाच्च सदा जीवः स्यात्क्लृप्तपरिमाणवान् ३८ अणुश्चेत्सर्वदाणुः स्यान्म
हांश्चेत्सर्वदा महान्। अविशेषस्तत्वो जीवः स्वदेहपरिमाणवान्। इतियो नियमस्तस्य भंगः खलु भविष्यति ३९ मुक्तियोग्यजीवपरिमाणे अविशे
षएकरूपं ३९ तस्माद्भ्रांत्यैकमूलेन नार्हतेन मतेन तु। विरोधः संभवेद्दोषशून्यब्रह्मसमन्वये . १४० इतिश्री० सू० चतुःसूत्रमार्हतमत
खंडनाधिकरणं षष्ठम् ६ पत्युरसामंजस्यात् १ माहेश्वरा गौतमीया काणादाश्च पतंजलिः। आर्हता वैसेषा सांख्याः सौगतेष्वपि केच
न ४१ निमित्तकारणं लोकप्रेरकं जगदीश्वरं। अंगीकुर्वंति समयैः स्वीयैः स्वीयैः प्रकल्पितैः। ४२ उपादानं निमित्तं च ब्रह्मैकमिति वैदिकं। नांगीकुर्वं
ति समयमतस्तत्खंडनोद्यमः ४३ जगतः प्रेरकत्वेन नेश्वरस्य निमित्तता। असामंजस्यतस्तत्तु रागद्वेषादिरूपकं ४४ लोके प्रवर्तनं दृष्टं रागद्वेषादिपूर्वकं ॥ ८

ईशः प्रवर्तकः। तस्मिन्नेव प्रेरकत्वएव।५१।

स　　　　　　　　　　४मते

दृष्टान्तैरणाः सर्वैर्विनोपनिषदान्जनाः।४५। स्वत एव प्रमाणेन वेदेनेरित ईश्वरे। निमित्तकारणत्वेनोपादानत्वेन चाद्रते।४६। सर्वज्ञे सर्वशक्त्यापेक्षकर्मानुफलद
तरि। वैषम्यनैर्घृण्यहीने सर्वलोकविलक्षणे।४७। अतीन्द्रिये न दृष्टांतः शास्त्रयोनौ ह्यपेक्ष्यते। अत एव मन्तव्यं दूषणं नियमीरितं।४८। निर्विकल्पमनंतं च हे
तु दृष्टांतवर्जितं। अप्रमेयमनादिं च यत्ज्ञात्वा मुच्यते।४९। इति। नावेदविन्मनुते तं बृहंतमिति तु श्रुतिः। आनुमानिकसर्वेशवादं साक्षान्निषेधति।५०।
संबंधानुपपत्तेश्च।२। दोषांतरं च वदति पातंजलैर्मुनिः। तत्रावयवशून्यत्वाद् युतसिद्धत्वोपि च। संयोगः समवायो वा संबंधो नैव सिध्यति। निरंशस्य तु संयोगः
केनाप्यंशेन नो भवेत्।५२। नहि प्रधानपुरुषव्यतिरिक्तः स ईश्वरः। अंतरेण तु संबंधमीशिता पुंप्रधानयोः।५३। पुंप्रधानयोः संबंधमंतरेण जगत ईशितात्म
ग　पति।५३। संबंधः प्रेरणायोग्यः कल्प्यः कार्यबलान्न हि।५४। जैरीशप्रेरितस्य प्रधानस्यापीदं जगत्। कार्यमित्थं हि नोसिद्धं तस्मिन्नेवाहि संशयात्।५६। संबंधासं
भवाद्दोषादपि पत्युर्निमित्तता। प्रधानप्रेरणाद्वारा जगतो नैव संभवेत्।५७। श्रुत्यानिर्वाच्यतादात्म्यसंबंधो ब्रह्ममाययोः। देवात्मशक्तिं स्वगुणैर्नि
गूढामिति हि श्रुतिः।५८। अधिष्ठानानुपपत्तेश्च।३। यथा लोके कुलालस्य प्रेरकत्वं मृदादिनः। तद्दृष्टांतेनेश्वरेपि प्रधानादि प्रवर्तना।५९। न संभवेत्प्रधानस्यात्र सक्षारूपकत्वतः।६०। ईश्वरस्य प्रधानादि प्रेरणानुपपत्तितः। जगतः प्रेरकत्वेन निमित्तं कारणं न सः।६१। अत्रैव वर्णकांतरं। शरी
रानुपपत्तेश्च प्राक् सृष्टेरशरीरिणः। जगतः प्रे॰ न सः।६२। करणवच्चेन्न भोगादिभ्यः।४। अप्रत्यक्षमनुद्भूतगुणमिंद्रियवृंदकं। प्रवर्तयति जीवात्मा
तद्वत्स इति चेन्न तत्।६३। स ईशः।६३। प्रवर्तकस्येंद्रियाणामिव भोगादिसंभवात्।६४। करणवत्तदस्य शरीरपरत्वमाभिप्रेत्य वर्णकांतरमाह। स्वेच्छया प्राक्
सृष्टिकालाच्छरीरमिति चेन्न तत्। भोगादिभ्यः प्रसक्तेभ्योऽनीशत्वं स्याच्छरीरिवत्।६५। अंतवत्त्वमसर्वज्ञता वा।५। येसंख्यापरिमाणेस्तः प्रधानपुरुषेश
गे ईशेन ते परिच्छिद्येते न वा द्वित्र पक्षके।६६। परिच्छिद्येते इयत्तया ज्ञायेते न वेति प्रश्नः।६६। घटादिवद्विनाशित्वं स्यात्परिच्छिन्नवत्त्वतः। द्वितीये खलु
पक्षे तु स्यादसर्वज्ञत्वमीशितुः।६७। परिच्छिन्नसंख्यापरिमाणवत्त्वाद्विनाशित्वं प्रधानजीवेश्वराणां स्यात्।६७। निमित्तमात्रं जगतो नोपादानं प्रभु
स्त्विति। असंगतं मतं तस्मात् प्रतिष्ठितनर्ककं।६८। इति श्री मुकुंदकृतौ (?) निमित्तकारणेश्वरवादरचंडनाधिकरणं सप्तमं।८।　　।　।　।

१पं॰च सूत्रं

[illegible]

।७१।असमवायिकारणनाशा

उत्पत्त्यसंभवात्।७१।दूषितं तत् भागवतं मतं यत्पांचरात्रकं।परात्मनो वासुदेवाज्जीवोत्पत्तेरसंभवात्।६९।युज्यतामविरुद्धांशो।जीवोत्पत्तिर्नयुज्य
ते।उत्पन्नस्य विनाशित्वे कृतहान्यादिदोषतः।७०।कार्यस्य नाशो नाशेन हेतोरसमवायिनः।उपादाने निमित्ते वासुदेवोखिलस्य हि।तत्समाराधन
ध्यानज्ञानैर्जीवो विमुच्यते।निरस्तविश्वलोकस्य तत्प्राप्तिर्मुक्तिरुच्यते।७२।वासुदेवात्समुत्पन्नो जीवः संकर्षणाभिधः।संकर्षणात्समुत्पन्नं
प्रद्युम्नाख्यं मनस्ततः।७३।प्रद्युम्नादनिरुद्धाख्यो जज्ञेऽहंकार उत्कटः।चत्वारो वासुदेवाद्या व्यूहाः सर्वात्मका इमे।७४।विज्ञानैश्वर्यतेजां
सि बलानंदादयो गुणाः।तुल्याश्चतुर्णां व्यूहानां सर्वे ते परमेश्वराः।७५।व्यूहा मूर्तयः।७५।विज्ञानादिस्वरूपास्ते विज्ञानादिगुणा
अपि।गुणाभेदेपि गुणिनो विशेषेण हि केनचित्।७६।अभेदेपीशरूपाणां विशेषो भेदकोस्वतः।स विशेषाभेद इष्ट इति भाग
वतं [illegible] मतं।७७।न च कर्तुः करणं।२।कर्तुः सकाशात् करणं विना तत्करणांतरं।नोत्पद्यते यतो लोके तथोत्पत्तेरदर्शनात्।७८।प्रद्युम्नाख्य
स्य मनस आद्यस्य करणस्य तु।संकर्षणाभिधाज्जीवात्कर्तुरुत्पत्त्यसंभवात्।नोपादेयं भागवतं मतं तत्पांचरात्रकं।७९।विज्ञानादिभावे वा तद
प्रतिषेधः।३।विज्ञानाद्यात्मकत्वे तु त्रयाणां वासुदेववत्।उत्पत्त्यसंभवादीनां दोषाणां न निवारणं।८०।विप्रतिषेधाच्च।४।एकस्यैव गुणित्वादि
गुणत्वाद्यसमंजसं।विशेषं कंचिदाश्रित्य सन्निर्भेदस्य प्रकल्पने।८१।गुणिनां तद्गुणादीनां निर्भेदत्वासहत्वतः।आम्नायनिंदारूपाच्चविरोधात् द्विविधं
मतं।१८२।चतुर्षु वेदेषु परं श्रेय अलब्ध्वा शांडिल्यमुनिरिदं पांचरात्रभागवतशास्त्रमधिगतवानित्यादि वेदनिंदारूपविरोधाच्चेसमर्थः।
१८२।इति श्रीपांचरात्रभागवतमतखंडनं नाम चतुःसूत्रमष्टमाधिकरणं।८।इति द्वितीयाध्याये अविरोधाख्ये विरुद्धमतखंडं
नं नामाष्टाधिकरणात्मको द्वितीयः पादः।अत्र पादे सूत्रसंख्या।४५।+जडजीवब्रह्मभेदो विशिष्टाभेद इत्यपि।निराकरिष्यतेप्यस्मिं
स्तृतीयस्य द्वितीयके।पादे षडधिकरणे नवसूत्रात्मके स्फुटं।१८३।पृथक्प्रकृत्या नैतावत्प्रतिषेधसंज्ञकेधिकरणे।१८३।+ ९

सन्मात्रस्यात्मनोन्यस्मादुद्भवस्य तु संभवः।अथ्यस्तस्य प्रपंचस्याधिष्ठानानुपपत्तितः।१२।इतिश्री·सु एकसूत्रमात्मानुत्पत्त्यधिकरणं तृतीयं।३।
तेजोतस्तथाह्याह।१।जायते वायुतस्तेजो यत आह श्रुतिस्तथा।अत इति शेषः।इतिश्री·सु एकसूत्रं तेजउत्पत्त्यधिकरणं चतुर्थं।४।आपः।१।जायंते ते
जसह्यापो यत आह श्रुतिस्तथा।१३।इतिश्री·सु एकसूत्रमबुत्पत्त्यधिकरणं पंचमं।५।पृथिव्यधिकाररूपशब्दांतरेभ्यः।१।पृथिव्येवान्नशब्देन
जायमानान्नमुच्यते।तान्नमसृजंतेत्यत्रेऽप्यधिकारादिहेतुतः।१४।ता अन्नमसृजंत इत्यत्र श्रुतावियमर्थः।१४।महाभूताधिकारात् कृष्णरूपादिहे
रितात्।अद्भ्यः पृथ्वीतीतरश्रुतत्वादन्नमत्र सा।१५।इतिश्री·सु एकसूत्रमन्यत्र तेन छांदोग्ये श्रुतान्नशब्दार्थस्य पृथ्वीत्वनिर्धारकाधि
करणं षष्ठं।६।तदभिध्यानादेव तु तल्लिंगात्सः।१।तत्तद्भावं समापन्नः सृजतीश्वर एव सः।स ज्याभिध्यो न रूपेक्षापूर्वकं सर्जनश्रुतेः।१६।तस्य सर्वनियंतृत्वलिं ब
गस्य श्रवणोत्ततो।स अंतर्यामिवसस्तत्तनत्वाधिदेवताः।१७।तेन तत्ताभिमानितदेवानस्यतं ह्याह सर्जने।१८।इतिश्री·सु एकसूत्रं तत्तत्तत्वाधिदेवानां पारतंत्र्यस्म
र्थकं सप्तममधिकरणं।७।विपर्ययेण तु क्रमोऽत उपपद्यते च।१।अस्मादनुक्रमात्सृष्टेर्वैपरीत्यात्क्रमो लये।घटादिषु तथा लोके दृष्टत्वादुपपद्यते।१९।इतिश्री·सु
एकसूत्रं सृष्टिक्रमविपरीतलयक्रमाधिकरणमष्टमं।८।अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात्।१।एतस्माज्जायते प्राणो मनः सर्वे
न्द्रियाणि च।खं वायुर्ज्योतिरित्यादि सृष्टिलिंगात्क्रमान्वितात्।आत्माकाशांतराले हि मन इंद्रियबुद्धयः।२०।जायंते तत आकाशप्रभृती निक्रमेण च।इति चे
न्द्रियादीनां भूतत्वस्याविशेषतः।२१।[illegible]।तत्रांतःकरणादीनां तेजसाद्यात्मकत्वतः।न भूततत्त्वाप्यसृष्टेर्भूतक्रमविरोधिता।२२।
विज्ञायते ह्यनेनेति व्युत्पत्त्या बुद्धिरिंद्रियं।विज्ञानशब्दसंग्राह्यमत्र सूत्रे विवक्षितं।२३।इत्येकसूत्रं भूतसृष्टिक्रमविरोधपरिहारकरणाधिकरणं नवमं।९।न वाधिकरणे
श्रोक्ताभूतश्रुत्यविरोधिता।अभूतिः कथ्यते शिष्टे जीवजन्मविरोधिना।२४।चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्।१।प्रसिद्धो यो जन्ममृत्यु
व्यवहारोस्ति यस्तयोः।जातकर्मादिसंस्कारव्यवहारोपि यः श्रुतः।२५।स चरस्थावरवपुर्विषयो भवतीष्यतः।जीवे गौणः शरीरस्य सहेजन्मादि सत्त्वतः।२६।
इत्येकसूत्रं जीवजन्मादिव्यवहारस्य गौणत्वसाधकाधिकरणं दशमं।१०।

१०

जीवे ५

नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः।१।स्फुलिंगसाम्याज्जीवस्योत्पत्तिराशंक्य दूष्यते।जीवो नोत्पद्यते सर्गउत्पत्तेरश्रुतत्वतः।ताभ्यः श्रुतिभ्यो जीवस्य नित्यता
वगमादपि।नापि सम्भ्रियते तस्योपाधिभंजनादिकं।२८।इतिश्री·सु एकसूत्रं जीवोत्पत्त्यव्यवस्थापूर्वकजीवानुत्पत्तिनाशसूचकमेकादशमधिक
रणं।११।ज्ञोत एव।१।स्वयंप्रकाशते शश्वच्चक्षुराद्यनपेक्ष्ययः।परमात्मा स वेदांतैर्ज्ञ इत्युद्घोष्यते सदा।२९।स्वस्वरूपेण जीवेन कार्येनुप्रवि
श्यापि।नोत्पद्यते विकारित्वादिवतश्रयभावतः।३०।अस्मादस्तु त्वात्मवादे वजीवः सदात्मकः।स्वप्रकाशो जन्ममृत्युहीनं ब्रह्मैव नेतरत्।३१।
ज्ञानात्मनो विषयितायल्लिमूला हि जायते।वस्तुभावेन विषयी स्वयमेव प्रकाशते।३२।इतिश्री·सु एकसूत्रं प्रश्नोत्तरसाधनिसचैतन्याभासस्वरू
पबोधकश्रुतिविरोधनिराकरणपूर्वकनियतचैतन्याभिन्नस्वयंप्रकाशत्वसाधकं द्वादशमधिकरणं।१२।अथ चतुर्दशसूत्रं तद्गुणसारत्वा
धिकरणं।उत्क्रांतिगत्यागतीनां।१।उत्क्रांत्यादिक्रियाणां हि जीवगानां श्रुतत्वतः।जीवोणुरिति वक्तव्यं न विभुत्वसंभवात्।३३।स्वात्मना चोत्तरयोः।२।
देहस्वाम्यनिवृत्तिस्तु यद्युत्क्रांतिस्तथापि सः।गत्यागती स्वत एव सदाणुर्हि स्वरूपतः।३३।नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्।३।सवा एष महानात्मेत्यणु
त्वश्रुतेरसौ।जीवात्मा नाणुरिति चेन्न किंत्वत्र महान्परः।ईशे महेनेतरस्यात्र ब्रह्मणः प्रकृतत्वतः।३४।स्वशब्दोन्मानाभ्यां च।४।एषोणुरात्मा चेतसा वेदि
तव्य इति श्रुतौ।अणुशब्देन कथनादुन्मानाद्यप्यणुर्हि सः।३५।वालाग्रशतभागस्य शतधा कल्पितस्य च।भागो जीवः स विज्ञेय इति स्मृ
क्ष्मतमः स्मृतः।३६।अविरोधश्चंदनवत्।५।देहैकदेशगो विंदुश्चंदनस्य यथा सुखं।सर्वदेहे जनयती नविरोधस्तथैव हि।अणुः।३७।अवस्थितिवैशेष्या था
दिति चेन्नाभ्युपगमाद्धृदि हि।६।एकदेशाने कदेशव्यवस्थैति निविशेषतः।न विंदुसाम्यमिति चेन्नैवं वाच्यं शरणूत्तरं।३८।हृद्यंतर्ज्योतिरित्यादिश्रुत्याभ्युप
गमाद्धृदि।एकदेशस्यत्वसाम्यादविरोधोत्र विंदुवत्।३९।गुणाद्वालोकवत्।७।अणुजीवे व्याप्तिकार्यं शक्यावपिहितद्गुणात्।ज्ञानाद्वा व्याप्ति
र्यस्यालभागुणकदीपवत्।४०।व्यतिरेको गंधवत्।८।प्रभेति दीपसंयुक्तमन्यद्द्रव्यं गुणो न चेत्।स्वगुणिव्यतिरेकेण वर्त्तिज्ञान स्यगंधवत्।४१।वाटिकापु
ष्पगोगंधो व्यापकत्वात्सुदूरगः।न तद्ज्ञानं व्यापकं सत्त्वकाशो बहिरंतरे।४२।तथा च दर्शयति।९।यथा ज्ञानगुणो व्याप्तस्तथा दर्शयति श्रुतिः।प्रवि

ष्टआनखाग्रेभ्य इत्यादिः श्रुतिरस्तिहि।४३।पृथगुपदेशात्।१०।शरीरं प्रज्ञयारुह्येति सात्मज्ञानयोः पृथक् उपदेशादणुर्जीवो व्यापि काधीस्तु तद्गुणः।४४।इत्याशि
व्यसमाधत्ते तद्गुणसारादि सूत्रकैः।४५।तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्।११।अणुहो क्रान्तिगत्याद्यास्तस्या बुधेस्तु ये गुणाः।ते प्राधान्याय स्युर्जीवः स तद्गुणक
सारकः।४६।जीवेणुत्वादि कथनं तस्या बुधेर्गुणैर्मतं।दहराद्यादिकं यद्ब्रह्मलिङ्गस्य परमात्मनः।४७।यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्।१२।यो वद्धस
तिसंसारी जीवस्तावद्धियोऽन्वयः।अथ वा ब्रह्मभावी वा यावत्स्याद्दुद्भूतितः।४८।न यावदात्मभावित्वाद्दोषोणुत्वादिरात्मनि।सात्क्षाद्धियो नाशात्तद्गुणा अपि
भंगुराः।४९।तथावेददर्शनाच्च न दोषो भ्रांतिकल्पितः।योविज्ञानमयो ह्यात्मा स इहामुत्र संचरन्।५०।लेलायतीये ति वेदो ध्यायतीवेति भाषते।बुधौ चलत्सां चेलतिध्या
यं ह्याध्यायति ह्यमं।इति लेलायतीत्यादि श्रुत्यर्थो भाष्य आदृतः।५१।पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्।१३।सुषुप्तौ बुधियोगादेः सतः सूक्ष्मात्मनस्ततः।आ
संसारमभिव्यक्तियोगात्तस्यानिवर्तनं।५२।अनभिव्यक्तपुंस्त्वादिर्बाल्य गं यौवने यथा।व्यक्तं तथानभिव्यक्ता भवंति धीरपि।५३।नित्योपलब्ध्यनुपलब्धिप्रसंगो
ऽन्यतरनियमो वान्यथा।१४।चितो ज्ञेयेन विषयविषयीभावसिद्धये।द्वारमभ्युपगंतव्यमंतःकरणसंज्ञकं।५४।अनभ्युपगमे नित्यं सर्वदा रूपोपलंभनं।अथवा
नुपलब्धिः स्याद्विषयित्वं न चेष्यितं।५५।आत्मेंद्रियान्यतरस्य शक्तेर्बंधेन कैनचित्।प्रतिबंधः कल्पनीयः स्यात्तत्रौसंभवन्नपि।५६।नियमनं नियमः प्रतिबं
धः।५६।तस्मादात्मनि संसारस्त्वंतःकरणकल्पितः।तन्मनो बुधि चित्ताहंकारभेदाच्चतुर्विधं।५७।इतिश्री०सु चतुर्दशसूत्रं जीवस्याणुत्वखंडकं तद्गुण
सारत्वाधिकरणं त्रयोदशं।१३।जीवस्यैव हि कर्तृत्वं न बुधेरप्युपाधिगं।सप्तसूत्रेऽधिकरणे कर्त्रीरव्य इति कथ्यते।५८।कर्ता शास्त्रार्थवत्त्वात्।१।विधिशा
स्त्रस्यार्थवत्त्वाज्जीवः कर्ता मतिर्नहि।विहारोपदेशात्।२।यथाकामं स्वप्नगस्य विहारस्योपदेशतः।५९।उपादानात्।३।हृदयं गच्छति स्वापे उपादायेंद्रियस्थितिं।
विषयग्राहिणीं मिथ्युपादानकीर्तनात्।६०।व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः।४।विज्ञानं तनुते यज्ञं कर्माणि तनुतेपि च।इति विज्ञानात्कृजीवे क्रियाकर्तृत्व
कीर्तनात्।६१।कैर्तृजीवस्य सनुषंगः।६१।विज्ञानशब्दो ह्यत्र स्तोन चेज्जीवपरो यदि।प्रथमांतस्याने द्रष्टेत तृतीयांतविपर्ययः।६२।कर्तव्यः स्यान्नैव कृतो तो जीवः प्र
थमेरितः।अतो बुधिर्नविज्ञानमत्र वेसाध्यनास्तिका।६३।उपलब्धिवदनियमः।५।आह स्वतंत्रः कर्तेति पाणिनिर्हि तथा सति।कर्ता जीवः स्वतंत्रः सन्स्वेष्टमनिष्टं करि
ष्यति।६४।नानिष्टमुभयं कुर्व[illegible] लोके तु स्वलु दृश्यते।तस्मा[illegible] स्यानिष्टकारित्वान्न सकर्तेति चेच्छृणु।६५।अनिच्छ
तोप्यनिष्टस्येष्टस्य प्राप्तिर्यथा तथा।कारकाणां विचित्रत्वात्तत्रोपि करोत्युभे।६६।अनीप्सितेष्टानिष्टोपलब्धिवदनीप्सितप्रवृत्तिमत्त्वे नापि कर्तृत्वं युज्यत इति प्रश्नप्रतिवचनं।६६।११
५शाक्ति

९सिध्यस्य व्यतिरेकेण सर्वदृश्यस्य कारणात्।
भूतभोक्तृपरामाया विरोधस्य प्रकाशकः।द्वितीयस्य तृतीयोयं पाद आरभ्यतेधुना।१।न वाधिकरणे शादौ भूतश्रुत्यविरुद्धता।ततोष्टभिर्भोक्तृपर
श्रुतीनामविरुद्धता।२।न वियदश्रुतेः।१।नो सद्यते वियत्तेजोंभोभूसृष्टौ तदश्रुतेः।समाधत्ते।अस्ति तु।२।न च्छांदोग्ये वियत्सृष्टिस्ते
त्तिरीये रितास्ति तु।३।पुनः शंकते।गौण्यसंभवात्।३।गौणी सा तु वियत्सृष्टिर्विभुत्वत्तेरसंभवात्।किंच।शब्दाच्च।४।अंतरिक्षेऽमृतशब्दप्रयो
गाच्चापि गौणता।४।किंच।स्याच्चैकस्य ब्रह्मशब्दवत्।५।संभूतशब्दस्यैकस्य भूम्यादौ मुख्यता यथा खे।गौणता पंचकोशस्थानंदस्य ब्रह्मशब्दव
त्।५।अन्नं ब्रह्मेति व्यजानात्।प्राणो ब्रह्मेति०मनो ब्रह्मे०विज्ञानं ब्र०आनंदो ब्रह्मेति व्यजानादित्येकस्मिन्नेव प्रकरणे न्नादौ गौणतया नंदे मुख्यतया
प्रयुक्तान्नादिपरानंदपरैकब्रह्मशब्दवत्।तस्माद्वा एतस्मादात्मन आकाशः संभूतः।आकाशाद्वायुरित्यादि भूतसृष्टिपरवाक्यसंभूतशब्द एकत्रमु
ख्योन्यत्र गौण इत्यर्थः।५।अथ सूत्रद्वयेन सिद्धांतयति।प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः।६।आरंभणादिशब्देभ्यः साधिताव्यतिरेकतः।एकज्ञाना
त्सर्वबोधप्रतिज्ञायाकृताश्रुतौ।६।तस्या हानिप्रसंगः स्यात्खे सति ते स्वीकृतानचेत्।सर्वकार्येषु खं नो चेत्सर्वबोधः कथं भवेत्।७।पृथक्सत्ता शून्य
ता त्वाव्यतिरेकः स्वकारणात्।कार्यस्यातो ब्रह्मबोधात्तद्विकारखबोधनं।८।यावद्विकारं तु विभागो लोकवत्।७।यावत्कार्यं तु तन्निष्ठस्तद्यापस्तद्विभा
ल गकः।विभागि समसत्ताकः शरावकशादिवत्।९।अविकारे ब्रह्मणि तु विभागो नेव दृश्यते।घटाकाशादिकव्यक्तिविभागाज्ज्ञानिमद्वियत्।१०।लोके घटादेर्वि
कारस्यैव व्यक्तिभेदेनाविभक्त दृश्यते।तेन घटपटव्यक्तिभेदेन विभागित्वमनुमाकविभागवत्तज्ज्ञानिमद्वियदनुमीयते।स्वे विभुत्वेन निरवयवत्वानुमाने विभुत्व[illegible]नेरवासि
प्रा भिरतभावः।अंतरिक्षेऽमृतशब्दप्रयोगस्तु पृथिव्याद्यपेक्षया चिरस्थायित्वा।भिप्रायेण सूर्द्रदोषः।न च घटपटमठाकाशादि विभागप्रतीतिरौपाधिकी।एकमेवा
ही द्वितीयमित्यादिश्रुत्युत्तरतत्स्यैवन्यायग्रहात्।१०।इतिश्री०सुसप्तसूत्रं वियदुत्पत्त्यधिकरणं प्रथमं।१।एतेन मातरिश्वा व्याख्यातः।१।एतेन वियदुत्प
त्तिकथनेनो क्तयुक्तिभिः।[illegible]त्वानिमान्मातरिश्वापीस्यादुत्पत्त्याहि।११।इतिश्री०सुएकसूत्रं वायूत्पत्त्यधिकरणं द्वितीयं।२।असंभवस्तु सतोनुपपत्तेः।१।
रवे।
रव्या

ऽपेक्ष्य न ४ करणसंबंधिनी कारणी शक्तिस्तस्याः ।७२। २थहेतो

यथा पक्का मृष्टमिच्छन्नप्यन्नमोदनादिकं । पचन्कारकवैचित्र्यात्साक्षात्कर्तैव नूच्यते ।६७। स्वेतरेषां कारकाणां प्रयोक्तृत्वे सति स्वतः । कारकाप्रेर्यता स्वस्य प्रो
क्ता कर्तुः स्वतंत्रता ।६८। स्वान्यानपेक्ष्यास्य स्वप्रवृत्तौ या स्वतंत्रता । सा नेष्टेशेऽपि जीवस्य कर्मापेक्षप्रवृत्तितः ।६९। स्वातंत्र्यं नाह शास्त्रेष्टं स्वप्रकाशो चिदात्मनः । तस्मा
दनियमः कर्तुः स्वेष्टानिष्टप्रवृत्तिषु ।७०। शक्तिविपर्ययात् ।६। शक्तोऽपि कर्ता करणापेक्षो लोके यथा तथा । चेद्बुद्धौ कर्तृतास्य स्यात्तस्याः करणं पृथक् ।७१। यावद्धौ
तो नान्यत्करणं बुद्धितोऽस्ति हि । कारण्या धीस्थशक्तेस्तु नाशात्साजीवगा भवेत् ।७२। जीवसर्वव्यवहृतियोग्यं तु करणं हि यत् । तदेव बुद्धिरिति तु सर्वतंत्रविनि
र्णयः ।७३। मिथो शक्तिविपर्यासाद्द्वाभ्यामन्यन्न सिध्यति । अतो बुद्धिव्यतिरिक्तो हि जीवः कर्तेति नैव मतिः ।७४। सदसत्कर्मकर्तृत्वशक्तिमान्जीव उच्यते । द्वाभ्यामन्यतु कु
रणं कुर्याद्भ्यां चेद्धि गौरवं ।७४। समाध्यभावाच्च ।७। आत्माकारा निर्विकल्पा धीः समाधिः श्रुतीरितः । श्रवणादित्रयात्तुल्यः सर्वदुःखापनोदकः ।७५। मुक्तिभोक्तुरकर्तृ
त्वे कः कुर्याच्छ्रवणादिकं । तदभावे ह्यभावः स्यात्समाधेर्हि संभावनः ।७६। वेदेन विहितं ह्यस्ति श्रवणाद्यात्मसंविदे । न हि यर्थ्य प्रसंगाच्च कर्ता जीवो न वै मतिः ।७७। इति तु
श्री॰सु॰ जीवस्य कर्तृत्वसाधकं सप्तसूत्रं चतुर्दशमधिकरणं ।१४। यथा च तक्षोभयथा ।१। कर्ताऽऽयासी च भवति तक्षा वास्याद्यपेक्षया । अनपेक्ष्य न चैकर्ता ना
ऽऽयासी च यथा तथा ।७८। जीवः कर्ता संसरति बुद्धियोगमपेक्ष्य तु । अनेनैव कर्ता परमानंदए वा हि ।७९। औपाधिकं तत्कर्तृत्वं स्फटिके रक्ततासमं । इति श्री॰सु॰ एकसूत्रमौ
पाधिकजीवजीवकर्तृत्वसाधकं तक्षाधिकरणं पंचदशं ।१५। परात्तु तच्छ्रुतेः ।१। कर्तृत्वादिकसंसारो जीवस्य परमेश्वरात् । मोक्षश्च जायते तत्कारयितृत्वश्रुतेर्बलात् ।८०।
कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ।२। असंपरतंत्रस्य ज्ञाने दीक्षादिसाधने । स्वतः प्रवृत्तौ योगेन विध्याद्यनुपयोगतः ।८१। अपेक्ष्य पूर्वकर्मादि साधा
रणकारणं । साधारणो हेतुरीश इति विध्यादि सार्थकं ।८२। तत्तदंकुरवैषम्ये बीजं हेतुर्विशेषतः । तत्साधारणहेतुः पर्जन्यो वै तथेश्वरः ।८३। जीवस्य पूर्वाचरितप्रयत्ना
पेक्ष ईश्वरः । ज्ञायते प्रेरकत्वेन विध्याद्यवितथत्वतः ।८४। पूर्वप्रयत्नापेक्षस्तु सधः कारयतीश्वरः । तत्पूर्वयत्नापेक्षस्तु तत्पूर्वमकारयत् ।८५। प्रे सु
र्यप्रेरकभावोऽत्रानादिर्बीजांकुरोपमः । अनेन चक्रकाद्याप्तिः पुंसो यत्नेऽपि सार्थकः ।८६। इति श्री॰सु॰ ईश्वराधीनजीवकर्तृत्वाधिकरणं द्विसूत्रं षो
डशं ।१६। अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ।१। अंशः कल्पितभेदेन निरंशपरमात्मनः । जीवोऽतस्तस्य नियमकर्तृत्वादि
भिदोक्तितः ।८७। अलंणोराशकितवदासभावस्य चेरणात् । भेदाभेदोभयश्रुत्या कल्पितांशांशिकल्पना ।८८। एकस्यैव नानात्वव्यपदेशात्तदन्यथा चापि व्यपदेशः कल्पितभे
दपि तदर्थः ।८९। १२

पृथ

लिंगदेहपरमाम्नायाविरोधस्य प्रकाशकः द्वितीयस्य चतुर्थपादमारभ्यतेधुना।१। तथा प्राणाः।१। एतस्माज्जायते प्राण इति श्रुतेर्नभः। जायते भूमिवाय्वादिसाह
चर्यादिनीर्यते।२। तथेंद्रियाणि जायंते जनिश्रुत्यविशेषतः। इतिवक्तव्यमेवेह प्राणशब्दार्थ इंद्रियं।३। गौण्यसंभवात्।२। मुख्या प्राणोत्पत्तिरत्र गौण्युत्पत्तेरसंभ
वात्।४। एकविज्ञानतः सर्वविज्ञानप्रतिपादनं। बाध्येत प्राणनिसृष्टेस्तस्माद्गौणी जनिर्नहि।५। स एष प्राणिंद्रियाणां हि सत्वं यच्छ्रूयते श्रुतौ। हिरण्यगर्भप्राणानां तद्देवानरसर्ग
गं।६। तत्प्राक् श्रुतेश्च।३। श्रुतौ जायत इत्यस्य ... जन्मवद्वाचकस्य हि। वाय्वादिषु तु मुख्यस्य तेभ्यः प्राचीनवृत्तिषु। समानवाक्यपठितमनः प्राणेंद्रियादिषु। सम्भव
यस्य श्रवणादपि गौणी जनिर्नहि।८। तत्पूर्वकत्वाद्वाचः।४। ब्रह्मप्रकृतिकान्येव तेजोब्रन्नानि यानि तु। प्राणस्य मनसो वाचस्तज्जन्यत्वाभिधानतः। छांदोग्योक्तौ न नि भा
गेप्यस्तींद्रियजनिश्रुतिः।९। छांदोग्ये वा श्रुतिकथनं सर्वेंद्रियोपलक्षणमिति भावः।९। इतिश्री० सु इंद्रियाणां ब्रह्म ... विकारित्वसाधकमिंद्रियोत्पत्त्यधिकर
णं चतुःसूत्रं प्रथमं।१। सप्तगतेर्विशेषितत्वाच्च।१। येषामुत्क्रांतिसमये प्राणेन गमनं सह। भोगस्य साधनत्वाद्धि तेषामेवेंद्रियात्मता।१०। घ्राणादीनां हि सप्तानां प्राणे
नोत्क्रमणश्रुतेः। विशेषितत्वेन सर्वशब्दसंकोचनादपि।११। प्राणादिकानि सप्तैवेंद्रियाणीति शंकते। घ्राणादयस्तु सप्तैव तयोत्क्रांत्या विशेषिताः।१२। घ्राणरसनच
क्षुः श्रोत्रवक्त्रमनो वाचइति सप्त। तेन मुख्यप्राणमुत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीत्र सर्वशब्दस्य सप्तप्राणेष्वेव संकोचो नेकादश प्राणेष्विति शंका। सप्तप्राणाः प्रभवंति
तस्मादिति सप्तोत्पत्तेः साक्षाच्छ्रुतत्वाच्चेति शंकाशयः।१२। सिद्धांतयति। हस्तादयस्तु स्थितेतो नैवं।२। हस्तादयेपि सप्तभ्योधिकाः प्राणाः श्रुतीरिताः। हस्तो वै ग्रह इत्याद्ये
र्ग्रहत्वे तेषां श्रुतीरिता।१३। ग्रहत्वं वा नेवं सह प्राणेन गमनं विना। ग्रहत्वमेव गमकं प्राणत्वस्य करादिषु।१४। सर्वे प्राणा अनूत्क्रामंतीति सर्वेंद्रियोत्क्रमः। तेनसिध्यति
सप्तानामुत्क्रमोत्रोपलक्षणं।१५। सर्वेंद्रियाणां ग्रहता हत्रबंधकतोच्यते।१६। सप्तत्वाभिधसंख्यायामनंतर्भावमागते। स्थिते सप्तवातिरेके तदंतर्भवति सप्तता।१७।
बहुत्वे न्यूनसंख्यायाअंतर्भावस्य संभवात्। अतः सप्तैवेंद्रियाणीत्येवं वक्तव्यमेव न।१८। किंतु कर्मेंद्रियाण्याहुः पंचज्ञानेंद्रियाणि च। एकादशं मन इति
श्रुतयस्तत्र तत्र हि।१९। इहामुत्र स्वविषयभोगसाधनमिंद्रियं। प्राणेन सह गंतृत्वे सतीतींद्रियलक्षणं।२०। इतिश्री० सु सप्राणोत्क्रांतिमत्त्वेनैकादशा
नामपींद्रियत्वसाधकं द्विसूत्रं प्राणाधिकरणं द्वितीयं।२। अणवश्च।१। इमे प्राणाः परिच्छिन्नाः सूक्ष्माश्चांतींद्रियत्वतः। अण्वात्मपक्षोक्तदोषाः
स्युश्चेत्तेपरमाणवः।२१। इतिश्री० सु इंद्रियाणां सूक्ष्मत्वपरिच्छिन्नत्वसाधकमेकसूत्रं तृतीयमधिकरणं।३। १३

श्रेष्ठश्च।१। मुख्यः प्राणोपींद्रियवद्धूतणः खलु जायते। एतस्माज्जायत इति जनिश्रुत्यविशेषतः।२२। इतिश्री० सु प्राणवायूत्पत्तिसाधकमेकसू
त्रं प्राणातिदेशाधिकरणं चतुर्थं।४। न वायुक्रिये पृथगुपदेशात्।१। न प्राणो वायुसामान्यं नापींद्रियविचेष्टितं। वायोस्तथेंद्रियेभ्यश्च पृथक्त्वेन जनिश्रुतेः।२३।
व्यापारेभ्यस्त्विंद्रियाणां पृथग्जन्माश्रुतावपि। वृत्तिवृत्तिमतोर्भेदाभावस्यात्र विवक्षया।२४। इंद्रियेभ्यः पृथक्त्वात्तद्व्यापारात्पृथक्कृता। प्राणस्योक्ताभवत्यर्थ
दिति सूत्रकृदाशयः।२५। व्यापार एवेंद्रियाणां प्राणः सांख्यविदां मते।२६। नव्यापारो न च वायुः किंतु वेदांतिनां नये। तत्तांतरं वायुजं तत्त्वं प्राणाख्यं देहचालकं।२७।
चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः।२। जीवस्य कार्ये प्राणोपि करणं चक्षुरादिवत्। प्राणस्यापि श्रुतावुक्तेः सह तैश्चक्षुरादिभिः।२८। भौतिकत्वाचेतनत्वे सूत्रस्था
दिपदेरिते। सजातीयपदार्थानां युज्यते सहशासनं। अतः स्वतंत्रतानास्यासादने जीव एव एव सः।२९। अकरणत्वाच्च न दोषस्तथा हि दर्शयति।३। श्रोत्रवच्च घ्रा
णरसनचक्षुःकरणकेद्वयं। कार्यसाधारणो हेतुः प्राणो तु करणं न सः।३०। इति चेन्नैष दोषोस्मिन्प्राणे कल्पयितुं क्षमः। श्रोत्रादिसाध्यकार्येषु प्राणो करणता हि।३१। सो
श्रोत्राद्यसाध्ये देहस्य धारणे करणं हि सः। सुषुप्त्यादौ देहधृतौ वै साधारणकारणं।३२। तथा हि दर्शयेत्तमर्थं श्रुतिनिषत्स्वयं। प्राणेन रक्षन्नवरं कुलायं स्वपितीति हि।३३।
पंचवृत्तिर्मनोवद्व्यपदिश्यते।४। असाधारणकार्याणि नु चक्षुः सादीन्यपेक्ष्य सः। पंचवृत्तिरपि प्राणो मनोवद्व्यपदिश्यते।३४। यथांतःकरणं चित्तं तद्वदसाधारकार्यके
चित्तं बुद्धिरहंकारो मन इत्यभिधीयते।३५। तथा प्राणः पंचधायं प्राणापानादिभेदतः। जीवस्य कार्यकरणं मनोवच्चक्षुरादिवत्।३७। इतिश्री० सु प्राणवायुस्वरूपनि
र्णायकं चतुःसूत्रं पंचममधिकरणं।५। अणुश्च।१। मुख्यः प्राणोपींद्रियवत्परिच्छिन्नश्च सूक्ष्मकः। अण्वात्मपक्षे दोषाः स्युश्चेत्सोणुपरिमाणवान्।३८। इतिश्री०
सु प्राणवायोः परिच्छिन्नत्वसूक्ष्मत्वसाधकमेकसूत्रं षष्ठमधिकरणं।६। ज्योतिराद्यधिष्ठानं तु तदामननात्।१। स्वस्वदेवतनेपादेहे ज्योतिरादिकयेंद्रियं। प्रवर्तितं चेष्टते
त्रौ कहतास्य तु श्रुतौ।३९। प्राणवता शब्दात्।२। स्वस्वामिभावसंबंधो जीवेनेवेंद्रियस्य हि। तेनेंद्रियोत्थभोगस्य भोक्ता जीवो न देवता। श्रुसात्मकादयं शब्दादर्थो विज्ञायते स्फुटं
।४०। प्राणवाञ्जीवः।४०। तस्य च नित्यत्वात्।३। स्वकर्मोपार्जिते देहे तस्य जीवस्य युक्तितः। नियततावाचकर्तृत्वभोक्तृत्वभोगिता।४१। इतिश्री० सु जीवस्येंद्रियसाध्यभोक्तृ
साधकं त्रिसूत्रं सप्तमाधिकरणं।७। त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्।१। तत्त्वांतराणींद्रियाणि मुख्यप्राणान्मतानि हि। एतस्माज्जायत इति तद्भेददर्शनात्॥
।४२। एतस्माज्जायते प्राण इति तद्भेददर्शनात्। मुख्यप्राणादन्य एव नैव तद्वृत्तयो हि ते। ... वागाद्यो ये प्राणाख्या इंद्रियाणीति संज्ञिताः।४३। प्राणशब्दव्यवहृतिः
प्राणाधीनप्रचारतः।४४। तत्त्वांतराणीत्यादिमतानीहीत्यंतं सूत्रबहिर्भूतांप्रतिज्ञा। तद्व्यपदेशादिति सूत्रगस्तत्र हेतुः ... श्रेष्ठादन्यत्र प्रथमार्थे सप्तमी अन्य एव

प्राणाधीनचेष्टावत्वेनलक्षणया दो

नतु प्राणवत्तयैव प्राणशब्दे नछांदोग्ये व्यवहृता वागादयोमनः सहितास्एकादश ते एतस्माज्जायते प्राण इतिश्रुतो प्राणास्तथाद्वेदशादेवइंद्रियाणि मुच्यंत इत्यर्थः। यदितु अन्य
त्रेसस्य छांदोग्याद्यचक्षुरादिसर्थस्तदान्य इत्यध्यायी भवति। एवं चेत्सन्नमुक्तरीत्यावास्य दृग्गर्भितं नभाष्यव्याख्यनमस्ति। ४४। पृथग्दिशासामर्थ्यादिंद्रियेभ्यः श्रुतौ
मनः। वेदांतपरिभाषादावनिंद्रियमिती रितं। ४५। मनःषष्ठानींद्रियाणिप्रकृतिस्थानिकर्षति। इतींद्रियसंमनसोगीतोक्तमितियेपरे। ४६। भेदश्रुतेः। २। नप्राणवत्तयोक्ता
विद्यास्त्वन्यप्राणमूचतुः। इतिभेदश्रुतेः सद्भावात्प्रकरणांतरे। ४७। आस्येभवमासन्यं प्राणंशागादयः कर्मकर्तभावेनोचतुः। ४७। वैलक्षण्याच्च। ३। प्राणस्थितिर्नेंद्रियाणां
सुषुप्तौविनिपुष्कलात्। वैलक्षण्याद्देंद्रियाणांप्राणात्तत्वांतराणिहि। ४८। इतिश्री०सुइंद्रियाणांप्राणवायोः पृथक्त्वांतरस्त्रप्राणवायुरुत्पत्तिप्रकरणसाधकंत्रिसप्त
त्रमष्टमाधिकरणं। ८। संज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशात्। १। नामरूपव्याकृतिस्तुत्रिवृत्कुर्वत एवहि। ईशस्यकार्यं भवति नैवतज्जीवकर्तृकं। ४९। राजाहचारेण
स्थामीत्यादिवत्प्रयोजकर्तृत्वंकिंतुघटंकरोतीतिवत्साक्षात्कर्तृत्वमितिभावः। ४९। अहंव्याकरवाणीतिमुख्यकर्तृत्वकीर्तनात्। जीवेनेतिपदस्यानुप्रवेशपदेन्वयात्। ५०। मां वि
सादिभौमंयथाशब्दमितरयोश्च। २। यत्तद्बीह्यादिरूपायाभक्षितायाभुवस्त्रनौ। त्रिवृत्कृतायाः कार्यंतु मनोमांसपुरीषकं। ५१। तथैवेतरयोर्वारितेजसोश्च यथाश्रुति। तत्तत्का
र्यंहिविज्ञेयंस्थूलदेहभृदेहिनां। ५२। मूत्रंप्राणोरक्तमितिवारिकार्यंप्रकीर्तितं। अस्थिमज्जावागितितुतेजः कार्यमुदाहृतं। ५३। वैशेष्यात्तु तद्वादस्तद्वादः। ३। त्रि
वे वृत्कृतेसविशेषेपि भूम्यादीनांतनोमिथः। तत्तद्भागस्यबाहुल्यात्तत्तन्नुरितिप्रथा। ५४। सूत्रांशभागाभ्यासोत्राध्यायपूर्तिप्रकाशकः। श्रौतीत्रिवृत्कृतिर्हि पंची
कृत्युपलक्षणं। ५५। पंचीकृतिप्रकारस्तुपंचदश्यांनिरूपितः। श्रीविद्यारण्यपादाद्यैः सएवात्रप्रदर्श्यते। ५६। द्विधाविधायचैकैकं चतुर्धाप्रथमंपुनः। स्वस्वेतरद्वितीयां
त्रैर्योजनात्पंचपंचते। ५७। इतिश्रीभगवद्वेदव्यासकृतौशारीरकब्रह्ममीमांसासूत्रेषुगुणसूत्रोपेताधिकरणार्थसंग्राहककारिकासुअविरोधाख्यद्वितीयाध्यायेलिंगदेहघटक
पंचभूतादुत्पत्त्यव्यापारस्वरूपोत्पत्तिविषयकश्रुत्यविरोधउत्पादकव्यापारभूतोत्पादनविषयकश्रुत्यविरोधोनामनवाधिकरणात्मकश्चतुर्थःपादः। अत्रसूत्राणि। २२। इतिश्रीअ
विरोधाध्यायः समाप्तः। ।अत्रपादचतुष्टयकारिकाः। प्रथमेपादे १०५। द्वितीये १८३। तृतीये ११२। चतुर्थे ५७। सर्वसंकलनायांसंख्या। ४५७। अथात्रप्रतिपादंसूत्राण्य
धिकरणानि च। प्रथमे। सू० ३७। अ० १३। द्वितीये। सू० ४५। अ० ८। तृतीये। सू० ५३। अ० १७। चतुर्थेपादे। सू० २२। अ० ९। सर्वसंकलनायां। सू० १५७। अ० ४७।

४ इतिश्री० सुत्रिसूत्रंपरमेश्वरस्यैवनामरूपात्मकसर्वजगत्कर्तृत्वसाधकंनवममधिकरणं। ९। ४ शास्त्रे २ क्रमेण ९४

मग्नाद्यंद्

ब्रह्मणोदाशकितवादित्वमेकअधीयते। अथर्ववेदैकदेशास्तत्त्वमभेदेहियुज्यते। ८९। अंतर्यामित्वकथनादंशत्वंजीवगंतुयत्। भ्रमप्रतिभेदेनघटतेऽतोऽविरुद्धता। ९०
मंत्रवर्णाच्च। २। पादोस्यविश्वाभूतानीत्यपिमंत्रस्यलिंगतः। अपिचस्मर्यते। ३। स्मर्यतेपिचगीतासुममैवांशइतिस्फुटं। अतोजीवोब्रह्मणोंशः कल्पितादृष्टतोमतः।
। ९१। प्रकाशादिवन्नैवंपरः। ४। दुःखीजीवोयथानैवंपरमात्माकदापिहि। प्रकाशकाशकमलपत्रवन्नैवलिप्यते। ९२। स्मरंतिच। ५। स्मरंतीशंहिनिर्लिप्तंश्रुतिर
प्येवमाहहि। तत्रयः परमात्मासौसस्मृतोनिर्गुणः स्मृतः। ९३। नलिप्यतेफलैश्चापिपद्मपत्रमिवांभसा। कर्मात्मात्वपरोयोसौमोक्षबंधैः सयुज्यते। इति। ९४। एव
मर्थस्पष्टमाहद्वासुपर्णेतिचश्रुतिः। ९५। अनुज्ञापरिहारौदेहसंबंधाज्ज्योतिरादिवत्। ६। सर्वत्रात्मनएकत्वेप्यनुज्ञापरिहारकौ। तत्तद्देहेनसंबंधाद्धटेतेज्योतिरादि
वत्। ९६। श्रोत्रियागारगोवह्निर्ग्राह्योनैवश्मशानगः। केवलंहिपयोग्राह्यंनलवणान्वितं। ९७। एवंगुणैर्नाभावमापन्नस्याज्यमुच्यते। स्यांगनाभावमापन्नो
ग्राह्यआत्मेयतेखलु। ९८। असंततेश्चाव्यतिकरः। ७। पुण्यपापाद्यधिष्ठानोपाधीनांहिपरस्परं। असंबद्धत्वतोन्योन्यंधर्मादीनामसंकरः। ९९। आभास
एवच। ८। स्वस्वधर्मादिसंबंधोयोयोजीवोस्तिसोत्रतु। उचितआभासएवायंनातोधर्मादिसंकरः। १००। प्रतिबिंबोपाधिधर्माः स्वकीयेप्रतिबिंबके। चंचलत्वादयोभाति
परकीयेतुनैवते। १। बिंबस्यरूपधर्मास्तुसर्वत्रप्रतिबिंबके। भांत्येवकेचिन्निखिलास्तुसतिप्रतिबंधके। २। बिंबस्यप्रतिबिंबेतन्यत्वेपिभ्रमाद्दिदा। जपाकुसुमलौहित्यंस्फा
टिकेपियथातथा। ३। अदृष्टानियमात्। ९। येवाहुर्विभवोजीवाअनेकइतितन्मते। धर्मादिसंकरोन्योन्यमदृष्टानियमाद्भवेत्। ४। तथाहि। सुखादिजनका
अभिसंध्यादिष्वपिचैवं। १०। इदंफलंमयाप्राप्तकरिष्येहमतःपरं। अभिसंध्यादयस्त्वित्थंप्रमात्मनियताहिये। ७। तेस्वप्रयोज्यादृष्टानांभवंतिहिनियामकाः। इत्याक्षे
प्सुपरिहारार्थमभिसंध्येतिसूत्रकं। ८। अभिसंध्यास्मृतिमिनासंकल्पाआदिशब्दगाः। करिष्यामिकरिष्येहमित्याद्याःप्रतिजीवगाः। ९। सूत्रार्थस्तु। साधारणमनोयोगस्या
दात्मदेशाद्भविष्यति। अभिसंध्यादिनियमइतिचेन्नभवेदयं। ११। सर्वेषामपिदेहानांमध्येसर्वात्मनामपि। सर्वत्रास्त्येवसंयोगोदेहक्लृप्तिरतोनहि। ११२। इत्येका
दशसूत्रंजीवात्मपरमात्मनामौपाधिकांशांशिभावसाधकंसप्तदशमधिकरणं। १७। इतिश्री० सुद्वितीयेऽविरोधाध्यायेभूतश्रुत्यविरोधभोक्तृश्रुत्यविरोधोना
मसप्तदशाधिकरणात्मकस्तृतीयःपादः। ।।अत्रसूत्राणि। ।।५३।

१ ग्निवाक्लृप्यदि देवेषु वाक्प्राणादीनां लयश्रुतेः। मृतावूर्ध्वगतिस्तेषां नेति चेन्न बुधोऽभवान् १४ वागादीनां तेज आदौ यो लयो वर्णितः श्रुतौ। न स
मुख्यः किंतु गौण इति गौणत्वनिर्णयात् १५ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ५ द्युलोकनाम्नि प्रथमेऽग्नावपामाहुतेः स्फुटं। श्रुताव
श्रवणात्तत्र श्रद्धाख्याहुतिकीर्तनात् १६ पर्जन्यादिचतुर्थाग्निष्वपां तु श्रवणान्न तु। पंचवारं त्वाहुतित्वमपां नास्तीति चेन्न तत् १७ सिद्धां
तस्तु। श्रद्धाशब्देन ता एव ह्याप उक्ता भवंति वै। श्रद्धाजनकता योगात् लक्षणासंभवाज्जले १८ पंचवाराहुतितेन ह्यपां पुरुषसंज्ञिता। पंच
म्यामाहुतौ तेन सिद्धा भवति वेदगा १९ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ६ जीवस्याबादिवद्देहगमनस्याश्रुतत्वतः। नाबादि
भूतसंयुक्तो जीव एतीति चेन्न तत् २० उक्तं द्युलोकगमनमिष्टापूर्तप्रकुर्वतां। इष्टापूर्ताख्यसत्कर्मकारिणां धूमकादिना २१ पथा
गतानां सोमस्य लोकसंज्ञा श्रुतौ कृता। सोमो राजेति तत्संज्ञेष्टादिकारिशरीरिणां। श्रद्धाख्याहुतिसंबंधात्त्वेषु सिद्धेव दर्शितः २२
सूत्रार्थस्तु। सोमो राजेति संज्ञा स्त्रियेषामिष्टादिकारिणां। श्रुतौ पंचाग्निविद्यायामप्संबंधितया खलु २३ तेषामेव प्रतीतत्वादेष्वबादिभि
रावृतः। श्रद्धाशब्देन ता एव ह्याप इत्युक्तमेव हि २४ भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति ७ इष्टादिकारिणां चंद्रलोकगानां स्वक
र्मजः। फलभोगो न घटतेऽन्नं ते हि दिवौकसां २५ देवास्तान्भक्षयंतीति श्रुतिरस्तीति चेन्न तत्। इष्टादिकारिणां तेषामन्नत्वं गौणमेव
हि २६ स्वर्गकामो यजेतेति श्रुतिबाधप्रसंगतः। यदि देवैर्भक्षितास्युर्जीरं स्वः सुखं कथं २७ तेषामनात्मवित्त्वाद्धि हविरादिप्रदानतः। १

देवभोग्योपकारित्वादन्नत्वव्यपदेशनं २८ तथाहि दर्शयत्येतां देवभोग्योपकारितां। श्रुतिरात्मानभिज्ञानां प्रवृत्त्यत्र स साम्प्रतः २९ यद्वा।
पंचाग्निविद्याशून्यानां केवलेष्टादिकारिणां। क्रममुक्तेरभावेन देवान्नत्वेन धिकृतिः ३० मुख्यान्नत्वे सोमलोके फलभोगः श्रुतीरितः। न घ
टेत तन्नो गौणमन्नत्वमिति योजना ३१ स्वकर्मफलभोगार्थं परलोकं व्रजत्ययं। जीवो भूतपरिष्वक्त इति सिद्धमिहादितः ३२ इति
साधनाध्याये प्रथमे वैराग्यपादस्य सप्तसूत्रमनात्मवित् जीवस्य देहांतरारंभकत्रिवृत्कृतभूतैः सह परलोकगमनपूर्वकमामुष्मिक
स्वकर्मफलभोगावसानप्राप्ताधःपतनभयजननद्वारा विषयवैराग्यसंपादनसूचकं रंहत्यधिकरणं प्रथमं १ कृतात्ययेऽनुश
यवान्दृष्टस्मृतिभ्यां यथेतमनेवं च १ कृतस्य कर्मणो भोगान्नाशेऽनुशयवानधः। स्वर्गाज्जीवः समायाति यथेतं किंचिदन्यथा ३३
श्रुतिस्मृतिभ्यामर्थोयं स्पष्टमेवावगम्यते। आमुष्मिकान्यफलदं कर्मानुशय उच्यते ३४ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णा
जिनिः २ सदाचाराद्दुराचारात्सदसद्योनिसंभवः। श्रूयतेऽतोऽनुशयवानायातीति चेन्न तत् ३५ कार्ष्णाजिन्याख्य आचार्य इयमाच
रणश्रुतिः। दिष्टरूपानुशयोपलक्षणार्थेति मन्यते ३६ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ३ पुण्यपापविशेषानुशयेन सदसज्ज
नो। सतोऽसतो वाचारस्य वैयर्थ्यमिति चेन्न तत् ३७ जीवनिष्ठानुशयस्याचारपेक्षत्वतो जनौ। चरणस्यार्थवत्त्वेन नानर्थक्यस्य संभवः
३८ पुण्यपापे एव वेदउक्ते आचारशब्दतः। बादरी वाचार्य इत्याहायात्यतोऽनुशयान्वितः ३९ इति सानुशयजीवावरोहणबोधकं
चतुःसूत्रं कृतात्ययाधिकरणं द्वितीयं २ अनिष्टादिकारिणामपि च श्रुतं १ निषिद्धाविहितकुर्वतामपीष्टादिकर्तृवत्।

२ सुकृतदुष्कृते एवेति तु बादरिः।४।

२ चंद्रस्यलोकेगमनंश्रुतमस्तीतिशंकते ४० संयमनेत्वनुभूयेतरेषामारोहावरोहौतद्गतिदर्शनात् २ यमालयेस्वपापानुसारेणयमपा
तनां।अनुभूयपुनर्लोकमिममायांतिपापिनः ४१ एवंभूतावेवतेषामारोहावरोहकौ।यमलोकगतेर्वेदेदर्शनात्तगतिर्दिवि ४२ स्मरं
ति च ३ स्मरंत्यपिहिमन्वाद्याःपापिनांनरकेगतिं।अपि च सप्त ४ किंचपौराणिकाःप्राहुर्नरकान्सप्तपापिनां ४३ तत्रापि च तद्व्यापारादवि
रोधः ५ यमव्यापारसत्वाच्चित्रगुप्ताद्याः यमव्यापारसत्वाच्चित्रगुप्ताद्यैःशासनाद्यविरोधिता ४४ विद्याकर्मणोरिति तु प्रकृतत्वात् ६ मृ
तमात्रैर्जनैःसर्वैश्चंद्रलोकोनपूर्यते।विद्यासत्कर्मरहितैर्बहुभिःपापिभिर्जनैः ४५ नप्राप्यतेचंद्रलोकेतेषांमार्गस्तृतीयकः।यमलो
कगतेर्हेतुरतःसर्वेनचंद्रगाः ४६ सत्कर्मकारिणोयेतेपितृयानेनचंद्रगाः।विद्याढ्यादेवयानाख्यमार्गेणब्रह्मलोकगाः ४७ अतोमता
येतसर्वेगच्छंतीदुमितिश्रुतौ।सर्वशब्दस्यसंकोचःकार्यइष्टादिकारिषु ४८ एवमिष्टानिष्टकारिसमौलोकौविधोरिति।शं
कापनोदनार्थोहितुकारोत्रसस्तृत्रगः ४९ सूत्रार्थस्तु।असंभूतिश्रुतौचंद्रलोकस्यत्येतयोरिति।षष्ठीद्विवचनांतस्यार्थोविद्याकर्मणो
रिति ५० प्रकृतत्वाद्धितुतयात्रविद्याकर्मणोरतः।प्रापकत्वंदेवयानपितृयानाख्यमार्गतः ५१ विद्याकर्मविहीनानांतृतीयस्यपथः
श्रुतेः।नचंद्रलोकसंप्राप्तिरितिसूत्राक्षराशयः ५२ न तृतीये तथोपलब्धेः ७ अपांपुरुषसंज्ञित्वंपंचम्यामाहुताविति।नतृतीयेप्र
विष्टानांपथ्ययंनियमोस्तिहि ५३ विनैवसंख्यानियमंतृतीयपथगामिनां।देहप्राप्तिश्रुतेर्वेदेनियमश्चंद्रगामिनां ५४ स्मर्यतेपि च २

श्रीगणेशायनमः।अथसाधनाख्यस्तृतीयोध्यायआरभ्यते।जीवस्यदुःखसंसारनिरूपणमुखेनहि।वैराग्यायाद्यपादोयंतृतीया
ध्यायउच्यते १ तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां १ देहांतरस्यसंप्राप्तौपूर्वदेहाद्विनिर्गतः।त्रिवृत्कृतैःसूक्ष्मभूते
र्जीवोयुक्तोहिगच्छति २ जन्मन्यस्मिंजलमयंदध्यप्रभृतियद्धविः।श्रद्धापूर्वंहुतंस्वाग्नौसूक्ष्माआपःप्रपद्यते ३ ताआपोयश्चलिंगा
ख्यदेहाधाराभवंतिहि।लिंगद्वाराद्युलोकस्थायांतिसोमाख्यदेहकं ४ ततःपर्जन्यमापन्नावृष्टिरूपाभवंतिहि।ततःपृथ्वींगता
व्रीह्याद्यन्नरूपाभवंतिहि ५ ततःपुरुषमापन्नारेतोरूपाभवंतिताः।ततस्तुयोषितंप्राप्यतत्रगर्भात्मनास्थिताः ६ एवंपुरुषदेहा
ख्यांप्राप्ताःपरिणतिक्रमात्।अपामियंपरिणतिर्जीवेनगमनंसह।प्रबोधयतितस्मात्तत्परिष्वक्तःसगच्छति ७ अयंपंचाग्निवि
द्यायामर्थोवेदेहिसूचितः।विद्याप्रश्नोपदेशाभ्यांपंचम्यामाहुताविति ८ पंचद्युलोकपर्जन्यपृथ्वीपुरुषयोषितः।अग्निबुध्योपास्य
तयानद्वियाथानिरूपिताः ९ श्रुतावस्यामवग्रहणमन्यभूतोपलक्षणं।इसेतदग्रिमसूत्रेसूत्रकारोहिवक्ष्यति १० त्र्यात्मकत्वात्तुभू
यस्त्वात् २ वातपित्तकफैर्वायुतेजोजलसमुद्भवैः।त्र्यात्मकत्वाच्छरीरस्यभूतत्रितयजन्यता।तत्रिष्वपांहिभूयस्त्वादपशब्दोन्योपल
क्षणं ११ प्राणगतेश्च ३ स्थूलदेहस्वरूपाणिभूतान्याश्रित्यतिष्ठतां।मुख्यप्राणेंद्रियाणांचमृतावूर्ध्वगतिश्रुतेः १२ प्राणाभूता
श्रितास्एवगच्छंतीतियुसिध्यति।अतोपितत्परिष्वक्तोरंहतीतिहिसिध्यति १३ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ४ अ

२ ध्यन्नेस्वभोगार्थमन्यैर्जीवैरधिष्ठिते।संसर्गमात्रंजीवानांव्रीह्यादेरवरोहतां ६४ जीवप्राक्तनकर्मानुवादेनैवयथाकृतः।पूर्वमाकाशादि
भावकथनावसरेतथा ६५ व्रीह्यादिभावकथनावसरेपिकृतोनसः।किंतुव्रीह्यादिभावेनजायंतइतिकीर्तनात् ६६ कर्मानुवादाभा
वेनजायंतइतिहिश्रुतिः।संसर्गवंतोजायंतइत्यर्थंगौणमाहहि ६७ अशुद्धमितिचेन्नशब्दात् २ ज्योतिष्टोमादिकेकर्मपशुहिंसनयो
गतः।अशुद्धंतत्फलवतांजीवानामनुशायिनां ६८ अवरोहेस्थावरेषुदुःखरूपंफलमस्यते।मुख्यमेवहजन्मास्तुव्रीह्यादिष्वितिचेन्नतत्
ब्र ६९ वैधायजेतिशास्त्रान्नाधर्मरूपंकिंतुपुण्यदं।अतस्तत्कर्मकर्तृणांनमुख्यंजन्मतेषुवै ७० रेतःसिग्योगोथ ३ अन्नभावोर्ध्वमाम्नाये
रेतःसिग्भावउच्यते।नसमुख्यःपूर्ववदभिलापाद्योगएवसः ७१ योनेःशरीरं ४ प्रविष्टेरेतोयोनेर्हिशरीरमनुशायिनां।उत्पद्यतेऽ
नुशयाख्यकर्मभोगायजन्मिनां ७२ इत्याहरमणीयाचरणाइत्यादिकाश्रुतिः।तस्माद्योनौजन्ममुख्यंसंसर्गस्त्वितरेषुहि ७३
इतिचतुःसूत्रंसानुशयस्वर्गैकदेशचंद्रलोकावरोहिजीवानांमुख्यगौणजन्मविभाजकमन्याधिष्ठिताधिकरणंषष्ठं ६ इतिषडधि
करणात्मकःसप्तविंशतिसूत्रःसाधनाख्यतृतीयाध्यायेवैराग्यपादःप्रथमः महावाक्यार्थबोधार्थंतत्वंशब्दार्थशोधकः।तृती
याध्यायगःपादोद्वितीयःप्रोच्यतेधुना ७४ संध्येसृष्टिराहहि १ स्वप्नजाग्रत्सुषुप्त्योर्वैसंधिजेयानुभूयते।व्यावहारिकवत्सृष्टिःसा
नैवप्रातिभासिकी।यतोर्थमिममाम्नायोवदतीतिनुशंकते ७५ निर्मातारंचैकेपुत्रादयश्च २ किंचैकेशाखिनःप्राहुर्निर्मातारंतदे २

श्वरं।कामानांकाम्यंतइतिकामाएवसुतादयः ७६ ईशस्रष्टत्वतःसत्यास्वप्नसृष्टिर्द्रुमादिवत्।घटादिवद्वयादीनांसर्जनोक्तेश्च
सत्यता ७७ इत्याक्षेपस्तुत्रकारोमायामात्रमितीरयन्।तांप्रातिभासिकींप्राहशुक्तिकारजतादिवत् ७८ मायामात्रंतुकार्त्स्न्ये
नानभिव्यक्तस्वरूपत्वात् ३ नहिसत्यास्वप्नसृष्टिःकिंतुसाप्रातिभासिकी।असंबद्धस्वरूपत्वाद्योग्येनसमयादिना ७९ सू
चकश्चहिश्रुतेराचक्षतेतद्विदः ४ असत्योपिभवेत्स्वप्नोभाविसत्यार्थबोधकः।असत्यरजतज्ञानंसत्यहर्षावहंयथा ८० इतिवि
ज्ञायतेवेदात्साकूश्चस्वप्नकोविदाः ८१ यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेषुपश्यति।समृद्धिंतत्रजायात्तस्मिन्स्वप्ननिदर्शनेइतिश्रुतिः ८२ नी
पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधविपर्ययौ ५ जीवेप्यस्तिमहैश्वर्यमीशैश्वर्यसमंसदा।तथापितन्नप्रकटंतिरोहितमवि
द्यया ८३ षड्गुणैश्वर्यसंपन्नपरेशस्यात्मनासह।अभेदेनोपासनयाजायतेतुप्रसन्नता ८४ साक्षात्कारःप्रसादेनसगुणस्यप्रजाय
ते।साक्षात्कारेनिर्गुणात्मविज्ञानमपिजायते ८५ तथाप्युपासासामर्थ्यात्क्रममुक्तेरनंतरं।चरमंतन्निर्गुणात्मविज्ञानंजायतेपुनः ८६
देहावसानेसगुणोपास्यवासनयायुतः।योर्चिरादिमुक्तमार्गेणब्रह्मलोकंसगच्छति ८७ यस्तुनिर्वासनोभूत्वानिर्गुणात्मसमाधिमान्।उपा
सकोपिदेहांतेविदेहंमुक्तिमश्नुते ८८ तथाहि।शिवगीतास्थंशिववाक्यं।सालोक्यमथसारूप्यंसार्ष्टिंसायुज्यमेवच।कैवल्यंचेतितां
विद्धिमुक्तिंराघवपंचधाइति ८९ ब्रह्मलोकंगतोमुक्तःसिद्धाख्यंदेहमेतिवै।परेशोपासनालब्धजगदीशप्रसादतः ९० आविर्भव

तितस्मुक्त ईशेश्वर्यतिरोहितं। ईशांशत्वेन जीवोपि तदैश्वर्यार्ह एव हि ९१ तस्मादीशाद्धि जीवस्य बंधमोक्षौ यतस्ततः। ईशाभिध्यानतो जी
वऐश्वर्यमपि वैस्फुटं ९२ देहयोगाद्वा सोपि ६ ऐश्वर्यस्य तिरोभावोप्यस्मिन्देहादियोगतः। यथा चंद्रगतोच्छ्रस्य जलयोगात्तिरोहि
तिः ९३ ऐश्वर्यस्य तिरोधानमेव नाभाव इष्यते। ईशाभिन्नो जीव इति वा शब्दोत्रावधारणे ९४ इति षट्सूत्रं स्वप्नसृष्टेः शुक्तिरजतव
त्प्रातिभासिकत्वसाधकं संध्याधिकरणं प्रथमं १ तदभावो नाडीषु तच्छ्रुतेरात्मनि च १ स्वप्नाभाववती निद्रा मनोद्वारा हृदंबुजे।
पुरीतदंतः नाडीषु तद्धृते शेषेपि निष्ठतः ९५ नाडी पुरीतदीशानां निद्रास्थानत्वसंश्रुतेः। समुच्चयेन निद्रायाः स्थानत्वं न तु पाक्षिकं ९६ अ
तः प्रबोधोस्मात् २ यतो नाडीगतो देवः सुषुप्तिस्थानमुच्यते। अतो वेदेन जीवस्य देवाज्जागृतिरुच्यते ९७ यो यत्र निद्रितस्तस्मा
देव स्थानात्स बुध्यते ९८ इति जीवस्य सुषुप्त्याख्यावस्थाविशेषबोधकं द्विसूत्रं तदभावाधिकरणं द्वितीयं २ स एव तु कर्मानुस्मृ
तिशब्दविधिभ्यः १ यः प्रसुप्तो भवेद्यत्र स एव प्रतिबुध्यति। कर्मादिपंचहेतुभ्यो नान्यः सुप्तो हि बुध्यते ९९ कृत्वा कर्माणि पूर्वेद्युरनुसं प्र
धाय तानि हि। समापयति तच्छेषं परेद्युर्जागृतिं गतः १०० किंच। योहं पूर्वदिने दृष्टा स एवाद्य दिनेप्यहं। इति स्वमनुसंधत्ते स्वरू
पं जागृतिं गतः १ किंच। यो वै पूर्वदिने दृष्टः स एवाद्य दिनेप्ययं। इतीतरं च स्मरति स्वापोर्ध्वं जागृतिं गतः २ प्रतियोन्याद्रवति बु
द्धांतायेत्यादिका श्रुतिः। साक्षादेवानुवदति प्रसुप्तप्रतिबोधनं ३ किंच। संध्यामहरहः कुर्यादित्यादिकर्मणां विधिः। ४

लोके ८ अपि च द्रौपदीद्रोणधृष्टद्युम्नादिसंभवः। अयोनिजः स्मर्यते हि भारते रोमहर्षिभिः ५५ दर्शनाच्च ९ जरायुजांडजोद्भिज्जस्वेद
जाख्येषु वर्ष्मसु। स्वेदजोद्भिज्जयोः स्त्रीपुंव्यक्तियोगं विनापि हि। उत्पत्तिदर्शनेनापि नियमो नाकृतिष्वयं ५६ तृतीयशब्दावरोधः संशोक
जस्य १० जरायुजांडजोद्भिज्जास्त्रय एव श्रुतौ श्रुताः। देहास्तथापि त्वुद्भिज्जपदात्स्वेदजसंग्रहः ५७ उद्भिद्य भूमिं स्वेदं बाह्योरुत्पत्ति
दर्शनात् ५८ इत्यनिष्टादिकारिणां चंद्रलोकगमनाभावावबोधनपूर्वकमनिष्टादिकारिणां चंद्रलोकसंप्राप्तिबोधकं दशसूत्रम
निष्टादिकार्यधिकरणं तृतीयं ३ तत्स्वाभाव्यापत्तिरुपपत्तेः १ भोक्तव्यं कर्म विक्षीणे त्रिदिवादवरोहतां। आकाशवायुधूमाभ्र
मेघप्रावृट् श्रुतौ श्रुतः ५९ वृष्टिद्वारा प्रवेशस्तत्तो व्रीह्यादिरूपता। अन्नद्वाराथ पुंभावो रेतोद्वारा जनिः स्त्रियां ६० ते प्रावीयःस
तत्साम्यप्राप्तिर्नो तत्स्वरूपता। तत्संसर्गेण तत्साम्यप्राप्तियोग्यत्वसंभवात् ६१ इति सानुशयजीवानां स्वर्गावरोहणक्रम
श्रुताकाशादिभावस्याकाशादिस्वरूपेणोत्पत्तिमत्त्वरत्ननिवारणाय तत्साम्यप्राप्तिपरत्वप्रतिपादकमेकसूत्रं तत्स्वाभा
व्याधिकरणं चतुर्थं ४ नातिचिरेण विशेषात् १ जीवोल्पमल्पं कालं खादिष्ववस्थायसाम्यतः। वृष्टिद्वारा प्रविशति भूमिमि
त्यवधार्यते ६२ भूमेर्व्रीह्यादिधान्येषु प्रवेशोर्ध्वविनिर्गमे। श्रुत्या कालविलंबाल विशेषस्य प्रदर्शनात् ६३ इत्येकसूत्रं सा
नुशयजीवस्य गगनावरोहणकाल विलंबाविलंबावबोधकं पंचमाधिकरणं ५ अन्याधिष्ठितपूर्ववदभिलापात् १ व्रीह्या

उपदिष्टं निर्विशेषं ब्रह्म श्रुत्याय यथा तथा। अनादिमत्परं ब्रह्मेत्यादिना स्मर्यतेऽपि च १५ अत एव चोपमा सूर्यकादिवत् ८ यत एव
५ निषेधेन परस्यात्मोपदिश्यते। निर्विशेषो न एवास्मिन्नुपमा सूर्यकादिवत् १६ श्रुताबुक्तास्ति तेनापि निर्विशेषक एव सः। यथा
ह्ययं ज्योतिरात्मेत्यादिरत्र श्रुतिः स्फुटा १७ अम्बुवदग्रहणात्तु न तथात्वं ९ सूर्यादिकेभ्यो मूर्तेभ्यो भिन्नं दूरस्थमंबुवे। प्रतिबिंबो
पाधिभूतं तद्दृश्यते ह्ययथा तथा १८ अमूर्ताद्व्यापकाद्विशाद्दूरस्थोपाध्यदर्शनात्। दृष्टांतो विषमोत्रात्मनि सूर्यादितुल्यता। इ
त्याक्षिप्य समाधत्ते वृद्धिह्रासेति सूत्रतः १९ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामंजस्यादेवं १० यथेन प्रतिबिंबस्य जलेऽन्तर्भव
तो न हि। वास्तवं वृद्धिह्रासादि भाक्त्वं जलगतं तथा २० अविकार्यात्मनो देहांतर्भावाद्देहगं न तत्। एतावतांशेन तयोः सामंजस्यादुदा
हृतिः। २१ दर्शनाच्च ११ परस्यैव ब्रह्मणो हि प्रतिबिंबनरूपतः। देहमध्यप्रवेशस्य श्रुतोऽस्पष्टं प्रदर्शनात् २२ घटे तेप्रतिबिंबत्वम
पि दुर्घटमात्मनः। विभोः प्रवेशनं नान्यदन्यत्र प्रतिबिंबनात् २३ इत्येकादश सूत्रैः स्वतः परतो वा ब्रह्मणो निर्विशेषत्वसाधकमनु निजरूपेण
भयलिंगाधिकरणं पंचमं ५ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः १ विशेष्यत्वेनोपदेशप्राधान्यात्प्रकृतं जगत्।
परिच्छिन्नं यत्तदेव श्रुतिर्नेति निषेधति २४ तस्मान्निषेधनादूर्ध्वं नामधेयमिषेण हि। भूय आह श्रुतिर्ब्रह्म निर्बाधं सत्स्वरूपकं २५
अतोऽपि नेति नेतीति जगदेव निषिध्यते। अधिष्ठानं निषेधस्य सद्रूपं ब्रह्म शिष्यते २६ तदव्यक्तमाह हि २ तद्ब्रह्माम्नायभिन्नस्य प्रमाण ५

२ औपाधिकं धर्मभेदादिकमुपपद्येक रोतीति कर्म उपाधिरित्यर्थः। २ ७ व्याप्यव्यापकधर्मद्वयविभागेन यथाऽहिकुंडले भिन्नाभिन्ने
७ तथा व्यवस्थया व्याप्यव्यापकधर्मद्वयविभागेन ब्रह्मजीवौ

स्यत गोचरः। स एष नेति नेत्यात्माऽग्राह्यो न हि गृह्यते। इत्यादिका श्रुतिर्यस्मादाहात्मानमगोचरं २७ अपि संराधने प्रत्यक्षानुमानाभ्यां
३ निर्विशेषं ब्रह्म धिया समाधौ निर्विकल्पया। पश्यंत्यपीति वेदस्मृतिभ्यामवगम्यते २८ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्म
ण्यभ्यासात् ४ यथा प्रकाश आकाशोऽपाधौ भाति भिन्नवत्। तथा प्रकाश आत्मापि ध्यानादौ भाति भिन्नवत् २९ वस्तुतस्त्वेकरू
पत्वं जीवात्मपरमात्मनोः। नवकृत्वस्तत्त्वमसीत्यभ्यासादवगम्यते ३० अतोऽनंतेन तथा हि लिंगं ५ औपाधिकत्वाद्भेदस्य विद्यया तन्नि
रस्यतः। ब्रह्मैव जीवोऽनंतेन ब्रह्मणैक्यमुपैति वै ३१ श्रुतिजातं तथा ह्यस्ति ज्ञापकं भेदखंडने। ब्रह्मैव सन्ब्रह्माप्येतीत्याद्यत्र श्रुतिर्दृढं
कं ३२ उभयव्यपदेशात्त्वहिकुंडलवत् ६ ध्यातृध्यानध्येयभावबोधकश्रुतिभिर्भिदा। तत्त्वमस्यादिवाक्येभ्यो ह्यभेदो ब्रह्मजीवयोः
३३ द्विधा श्रुतेर्ब्रह्मजीवौ भिन्नाभिन्नौ व्यवस्थया। यथाहिकुंडले भेदो व्याप्यव्यापकभेदयोः ३४ प्रकाशाश्रयवद्वा तेजस्त्वात् ७ ध
भेदाभेदौ प्रकाशस्य प्रकाशाश्रयतेजसः। तेजस्त्वाविशेषेऽपि यथैवं ब्रह्मजीवयोः ३५ प्रकाशस्तेजस इति भेदः प्रत्यक्षतः स्फुटः।
अभेदोऽपि च तेजस्त्वात्तथैव ब्रह्मजीवयोः ३६ चिद्रूपताविशेषेऽपि द्विधा श्रुत्यभिधं मतं। इत्यन्नयाहिमाभ्यां वै सूत्राभ्यां खंड्यते हि तत्
३७ पूर्ववद्वा ८ प्रकाशवच्चावैशेष्यमित्युक्तो योऽयथा पुरा। स तथैव हि सिद्धांतः पूर्वपक्षस्त्विहेतरः ३८ प्रतिषेधाच्च ९ नेति नेतीति पू
र्वोक्तिश्रुत्या जडनिषेधनात्। नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुत्या ब्रह्मान्यचेतनः ३९ नास्तीति प्रतिषेधाच्च ह्येकमेवाद्वितीयकं। ब्रह्म चि

६ त्य न्मात्रमित्येवसिद्धांतःपर्यवस्यति ४० तेनभेदाभेदपक्षौत्यंतंभेद इत्यपि।पक्षोजगत्सत्यमितिपूर्वपक्षाद्दहाखिलाः ४१ इतिनवसूत्रंने
तिनेतीतिनिषेधस्यपरब्रह्मनिषेधासंभवबोधनपूर्वकप्रपंचमात्रनिषेधसाधकंतत्कृतेतावत्त्वप्रतिषेधाधिकरणंषष्ठं परमतःसेतून्मा
नसंबंधभेदव्यपदेशेभ्यः १ नैकमेवाद्वितीयंसत्किंतस्मादन्यदस्तिहि।सेत्वादिव्यपदेशेभ्यःश्रुतिस्थेभ्यःपृथक्पृथक् ४२ सामान्यात्तु २
उन्मर्तुंनिर्मितःपंथायःससेतुर्जलोपरि।व्यवस्थापकतासाम्यात्सेतुत्वंगौणमात्मनि ४३ बुद्ध्यर्थःपादवत् ३ चतुष्पात्वादिनोन्मानव्यप
देशोनवास्तवः।किंतूपास्त्यर्थआराद्देतस्याद्व्यपदेशवत् ४४ स्थानविशेषात्प्रकाशादिवत् ४ भेदःस्थानविशेषेणयस्तस्याभावएववः।
ससुषुप्तेपरिष्वंगोजीवस्यब्रह्मणोच्यते ४५ अस्यादित्यस्थंपुंसोस्त्वभेदःस्थानविशेषतः।उपासनार्थमेवोक्तोनहिवास्तवइष्यते ४६ य
थाप्रकाशएकोपिविरल्यंगुलिमध्यगः।विछिन्नवत्करस्यापस्तौसंबद्धवन्मिथः ४७ तथात्मैकोपिबुद्धिस्थोविच्छिन्नस्तल्लयेमिथः।सु
षुप्तौसंगतइवभातिनैवाश्रयंस्ततः ४८ घटकुंभाद्यवछिन्नःसद्वितीयोहितल्लये।अद्वितीयोयथाकाशएवमात्माप्युपाधितः ४९ वस्तुतो
नैवसंबंधोनैवभेदोपिवास्तवः।तेनसंबंधभेदाभ्यांसाद्वितीयकतानहि ५० उपपत्तेश्च ५ स्वमपीतोभवतीतिश्रुत्यास्वप्राप्तिकीर्तनात्।गौणः
स्वेनस्वसंबंधःसुषुप्तौब्रह्मजीवयोः ५१ एवमध्यादित्यस्थपुंसोभेदोप्यत्रनवास्तवः।नान्योतोस्तिद्रष्टेत्यादिबहुश्रुतिविरोधतः ५२ स्वमपी
तोभवतीतिनान्योतोस्तीतिसाधकात्।दृष्टांताच्चप्रकाशादेर्गौणत्वंयोगभेदयोः ५३ तथान्यप्रतिषेधात् ६ यथासेत्वादिहेतुभ्यानैववस्तं ६

प्रसुप्तपुनरुत्थानंविनात्तुघटतेनहि ४ इत्येकसूत्रंप्रसुप्तस्यनियमेनप्रबोधसूचकंतृतीयाधिकरणं ३ मुग्धेर्धसंपत्तिःप
रिशेषात् १ मूर्च्छासंयुक्तपुरुषेयावस्थापरिदृश्यते।जाग्रदादिचतसृभ्योवैलक्षण्यात्पृथग्घिसा ४ मृतेःसुषुप्तेश्चाधीनां
धर्माणामन्वयोस्यतः।अर्धसंपत्तिरुदितामूर्च्छावस्थात्रपंचमी ५ अर्धशब्दःकतिपयधर्माणांबोधकोत्रहि।बहुव्रीहिःसमा
सोत्रान्वयःसंपत्तिशब्दतः ६ इत्येकसूत्रंजाग्रत्स्वप्नसुषुप्तिमरणावस्थाचतुष्टयातिरिक्तमूर्च्छावस्थासाधकंचतुर्थंमुग्धाधिक
रणं ४ नस्थानतोपिपरस्योभयलिंगंसर्वत्रहि १ स्वरूपतउपाधेश्चद्वैरूप्यंब्रह्मणोनहि।सर्वास्रुपनिषत्स्वस्मिन्सविशेषत्व
खंडनात् ७ नभेदादितिचेन्नप्रत्येकमतद्वचनात् २ ननिर्विशेषंब्रह्मोपास्तिध्येयाकारभेदतः।परमात्माकारभेदादितिचेन्नत्वये
रितं ८ प्रत्युपाधिपरब्रह्माभेदस्यकथनाच्छ्रुतौ।उपास्तिष्वपिसर्वासुनिर्विशेषकमेवतत् ९ अपिचैवमेके ३ किंचैकेशाखिनो
भेदनिंदापूर्वकमामनि।अभेदमेवब्रुवतेनेहनानेतिवाक्यतः १० अरूपवदेवहितत्प्रधानत्वात् ४ निर्धर्ममेवावधारयितव्यंब्रह्म
सर्वदा।निर्गुणब्रह्ममुख्यत्वान्नेहनानेतिहिश्रुतेः ११ प्रकाशवच्चावैयर्थ्यात् ५ ॐमुत्वाधेरुपाधिस्थैःसविशेषंप्रकाशवत्।अ
वैयर्थ्याद्विरोधोनतत्सरायाःश्रुतेरपि १२ आहचतन्मात्रं ६ सयथासैंधवघनइत्याद्याश्रुतिराहहि।निर्विशेषंपरब्रह्मचिन्मात्रे
कस्वरूपकं १३ दर्शयतिचाथोअपिस्मर्यते ७ अथातआदेशोनेतिनेतीतिब्रह्मनिर्गुणं।स्पष्टंनिषेधनद्वाराश्रुतिर्दर्शयतिध्रुवं १४

११ शाखांतरेषु श्रूयंते समहोमाः सवाभिधाः। शतौदनांताः सौर्याद्यास्ते नासंबंध वर्जिताः। १। अथर्वैकाग्निसंबंधा सवपथाथर्ववेदिनां। एकाग्नी
नां नियम्यंते तेऽस्मिन् श्रुतेर्बलात्। २। तथाशिरोव्रतस्यात्र नियमोऽध्ययनं प्रति। न मुंडकोक्तविद्यायां नैतदित्याह श्रुतेः। ३। ८३।

७ समाख्योपास्यदेवताः। शाखाभेदेपियस्यैका अभिन्नं तदुपासनं ६९ भेदान्नेतिचेन्नैकस्यामपि २ षड्वे पंचाग्निविद्यायामग्नीन्वाज
सनेयिनः। पंचाहुरग्नीन्छंदोगाइतिरूपभिदोभयोः ७० रूपभेदान्नविद्यैक्यमितिचेदुत्तरं शृणु। नैकस्यामपिशाखायांरूपभेदोऽस्ति
शाखयोः ७१ पंचद्युलोकपर्जन्यपृथ्वीपुरुषयोषितः। उपास्या अग्निबुद्ध्यातेतुल्या उभयशाखयोः ७२ यजमानमृतेरूर्ध्वं तदीयार्त्विस्सु
दहनैः। अरण्यनीतोऽग्निः षष्ठ उक्तो वाजसनेयिभिः ७३ षोडशिग्रहवत्सोग्निरुभयत्र विकल्प्यते। उपसंह्रियते वाग्निविद्यायां सामवेदि
नां ७४ पंचाग्निविद्यापंचत्वेग्नीनामुभयशाखयोः। षट्त्वेषडग्निविद्येतिसमाख्याख्यातिमर्हति ७५ षडग्निविद्यापंचाग्निविद्येयमितिन
श्रुतौ। साक्षादुक्कमतोऽग्नीनां विद्यैकोभयशाखिनां ७६ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ३ मुंडकाख्यो
पनिषदोध्ययनावसरेश्रुतौ। शिरस्यंगारपात्रस्य धृतिरूपं शिरोव्रतं ७७ कर्तव्यत्वेनोपदिष्टं मुंडकेऽन्यत्र नास्ति तत्। अतोऽन्योपनिषद्ब्र
ह्मविद्यानो मुंडकेरिता ७८ भिन्नैव ब्रह्मविद्येयं शिरोव्रतविशेषिता। इत्याक्षेपस्य संप्राप्तौ समाधत्ते हि सूत्रकृत् ७९ स्वाध्यायस्यैवांगमि
दं न विद्यायाः शिरोव्रतं। यतः स्वाध्यायांगतया वेदव्रतनिरूपके ८० स्वशास्त्र आथर्वणिका मुंडकाध्ययनांगता। आहुः शिरोव्रतस्यापि
तेन विद्यांगतास्य न ८१ किंचाशिरोव्रतानुष्ठात्रा नैतदध्ययमित्यपि। एतच्छब्दादधिकृतमुंडकग्रंथवाचकात्। अधीतइतिशब्दाच्चनै
तद्विद्याविवेदगात् ८२ मुंडकाध्ययनस्यांगं न विद्यांगं शिरोव्रतं। अतो न मुंडकप्रोक्तब्रह्मविद्याभिदान्यतः ८३ दर्शयतिच ४ सर्ववेदैर्य ७

१ सर्वे वेदा यत्पदमामनंती त्यादिका श्रुतिः।

मेकं वदंती ब्रह्मनिर्गुणं। तद्विद्यापार्श्वसर्वत्र दर्शयत्यैक्यमर्थतः ८४ इतिचतुःसूत्रं सगुणनिर्गुणब्रह्मविद्यानामसतिबाधके सर्ववेदांते
षुविद्यैक्यसाधकं सर्ववेदांतप्रत्ययाधिकरणं प्रथमं १ उपसंहारोर्थाभेदाद्विधिशेषवत्समानेच १ श्रुतिभेदेप्येकमात्रविचाराच्चसमा
ख्यया। उपासनेतत्रदेशानुक्ता अन्यत्र चोदिताः ८५ तदीयायेगुणास्तेषां कर्तव्यात्रोपसंहृतिः। उपास्योपासनार्थस्यत्वभेदाद्विधिशेषव
त् ८६ यथाग्निहोत्रकर्मादेरंगत्वेनप्रचोदिताः। शाखांतरेगुणास्तेषां तथात्राप्युपसंहृतिः ८७ इत्येकस्त्वमुपासनैक्येप्रकृतानुक्तान्यो
क्तस्वगुणोपसंहाराधिकरणं द्वितीयं २ अन्यथात्वंशब्दादितिचेन्नाविशेषात् १ प्राणस्योद्गीथकर्तृत्वेनोपास्यत्वंविधीयते। बृहदारण्य
के छांदोग्ये तद्गीथांगभावतः ८८ भिन्नस्वरूपतोपास्य प्राणे शब्दात्प्रतीयते। तेन विद्यैक्यमुभयोर्वेदयोर्नेति चेन्न तत् ८९ अविशेषा
द्धुविधाद्गीथोपासनोभयोः। एकैवचेद्वयोर्ज्ञेयेत्याक्षेपः पूर्वपक्षिणः ९० देवाः प्राणं तमुद्गीथमुपासांचक्रिरेत्विति। यदुद्गीथप
दं तस्योद्गीथकर्तरिलक्षणा ९१ अविशेषबहुत्वानुसारात्स्वीक्रियते ह्यतः। वेदद्वयेप्येवरूप्यंप्राणस्येतिहिशंकते ९२ नवाप्रकर क्रि
णभेदात्परोवरीयस्त्वादिवत् २ उद्गीथकर्तरिप्राणेयद्युद्गीथपदस्यवै। लक्षणास्यात्तमुद्गीथमुपासांचक्रिरेश्रुतौ ९३ तथापिना
त्रविद्यैक्यमोमुपक्रमबाधतः। अतउद्गीथावयवओंकारेत्वेवलक्षणा ९४ तस्मात्परोवरीयस्त्वादिकवद्भेदएवहि। उद्गीथप्राण
विद्यायानैक्यं ध्येयस्यभेदतः ९५ यथोद्गीथोपास्तिसाम्येप्येकत्रोद्गीथआत्मनः। अध्यासेनवरीयस्त्वपरत्वादिगुणैर्युता ९६
उपास्तिराहित्यपुंस्थहेमश्मश्र्वादिधर्मकात्। अन्योद्गीथोपासनाद्भिद्यते प्रकृते तथा ९७ संज्ञातश्चेत्तदुक्तमस्तितुतदपि ३

वसिष्ठत्वंप्रतिष्ठात्वसंपत्तिःपरमा तथा।जनिमत्वायतनत्वेप्राणेप्रोक्ताइमेगुणाः।प्राणस्योपासनायांहिकण्वछंदोगशाखयोः।कौषीतकैतरेयाभ्यांनोक्ताःप्राणइमेगुणाः।
तथाप्यन्यत्रयेप्रोक्ताआहार्याअत्रतेगुणाः।

८ शाखाद्वयेपिसंज्ञैक्याद्विद्यैक्यमितिचेच्छृणु।पूर्वसूत्रेणोत्तरंतत्रोक्तप्रायमेवहि १९ किंच।कठोक्तभिन्नकर्मस्वप्यस्तिका
ठकसंज्ञिता।किंचभिन्नोपासनयोरपिसंज्ञैक्यमस्त्यतः १९ पौरुषेयंतुसंज्ञैक्यंनवि द्यैक्यनियामकं।इत्युपक्रम
बाधस्यप्रसंगाद्दृढआदृतः २०० इतिसंज्ञैक्येपिछांदोग्यबृहदारण्यकस्थोद्गीथप्राणविद्ययोर्भेदसाधकंत्रिसूत्रंतृतीयाधि
करणं ३ व्याप्तेश्चसमंजसं १ अध्यासाद्यपवादाद्वाविशेषणविशेष्ययोः।भावेनवातुल्यधर्मतयावोपासनामता २०१
आदावंतेथवामध्येसामसुव्याप्तिमत्ततः।प्रणवस्यात्रकस्तोरउपास्यइतिसंशये २ अत्रोद्गीथपदंस्वार्थोद्गीथावयवलक्ष
कं।विशेषणंत्वोंपदार्थइत्येवतुसमंजसं ३ इत्येकसूत्रमोंकारोद्गीथावयवयोर्विशेषणविशेष्यभावनिर्णायकंचतुर्था
धिकरणं ४ सर्वाभेदादन्यत्रेमे १ वसिष्ठत्वादयःप्रोक्तायेप्राणोपासनेगुणाः।तइमेऽनुक्तगुणकप्राणोपास्तौचसम्मताः
४ प्राणसंवादगत्वस्यसर्वशाखास्वभेदतः।मुख्यप्राणोपास्तिरत्रप्राणसंवादगास्तिहि ५ इत्येकसूत्रंसर्वत्रमुख्यप्रा
णोपास्त्यैक्यसाधकंपंचमाधिकरणं ५ आनंदादयःप्रधानस्य १ विज्ञेयत्वेनमुख्यस्यनिर्गुणब्रह्मणोगुणाः।स्व
रूपभूताआनंदमुखाःश्रुतिभिरीरिताः ६ क्वचित्क्वचित्कतिपयाःश्रूयंतेतत्रतत्रहि।क्वचित्सद्रूपमुक्तंहिक्वचिच्चिन्मात्ररूप
कं।क्वचिन्निर्भेदमुक्तंहिक्वचिदानंदमात्रकं ७ विज्ञेयनिर्गुणब्रह्मविद्यासुनिखिलास्वपि।आकर्षणीयाःसर्वतेसर्वविधैक्यतोगुणाः ८ ८

तदसमा।तथाश्रुत्यासदन्यस्यनिषेधादेकमेवसत् ५४ अनेनसर्वगतत्वमायामधशब्दादिभ्यः ७ वस्त्वंतरनिषेधेनानेनपूर्वोक्तयादिशा।
व्यापकत्वंवदंतीभ्यःश्रुतिभ्यःस्मृतितःसति ५५ सिद्धंसर्वगतत्वंतन्माययेतिहिसिध्यति।आयामशब्दःसूत्रस्थोव्यापकत्वस्यबोधकः।श
ब्दशब्दःश्रुतिपरआदिशब्दात्स्मृतेर्ग्रहः ५६ इतिसप्तसूत्रंब्रह्मातिरिक्तवस्त्वंतराशंकानिवर्तकंसेतून्मानसंबंधभेदव्यपदेशाधिकर
णंसप्तमं ७ फलमतउपपत्तेः १ तत्तत्कर्मापेक्षितेशादस्मात्तत्क्रियाफलं।नित्यसर्वनिर्मलत्वस्वरूपादिहसाधकात् ५७ क्षणस्था
स्नुक्रियातोनकालांतरफलोद्भवः ५८ श्रुतत्वाच्च २ अन्नादोवसुदानइत्यात्मेतीश्वरएवहि।श्रुतत्वात्फलदोलोकःकर्मफलप्रदः ५९ धर्मंजै
मिनिरतएव ३ याभ्यांश्रुत्युपपत्तिभ्यांसिद्धांतीशांफलप्रदं।वक्तिताभ्यामेवधर्मंफलदंप्राहजैमिनिः ६० पूर्वंतुबादरायणोहेतुव्यप
देशात् ४ यःपूर्वमुक्तःफलदईशःश्रुत्युपपत्तितः।बादरायणआचार्यस्तमेवाहफलप्रदं ६१ श्रुत्यास्मृत्याचेश्वरस्यधर्मेऽधर्मेचतत्फले।
हेतुत्वपदेशात्सईशएवफलप्रदः ६५ इतिचतुःसूत्रमीश्वरस्यसर्वकर्मफलदातृत्वाधिकरणमष्टमं ८ इतितृतीयसाधनाध्यायेअ
ष्टाधिकरणात्मकएकचत्वारिंशत्सूत्रस्तत्वंपदार्थशोधनानामद्वितीयःपादः श्रुद्धितसदवाच्यार्थसगुणोपासनाधिपः।एकाग्र्य
मपिसंपाद्यमहावाक्यार्थधीहिता ६६ अतोगुणोपसंहारनिर्णायकउपासने।तृतीयाध्यायगःपादस्तृतीयःप्रोच्यतेधुना ६७ सर्ववेदां
तप्रत्ययंचोदनाद्यविशेषात् १ विधीयमानंवेदांतैःसर्वैरेकसमाख्यया।उपासनंचोदनादेःसर्वत्रैक्यान्नभिद्यते ६८ चोदनाफलसंयोग

दानस्या

१ इंद्रियेभ्यः परा ह्यर्था इत्युपक्रमवद्विषयत्। सा परा गतिरित्यंतमंतर्वाक्यैः समन्वितं २२ ध्यानसाध्यापरोक्षात्मसाक्षात्कारस्य सिद्धये। अ
र्थादिभ्यः परत्वेन पुरुषः प्रतिपाद्यते २३ इत्येकमेव वाक्यं तत्परमात्मपरं मतं। अप्रयोजनत्वनात्रस्वतंत्रानेकवाक्यता २४ आत्मशब्दाच्च २
अर्थादिभ्यः परत्वेन पुरुषे प्रतिपादिते। श्रुतत्वाच्चात्मशब्दस्य वाक्यं तत्परमेव तत् २५ इति द्वितीयसूत्रमिंद्रियेभ्यः परा ह्यर्था इत्यादिश्रुतेरर्थादि
व्युत्क्रांतपरानेकवाक्यकत्वनिराकरणपूर्वकमात्मपरैकवाक्यकत्वसाधकमाध्यायनाधिकरणं सप्तमं ७ आत्मगृहीतिरितरवदु
त्तरात् १ आत्मा वा इदमेक एवाग्र आसीदिति श्रुतौ। आत्मशब्देन परमात्मग्रहो न प्रजापतेः इतरस्मिन्सृष्टिवाक्ये विद्यमानात्म
शब्दवत् २६ किंच। ईक्षापूर्वकसर्गाद्युवाक्यसंदर्भतोऽग्रिमात्। आत्मशब्देन परमात्मग्रहो न प्रजापतेः। ईक्षापूर्वात्मसृष्टेरितरोक्तीतरश्रुति
षु श्रुता २७ अन्वयादिति चेत्स्यादवधारणात् २ प्रजापतेरेव लोकेसृष्टौ योग्यान्वयादिह। खादिसृष्टेरनुक्तत्वाद्ग्राह्यो ह्यत्र प्रजापतिः
२८ इति चेन्नैक एवाग्र आसीदित्यवधारणात्। सृष्टेः पूर्वं सर्वभिदशून्यस्य ब्रह्मणो ग्रहः २९ वर्णकांतरं। आत्मगृहीतिरितरवदुत्तरात् १
सदेव सोम्येदमग्र आसीदित्यत्र सत्पदात्। सत्तासामान्यमिष्टं न किंतु ब्रह्मात्मनो ग्रहः सआत्मा तत्त्वमसीति ह्यात्मत्वेनोपसंहृतेः ३१
शाखायामितरस्यां हि स वा एष महानजः। आत्मेत्यात्मपदेनेव परमात्मपरिग्रहः ३० अन्वयादिति चेत्स्यादवधारणात् २ सत्ताख्यपर
सामान्ये लौकिके भेददर्शनात्। एकमेवेत्यादिना दो निर्भेदत्वावधारणात् ३२ उपक्रमबलादेव निर्भेदपरमात्मनः। स्यात्सत्पदेन ग्रहणमिति चेद्दु १

त्तरं शृणु ३३ सूत्र बहिर्भूतेनाध्याहृतवाक्येन समाधानमाह। निर्भेदजडसत्ताया श्चिद्रूपब्रह्मणो ग्रहे। संशये तत्त्वमस्यादिवाक्यशेषाद्धि निर्ण
यः ३४ अलौकिकीभेदशून्याजडासत्ताश्रुतेर्बलात्। स्वीक्रियेति तु शंका या व्याहृत्यर्थे समाहितिः ३५ निर्गुणब्रह्मविद्यायाउक्त्या व्याख्याद
येपि हि। स्यादेक्यादुपसंहारो गुणानां तु परस्परं ३६ इति द्वितीयसूत्रं आत्मा वा इदमेक एवाग्र आसीदित्येतरेय ब्रह्मविद्याया एतस्मादात्मन आ
काशः संभूत इति तैत्तिरीयब्रह्मविद्याया ऐक्येनान्योन्यमानंदादिस्वरूपभूतगुणोपसंहारफलसाधकं। तथा सदेव सोम्येदमग्र आसी
दिति छांदोग्यब्रह्मविद्यायाः स वा एष महानज आत्मेति बृहदारण्यकब्रह्मविद्याया ऐक्यादन्योन्यगुणोपसंहारफलसाधकमात्मगृही
त्यधिकरणमष्टमं ८ कार्याख्यानादपूर्वं १ सूत्रार्थस्तु। स्मृत्या विधेयाचमनानुवादात्रात्र तद्विधिः। किंतु। प्राणोपास्तिं कुर्वतस्तु काण्व
छंदोग्यशाखयोः। स्मृतेराचमनं प्राप्तं पावित्र्यार्थमनूद्यते ३७ भुक्तेः पूर्वं च परत आचांतमुदकं तु यत्। वासो बुद्धित्वरेत्ता वाससाऽऽ
च्छादितस्तु सुः ३८ अनग्नता ध्यानमेव मप्राप्तं हि विधीयते ३९ इत्येकसूत्रं प्राणोपासकोपस्य हि भोजनकाले पूर्वोत्तरापोशानोदके परि
धानवस्त्रध्यानविधिसाधकं नवममधिकरणं ९ समान एवं चाभेदात् १ भिन्नशाखास्थयोरैक्यं विद्ययोर्वैद्ययात्तथा। समाने प्ये
कशाखायां हि तिविद्येकसंज्ञयोः ४० विद्ययोरेकता ज्ञेयोपास्यधर्माविभेदतः। शांडिल्यविद्याद्धि प्रोक्ताप्येका वाजसनेयिनः ४१ इत्ये
कसूत्रं समानशाखास्थसमानधर्मविद्ययो भिन्नशाखास्थसमानधर्मविद्यैक्यातिदेशाधिकरणं दशमं १० संबंधादेवमन्यत्रापि १ ।

१० एकविद्यात्वसंबंधाद्यथाधर्मोपसंहृतिः। एवमन्यत्रापि सत्यविद्यायामिति शंक्यते ४२ न वा विशेषात् २ बृहदारण्यके विद्या सत्याख्यो
क्तैकैव हि। ऐक्येपि सत्यविद्यायां नाम्नोरुपसंहृतिः ४३ आदित्यपुरुषस्यैवाहः संज्ञा नेतरस्य तु। दक्षिणाक्षिस्थपुरुषस्यैवाहमिति
नाम तु ४४ विशेषात्स्थानतोन्योन्यं नाम्नोर्नैवोपसंहृतिः। सत्यब्रह्मण ऐक्येपि स्थानभेदाद्व्यवस्थितिः ४५ दर्शयति च २ छांदोग्यप्रथमा
ध्याय उद्गीथोपासने रिता। आदित्ये पुरुषस्तत्र वर्णितो वै हिरण्मयः ४६ तत्रैवाक्ष्ण्यपि पुरुषो ध्येयत्वेन निरूपितः। आदित्यपुरुषस्थानां ध
र्मिणामक्षिपूरुषे ४७ अतिदेशः कृतः सोपि प्रकृतेनुपसंहृतिं। दर्शयत्यन्यथा नत्वतिदेशो वृथा भवेत् ४८ स्थानभेदेपि धर्माणां मिष्टा
चेदुपसंहृतिः। आदित्यपुरुषस्थास्ते मानुवंत्यक्षिपूरुषं ४९ इति त्रिसूत्रं सत्यविद्यायामक्ष्यादित्यपुरुषनाम्नोरन्योन्यमुपसंहारसाध नु
काधिकरणमेकादशं ११ संभृतिद्युव्याप्त्यपि चातः १ राणायनीयशाखायाः खिलब्राह्मण ईरितौ। द्युव्याप्तिसंभृती धर्मौ तत्रोक्तोपा
सने पुनो ५० अत एव स्थानभेदाद्देवा ऽ हार्द्येन वै मिथः। हृद्दिवादिस्थानभेदाद्ब्रह्मविद्याः पृथक्स्थिताः ५१ इत्येकसूत्रं राणायनीयशाखा
स्थशांडिल्यादिविद्यापेक्षया संभृत्यादिगुणविशिष्टविद्याया ब्रह्मोपासनांतरत्वसाधकं सत्यविद्यातिदेशाधिकरणं द्वादशं १२ पुरुषवि
द्यायामिव चेतरेषामनाम्नानात् १ तांडिशाखास्थपुरुषविद्यायां कथितो यथा। उपास्यस्तद्वदन्येषां तु विद्यायामनीरणात् ५२ उपास्यस्य स्व
रूपस्य गुणानां च विभेदतः। तांडितित्तिरिशाखोक्ते पुंविद्ये ते पृथक्स्मृते ५३ इत्येकसूत्रं तस्यैवं विदुषो यज्ञस्यात्मेति तैत्तिरीयकपुरुषविद्यायास्तांडि १०

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे २ उपासनार्थं शबलब्रह्मण्यारोपिता हि ये। यत्र प्रियशिरस्त्वादिधर्मास्तत्रैव ते हिताः ९
तेषां निर्गुणविद्यायां ब्रह्मण्यनुपसंहृतिः। निर्विशेषं स्वरूपेण नोपदेष्टुं हि शक्यते १० उपाध्युपहितं तत्तदुपाधेरविवक्षया। निर्गुणब्र
ह्मविद्यासु विज्ञेयं कथ्यते यतः। अतोऽस्वरूपभूतास्ते नाऽऽकृष्या निर्गुणात्मनि ११ वृद्धिह्रासान्वितो धर्मो धर्मिणो भेद एव हि। स्वरूपभू
तो भवतो न निर्भेदपरात्मनः १२ परस्परापेक्षया तूपचितापचितात्मकाः। प्रियमोदादयो धर्मा नैकधर्मिस्वरूपकाः १३ अनपेक्ष्य गुणं
भिन्नं स्वरूपेणैव भिन्नयोः। धर्मिणोरसमुच्चित्यौ पचितापचितौ गुणौ १४ स्वरूपभूतौ भवतो यथावय्योर्द्वयप्रभे। नैवद्वयप्रभैकस्य विदे
कस्यैव स्वरूपकं १५ युगपद्भवतो ब्रह्मण्येकरूपं स्वरूपतः। अतोऽस्वरूपभूतास्ते नानेया निर्गुणात्मनि १६ स्वरूपभूतधर्माणां नैव विज्ञा
नमंतरा। वस्तुतत्त्वो भवेद्बोधस्तत्तस्तदुपसंहृतिः १७ ब्रह्मधर्मत्वाविशेषात्प्रियमोदादयो गुणाः। आनंदादिवदाकृष्या इत्याक्षेपो निराकृतं
१८ आलंब्य कृत्वा चिंताख्यन्यायमेतदुदीरितं। स्वीकृत्य पूर्वपक्षीष्टं तन्मूलोयः प्रवर्तितः। सिद्धांतिना विचारः स कृत्वा चिंताख्य उच्यते १९
इतरे त्वर्थसामान्यात् ३ स्वरूपभूता इतरे ये तूपास्तिगधर्मतः। आकर्षणीयाः सगुणे निर्गुणेपि हि ते गुणाः २० सर्वत्र प्रतिपाद्यार्थब्रह्मणः
समभावतः। कैवल्यफलिका एव सगुणोपासना अपि। क्रममुक्तौ च कैवल्यमस्त्येव विधिना सह २१ इति त्रिसूत्रं सगुणनिर्गुणब्रह्मवि
द्यासु परस्परानुकर्षस्वरूपभूतानंदादिगुणोपसंहृतिसाधकं षष्ठमानंदाधिकरणं ६ आध्यानाय प्रयोजनाभावात् १

११ वे स्यक्तस्यकाम्यवस्थानसापेक्षत्वं यत स्ततः। पुण्यपापोपायनाभिधाविशेषस्य कुत्रचित्। श्रूयमाणस्येह हानिशब्दे नापेक्षितत्वतः ७० इति।
उपायनार्थवादस्येहाश्रितत्वात्परैः कथं। अन्यदीयपुण्यपापे गृह्येत इति माऽऽक्षिप ७१ अत्रोपायनशब्दस्य हानिशब्देन शेषता। कथ्यते स्तू
यमानस्तुतेरेवोपसंहृतिं ७२ अन्यथोपायनार्थानुवृत्तिं ब्रूयाद्धि सूत्रकृत्। शब्दानुवृत्तिकथनात्स्तुतेरेवोपसंहृतिः ७३ शाखांतरे श्रूय सापेक्षत्वं शेषतान्त्र २
माणो विशेषो ह्यपेक्षितः। शाखांतरे पिनेतव्य इत्यत्राह स्तुदाहृतीः। कुशाछंदः स्तुत्युपगानवदित्यब्धिसंमिताः ७४ भिन्नशाखागतश्रुत्यो किं २। ४
रेकवाक्यत्वमत्र यत्। उक्तं तदुक्तमात्मीयग्रंथे जैमिनिनापि हि ७५ अत्रैव वर्णकांतरं। यो विधूननशब्दोऽत्र हानार्थे वर्तते। अस्योपायनश
ब्दोपकंठे वेदश्रुतत्वतः ७६ धूञ्शब्दार्थो नात्र कंपः किंतु त्यागो विनात्वतं। पुण्यपापोपायनं न च्छुतं न घटते हि तत् ७७ औदुंबरत्वादिकुशादी
नां निर्णायकं यथा। तथेह शाखांतरगं धूञोऽर्थस्य त्युपायनं ७८ इत्येकसूत्रं जीवन्मुक्तस्य पुण्यपापहानिकथनस्य सकृद्योस्त्वयोर्ज्ञानिन्निया
न्निश्चियायोज्ञातिकथनस्य च ब्रह्मविद्यास्तावकत्वसाधकं पुण्यपापविधूननशब्दस्य सुकृतदुष्कृतत्यागार्थकत्वसाधकं हान्युपायनाधिकरणं पंचद तु
शं १५ सांपराये तर्तव्याभावात्तथा ह्यन्ये १ जीवे सेवात्मविज्ञानात्स्याद्धानिः पुण्यपापयोः। सानार्हा विरजाख्यायानद्यास्तरणतः परं ७९
परलोके न रीती त्वपुण्येन दुरितेन वा। संपादनीयस्य फलस्याभावाद्ब्रह्मजानता। नापगोनारपर्यंतं संस्थितिः पुण्यपापयोः ८० अर्थक्रमान्य
थानुपपत्त्या प्रागेव धूननं। यत्त सत्त्वाधिपठितं स्तुत्यैकौषीतकिश्रुतौ। पाठक्रमाद्धि बलवानर्थक्रम इति स्थितिः ८१ परलोको मृते रूर्ध्वसांप ११
विरजां नदीमन सैवात्येनितत्सुकृतदुष्कृते विधुनुते इत्यादि। पर्यंकविद्यास्था कौषीतकिश्रुतावित्यर्थः। ८१।

रायइतीर्यते ८२ कर्महानिर्ज्ञानकाल एवोहोक्ता यथा तथा। पठंति शाट्यायनिनः स्वशाखायां च तांडिनः ८३ छंदत उभयाविरोधात् ३
यद्देहाद्धि निर्गत्य देवयानेन वै पथा। प्रस्थितस्यापगो नारोर्ध्वं हान्युपगमः पथि ८३ तर्हि विद्यार्थ्यास्त्वरूपपुंस्य तस्य निजेच्छया। अनुष्ठेतु ना
पपत्ते नूला विद्यातदानहि ८४ तास्मृते हान्युपगमे विद्याहान्योऽस्तु न श्रुतौ। योहेतुफलभावः स विनाहेतुं फलोदयात्। विरुध्यते किंच हेतोप
गीस्तेन विलंबनं ८५ कार्यस्येति न्यायगर्भं तांडिशाट्यायनश्रुती। विरुध्येते विलंबेन यद्धि विद्याफलं मतं ८६ सूत्रार्थस्तु। अतो जीवत्येव वि
द्याकालाऽव्यवहितः क्षयः। भवत्यभावात्पक्षेस्मिन्नुक्तोभयविरोधयोः ८७ इति द्विसूत्रं ब्रह्मविद्यायाः संचितसुकृतदुष्कृतक्षयरूपफलस्यका
लाव्यवधानेन कार्यकारणभावसाधकं सांपरायाधिकरणं षोडशं १६ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः १ अर्चिरादेर्देवयानमा
र्गस्य हि विभागतः। साफल्यमविभागे तु विरोधोनुक्तमश्रुतेः ८८ अतः सगुणविद्यायामध्वासावर्चिरादिकः। निर्गुणब्रह्मविद्यायाना
ध्वासो गत्यसंभवात् ८९ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् २ अतः सगुणविद्यायामस्त्यध्वा निर्गुणे न सः। इति तूभयथाभावो
योग्यो मार्गस्य लोकवत्। गतिकारणकार्थस्य श्रुतत्वात्सगुणश्रुतौ। ९० दूरस्थितो यथा ध्यानं काशीं गंतुमुपेक्षते। न काशीस्थ
स्तथा ब्रह्मीभूतो नापेक्षते गतिं ९१ इति द्विसूत्रं देवयानमार्गस्य सगुणनिर्गुणब्रह्मविद्याभेदेनोपयोगानुपयोगसाधकं गत्य
र्थवत्ताधिकरणं सप्तदशं १७ अनियमः सर्वासामविरोधः शब्दानुमानाभ्यां १ आत्मविद्यासु सगुणास्वप्यध्वा श्रूयते क्वचित्।

१२ क्वचित्तासांसर्वासांमार्गस्यानुपसंहृतेः।अभावोत्रस्यनियमशब्दार्थोऽनुपसंहृतिः २२ क्वचिच्छ्रुतस्यमार्गस्यसर्वत्रह्युपसंहृतिः।
सगुणाखाब्रह्मविद्यासुकर्तव्येत्याशयोमुनेः २३ अन्यप्रकरणस्थस्यमार्गस्यान्योपसंहृतौ।प्राप्तोत्यन्यप्रकरणविरोधइतिचेच्छृणु २४
मार्गप्रकरणस्थेनवाक्येनास्माद्बलीयसा।श्रुत्यास्मृत्योपसंहारकथनान्नविरुद्धता २५ इत्येकसप्तकंक्वचित्सगुणब्र ह्मविद्यायांश्रुतस्या
प्यर्चिरादिमार्गस्यश्रुतिस्मृतिप्रोक्तमार्गप्रकरणस्थेनवप्रकरणाद्बलीयसावाक्येन सर्वत्रसगुणब्रह्मविद्यासूपसंहारसाधकमनि
यमाधिकरणमष्टादशं १८ यावदधिकारमवस्थितिराधिकारिकाणां १ महतांनिर्गुणब्रह्मसाक्षात्कारवतांपुनः।नजन्मकिं
तर्हियावदधिकारमवस्थितिः २६ नसाविद्यामुक्तिहेतुरैश्वर्यायार्चिरादिकः।पंथाअप्युपसंहार्यइतिशंकानयुज्यते २७ स्वातंत्र्येणै
वतेसर्वेगृहादिवगृहांतरं।देहांतरंसंचरंतोत्यलुप्ताःस्मृतयःसदा २८ प्रारब्धफलदानायप्रवृत्तंसकृदेवहि।कर्माशयंवाहयंतः
स्वाधिकारसमाप्तये २९ निर्मायदेहान्युगपदधिष्ठति वाक्रमात्।स्वाधिकारसमाप्त्यर्थंप्रारब्धस्यपरिक्षये ३० प्रारब्धदेहपति
तेनिर्गुणंयांतितत्पदं।नतेषांक्रमभुक्त्यर्थोमार्गस्तिब्रह्मसंभवात् १ तथाहिब्रह्माभिज्ञावर्तमानेदेहेनैवहयेश्रुताः।सनत्कुमारप्रमुखा
अपांतरतमाइति २ स्कंदव्यासादिरूपेणशरीरांतरधारिणः।तुल्यकालानेकदेहभोग्यारब्धोपभोगिनः। ३ त्यक्त्वापिवानिजंदेहंतत्स
ती –र्जीयधारिणः।पूर्वकल्पाराधितेशाल्लैर्भिरधिकृतिपरं ४ संप्रारब्धाधिकाःस्यंतेदेहस्मिन्पतितेसति।निर्गुणंब्रह्मतेयांतितत्पानाध्या १२

८ तत्सुकृतदुष्कृतेविधुनुते।तस्यप्रियाज्ञातयःसुकृतमुपयंति।अप्रियादुष्कृतं।इतिकौषीतकिनःपठंति।अश्वइवरोमाणिविधूयपापंचंद्रइवराहोर्मुखात्प्रमु
८ च्यधूत्वाशरीरमकृतंकृतात्माब्रह्मलोकमभिसंभवामि।इतिसामगानांतांड्निरहस्यब्राह्मणे।यदापश्यःपश्यतेरुक्मवर्णंकर्तारमीशंपुरुषंब्रह्मयोनिं।तदाविद्वा
शारवागतपुरुषविद्यायाअन्योन्यभेदसाधकंपुरुषविद्याधिकरणंत्रयोदशं १३ वेधाद्यर्थभेदात् १ सर्वंप्रविध्येत्याद्यैर्मंत्रैरर्थाःप्रका
शिताः।शत्रोर्हृदयवेधाद्याअभिचारोपयोगिनः ५४ तथाप्रवर्ग्यादिकर्मरूपाउपनिषद्गताः।तेषामसमवेतत्वादेतद्विद्यांगतेहन ५५
किंत्वश्रुतिलिंगादिरूपेणप्रमाणेनबलीयसा।तत्तत्कर्मांगतातेषांसन्निधिर्दुर्बलस्ततः ५६ फलंत्वप्युपनिषत्पाठेतदध्ययनधर्मिता ५७
इत्येकसप्तकंतत्तत्कर्मस्वुपयुक्तानामुपनिषत्पठितानामपिकर्मविशेषाणांमंत्रविशेषाणांचब्रह्मविद्यानंगत्वसाधकंवेधाधिकरणंचतुर्दशं
१४ हानौतूपायनशब्दशेषत्वात्कुशाच्छंदस्तुत्युपगानवत्तदुक्तं १ गुणानामुपसंहारविचारस्यप्रसंगतः।स्तुतेरप्युपसंहारप्रकारोने
नदर्श्यते ५८ महाभागाब्रह्मविद्यायत्सामर्थ्येनतद्गताः।विधूयतेपुण्यपापेनिविशेतेप्रियेऽप्रिये ५९ इतिस्तौतिब्रह्मविद्यांरुच्येकौषी
तकिश्रुतिः।तांड्यमुंडकशाखेतुहानिमात्रेणतांस्तुतः ६० धनंगृह्णंतिविदुषःपुत्राःपुण्यंसुहृज्जनाः।पातकंद्वेषिणइतिस्तौतिशाट्याय
निश्रुतिः ६१ पुण्यपापपरित्यागोहानिःसेवविधूननं।उपायनपदार्थोन्यैर्ग्रहणंपुण्यपापयोः ६२ संशयोनैवतत्रास्तियत्रहानिरु
पायनं।यत्रोपायनमात्रंतुश्रुतंतस्मिन्नुपायने ६३ अन्यथानुपपत्त्यैवहानिप्राप्तिर्नसंशयः।त्यागंविनापुण्यपापोपायनासंभवादि
ति ६४ हानिमात्रश्रुतंयत्रतत्रत्वपायनस्तुतिः।उपसंहरणीयावानेतिसंशयआगते ६५ उपसंहरणीयासाविद्यास्तुत्युत्कर्षसिद्धये।इत्या
हभगवान्हानौत्वितिसूत्रेणसूत्रकृत् ६६ सूत्रार्थस्तु।हानौतुच्छ्रूयमाणायांकेवलायामुपायनं।उपसंहरणीयंयत्तद्विद्वान्यंतिकेश्रुतं ६७

न्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैति।इतिसु
अ।तस्यपुत्रादायमुपयंतिसुहृदःसाधुकृत्यां
द्विषंतःपापकृत्यांइतिशाट्यायनिनः॥

१४ व्यतिहारउपास्योत्रनेशोनैकत्वमात्रकं ४२ यथेतरेगुणाःसर्वात्मकत्वाद्याउपासने।विधीयंतेन्यत्रतथाव्यतिहारोविधीयते ४३ जीवेशयो
र्मिथोन्योन्यात्मकतात्रोपदिश्यते।व्यर्थोत्रान्यतरात्मत्वध्यानेस्याद्व्यतिहारकः ४४ व्यतिहारोमिथोभावोविशेषणविशेष्ययोः।अतोन्योन्या
त्मकत्वेनद्वयोश्चिंतेशजीवयोः ४५ अतएवस्वस्वभेदेजाबालऐतरेयिणः।निशिषन्तिहिजीवेशौव्यतिहारेणचिंतने ४६ तेनजीवेशैक्यदार्ढ्य
मप्यर्थादेवसिध्यति ४७ यत्रास्त्यहंयहोपास्तिरुभयान्यंतरात्मना।तत्राप्यहंयहोपास्तौवन्योन्यात्मकतात्मनः ४८ व्यतिहारस्यानुवृत्तिः
कार्येतिज्ञापनायवै।अत्राधिकरणेप्रोक्ताव्यतिहारेद्युपास्यता ४९ इत्येकस्तंत्रसर्वत्राहंयहोपासनेन्योन्यात्मकत्वरूपव्यतिहारोपसं
हारसाधकंव्यतिहाराधिकरणंत्रयोविंशं २३ सैवहिसत्यादयः १ बृहदारण्यकेध्यायेपंचमेहृदयाभिधं।प्रजापतिमुपक्रम्योपा
स्तिःसत्यतयास्यवै ५० तृतीयेचचतुर्थेचपंचमेब्राह्मणेपिच।समीरितास्तिसाविद्यासत्यविद्येतिकथ्यते ५१ हिरण्यगर्भेयंःपूर्वसत्यब्र
ह्मतयेरितः।अथेप्युपास्यैतस्यैवरविमंडलगात्मना ५२ दक्षिणाक्षिस्थपुरुषाद्भेदाप्यनुकर्षणात्।पूर्वोक्तासत्यविद्यायासैवेयंमंडलाक्षि
गे ५३ विद्यैक्यतोमिथःपूर्वापरवाक्यगतागुणाः।सत्यब्रह्मत्वाद्योयआहार्यास्तेफलानिच ५४ इत्येकस्तंत्रसत्यविद्यायारविमंडलद
क्षिणाक्षिस्थपुरुषभेदेनालंबनभेदेनभेदेपिसर्वत्रसत्यब्रह्मत्वादिविशिष्टहृदयाख्यहिरण्यगर्भस्यध्येयस्यैक्यत्वेतुनासत्यविद्यैक्यसाध
कंचतुर्विंशंसत्यविद्याधिकरणं २४ कामादीतरत्रतत्रचायतनादिभ्यः १ छांदोग्यस्याष्टमाध्यायेदहरोपासनेरिता।उपास्योदहरा १४

च्चिरादिकः ५ तस्माद्ब्रह्मविदांमुक्तिर्नियतानैवपाक्षिकी।नचानिर्गुणविज्ञानमहेतुरितियुज्यते ६ निर्वासनात्मविज्ञानाद्विद्यानंदभरान्विताः
।अधिकारसमाप्तेःप्रागपिभोक्तृत्वयोगतः।प्रारब्धतोजनेराप्ताश्चपिशांचंतिनैवते ७ प्रारब्धकर्मान्योहेतुस्तेषांनास्तिजनिग्रहे।कर्मसं
चितमन्येषांहेतुर्जन्मांतरग्रहे ८ इत्येकस्तत्रमाधिकारिकनिर्गुणब्रह्मविदांश्रुतिपुराणादौजन्मांतरदर्शनेनसर्वत्रनिर्गुणब्रह्मविद्यान
सद्योमुक्तिहेतुःकिंतुश्रौतब्रह्मविद्यावैयर्थ्यपरिहारायतस्याआमुष्मिकसगुणैश्वर्यफलंकल्प्यंतत्तुनार्चिरादिमार्गमंतरासंभव
तीतिनिर्गुणात्मविद्यायामपिसगुणात्मविद्यावन्मार्गोपसंहारकर्तव्यइत्याशंकापरिहारसाधकमाधिकारिकाधिकरणमेकोन
विंशं १९ अक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तं १ निर्गुणब्रह्मणिद्वैतनिषेधकवचोधियां।अनुवृत्तिर्वि
धातव्याकिंचिद्धर्मनिषेधके ९ सर्वत्रब्रह्मणोद्वैतनिरासात्प्रतिपादने।साम्यंकिंचप्रतिपाद्यंचितएकत्वतःश्रुतौ।प्रत्यभिज्ञायमानत्व
नर मतोन्याय्योपसंहृतिः १० दृष्टांतमाह।जामदग्न्यचतूरात्रेष्वहीनयाज्ञपेकृतौ।पुरोडाशयुताउक्ताउपसन्नामकेष्टयः ११ तत्रोपसत्सु
रोडाशप्रदानेध्वर्युकर्तृके।मंत्राउद्गातृशाखायामाम्नाताअपियेतुते १२ अध्वर्युणाप्रयोक्तव्यानोद्गात्रेतिहिनिर्णयः।१२ यथाचाध्वर्युकर्तृ
दा व्यपुरोडाशप्रधानके।अंगभावंगतामंत्राःकुत्रचिद्विश्रुताअपि १३ अध्वर्युणैवसंबद्धाउच्चारकतयातथा।अक्षरप्रमितौशेषानिषेधाअ
क्षरान्विताः १४ यदुक्तमत्रप्राबल्यंविनियोगविधेस्ततः।दौर्बल्यमुत्पत्तिविधेस्तदुक्तंमुनिनापिवै।निजग्रंथेजैमिनिनागुणमुख्यतिस्ततः

३ विनियोगविधेःसार्थक्यसंपादकस्यस्वरूपमात्रबोधकोत्पत्तिविध्यपेक्षयामुख्यत्वादध्वर्युणैवोद्गातृशाखास्थामंत्राःप्रयोक्तव्यानो अपि
२ उद्गात्राध्वर्युकर्तृकेपुरोडाशप्रदानेतेषांमंत्राणांविनियोगादितिभावः।व्रीहिभिर्यजेतयवैर्यजेतासमिधोयजतितनूनपातंयजतीत्या
१ द्विरंगांगीभावबोधकोविधिर्विनियोगविधिः।१२।

नि२

१ गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इति जैमिनिसूत्रं। गुणमुख्ययोरुक्तान्निनियोगविध्योरुक्तौ उपांशुवादि वेदधर्मविषये विरोधे प्राप्ते
१ मुख्येन विनियोगविधिना विनियोजकवेदीयोपांशुत्वादिस्वरस्यैव ग्राह्यत्वमिति प्रधानं प्रतीति सूत्रार्थः। कुतः। तदर्थत्वात्
१ विध्यर्थकत्वात्। तेनाधानांगतया ... इति सामान्याधाने ... अनियोग

१५ तन्त्रानंदादयः प्रधानस्य सत्रनिरूपिताः स्वरूपभूतधर्माणां विद्विधास्पसंहृतिः। इहद्वैतनिषेधानां सर्वेषामुपसंहृतिः १६ इत्येक
१२ सत्वं श्रुतो तत्र तत्र ब्रह्मप्रमित्यर्थं प्रोक्तेषु कतिपयद्वैतनिषेधकवाक्येषु यद्वैतनिषेधकवचसमुपसंहारसाधकं द्वैतनिषेधाधिकरणं विंश व
तितमं २० इयदामननात् १ ऋतं पिबंतावित्येको द्वासुपर्णेति वै परः। भिन्नशाखास्थितौ मंत्रौ ध्याप्येतन्मंत्रकद्वये १७ द्विताधच्छिन्न
वेद्यस्यत्य भेदामननादिह। निर्गुणब्रह्मविद्यैकातोऽन्योन्यमुपसंहृतिः १८ छत्रिन्यायेनात्र गौणं मृतपानमनश्नति। अविस्मृतस्वप्रकाश
ईशात्मतय उच्यते १९ विस्मृतस्वप्रकाशत्वाज्जीवश्छायापदेरितः। परात्माभेदमापाद्य इहभोक्तृनुवादतः २० इत्येकसूत्रमृतं पिबंतौ
द्वासुपर्णेति मंत्रद्वयगतब्रह्मविद्यैक्यसाधकमेकाविंशमधिकरणं २१ अंतराभूतग्रामवत्स्वात्मनः १ बृहदारण्यके ध्यायेऽत्र ती येब्रा व
ह्मणद्वये। चतुर्थपंचमे ब्रह्मविद्यैक्यानैक्यसंशये २१ प्रश्नैक्ये नोत्तरैक्येन वेद्यैक्येऽप्यत्रानैकता। प्रश्नाद्यभ्यासतः इति मुख्याक्षेपे त्ववादि
नः २२ कार्यकारणभावादिश्रून्यस्यैकत्र कीर्तनात्। अशनायाद्यतीतस्य त्वन्यत्रात्मनईरणात् २३ धर्मभेदेन वेद्यस्य भेदाद्विद्याभिदा
त्र तु। इति चाऽगौणआक्षेपं तरेत्यादिकमुत्तरं २४ गौणाक्षेपद्वयं यति पूर्वसूत्रेण सूत्रकृत्। सर्वांतरत्वमनन्यत्वात्मनो ब्राह्मणद्वये। वेद्यस्या
य त्मन एकत्वं तेन विद्यैकता भयोः २५ वेद्यद्वयं कस्मिन् देहे न मुख्यानर्थसंभवेः। किंतु गौणांतरत्वं वै भूतग्रामजलादिवत् २६ पृथिव्यपेक्षया वा
रित्यंतरं तदपेक्षया। तेजस्ततो वायुरिति गौणांतर्यं जलादिषु २७ इयोः सर्वांतरत्वं नेत्यतो विद्यैकता भयोः। अत्रात्मांतरशब्दो हि स्वरूपस्य १२

तु वाचको २८ सर्वांतरत्वसार्वात्म्यशब्दौ पर्यायकौ ततः। आगमापायिरूपेषु यस्यानव्यभिचारिता। पदार्थस्य स्वरूपं तत्प्रोक्तं वह्नेर्यथोष्णता २९
स्वतो निरात्मके दृश्यमात्मना सात्मतां व्रजेत्। आत्मा सर्वस्वरूपत्वात् सर्वांतर इतीर्यते। ३० सर्पधारादिकल्पेषु रज्जोरंतरता यथा ३१
उक्तं च बृहदारण्यकवार्तिकसारे। सर्वांतरत्वं सार्वात्म्यमन्यस्मिन्सति न क्वचित्। न चेदन्यत्तदा सर्वशब्दार्थो नेति शंकते ३२ अतोऽन्यदार्तमि
त्याह दोषद्वयनिवृत्तये। आर्तं मायामयं तस्य न तज्ज्ञानेन पीडनात् ३३ सर्पादीनां पीडितानां रज्जुरात्मा यथा तथा। मायामयस्य सर्वस्य चि
द्रूपात्मेति सुस्थितं ३४ भूतग्रामवदित्यस्यार्थांतरं चाह भाष्यकृत्। सर्वांतरोऽन्यत्र भूतग्राम एकः श्रुतो स्थिति। तथा सर्वांतरत्वोक्तेरि
ह वेद्यैकता भयोः ३५ मुख्याक्षेपपरिहारस्त्वन्यथेत्यादिसूत्रतः ३६ अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशांतरवत् २ वेद्यस्यैक्ये पि वि
द्याभेदानंगीकृताविह। समानाम्नानभेदस्यानुपपत्तिः श्रुतिद्वये ३७ इति चेत्तन्महावाक्यानेकवारोपदेशवत्। उपक्रमादिकैरैक्ये
प्यभ्यासस्योपपन्नता ३८ आम्नानभेदशब्देन शब्दाभ्यासो विवक्षितः। चतुर्थे ब्राह्मणे पृष्टमुषस्तेन यदवदि। तदेव पंचमे इति कहोडे
नैव सूचितं ३९ एवं सत्येकविज्ञेयविशेषज्ञानलिप्सया। पुनः प्रश्नस्य करणादभ्यासस्यार्थता त्र न ४० निषध्य धर्मपार्थक्याद्विद्याभे
दो न तयोर्भयोः। मिथ्या सुरधियां त्वविरोधः कार्य इतीरणात् ४१ इति द्विसूत्रमुषस्तकहोडब्राह्मणद्वयस्य निर्गुणब्रह्मविद्यैक्यपरत्व
साधकमंतराम्नानाधिकरणं द्वाविंशमधिकरणं २२ व्यतिहारो विशिंषंति हीतरवत् १ परस्परानुवादेन त्वन्योन्यात्मकतात्मकः।

बालशाखोक्तादाद्याहुत्यादरादिह ७० कदाचिद्भुक्तिलोपेप्यलोपो वदनाहुतेः। अतः प्राणाग्निहोत्रं तत्कंदमूलफलादिना। भुक्तिलोपेपि
१५ कर्तव्यमितिवादी विशंकते ७१ यत्र प्राणाहुतेः प्राक्त्वं भंगं न सह तेश्रुतिः। सहेतत्साकथं प्राणाहुतिलोपमभोजने ७२ सिद्धांती सूत्रांतरेणास
माधत्ते। उपस्थितेऽतस्तद्वचनात् २ उपस्थिते भोजने स्माद्दृग्ज्यादन्नादुपस्थितात्। प्राणाग्निहोत्रं कर्तव्यं तल्लोपस्त्वनुपस्थिते ७३ यदुक्तमा
दौ प्राश्नीयात्तद्धोमीयमितिश्रुतेः। भुक्तिप्रयुक्तेन होमसाधनत्वमतीति तः ७४ इति द्विसूत्रं वैश्वानरविद्यायां भोजनप्रसक्तौ भोजनप्रयुक्तान्ने
नैव प्राणाग्निहोत्रकर्तव्यतान भोजनाप्रयुक्तेनान्नेनेत्यर्थसाधकं षड्विंशमधिकरणं २६ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबंधः फलं १
तासामंगाश्रितानां हि नियमो नास्त्यनुष्ठितौ। उपासनानामाम्नायेतदनैयत्यदर्शनात् ७५ सोपासनेंगे हि पृथक्वीर्यवत्तरतात्मकं। प्रतिबंधा
भावरूपं फलमप्युपलभ्यते ७६ नातोप्युपास्तानैयत्यं कर्मांगोद्गीथकादिषु। निरुपास्तंवीर्यवत्तत्सोपास्तं वीर्यवत्तरं। प्रधानांगाश्रितत्वेपि
न कर्मांगमुपासनं ७७ इत्येकसूत्रमंगाश्रितोपासनानां स्वातंत्र्येण फलदातृत्व कर्मानंगित्व कर्मानियतत्वसाधकं सप्तविंशमधिकरणं
२७ प्रदानवदेव तदुक्तं १ बृहदारण्यकगत प्रथमाध्याय पंचमे। ब्राह्मणे कथितोपास्तिर्वै राजपदलब्धये ७८ अग्न्यादिदेवताभ्योत्र वायुः
श्रेष्ठोवधारितः। वाक्चक्षुरादिकेभ्यस्तु प्राणः श्रेष्ठोवधारितः ७९ छांदोग्योपनिषच्चतुर्थाध्याये खंडे तृतीयके। वायुर्देवेषु संवर्गः प्राणः प्राणेष्विती
रितं ८० स्वरूपैक्यात्प्राणवाय्वोः स्वरूपावाप्तिलक्षणात्। फलैक्याच्च ध्यानरूप प्रयोगैक्यं भिदा न हि ८१ इत्याक्षेपस्य संप्राप्तौ ध्यानभेद इतीर्यते। १५

प्राणवाय्वोः स्वरूपस्य स्वरूपाप्तिफलस्य च। अभेदादत्र विद्यैक्यं गुणभेदात्प्रयोगभित् ८२ अधिदैवाध्यात्मरूपावस्थाख्यगुणभेदतः। ध्या
नरूपप्रयोगस्य भेदएं इत्प्रधानवत् ८३ तदिदं देवताकांडे उक्तं जैमिनिनात्रहि। नानावादेवताः पृथग्ज्ञानादितितु सूत्रतः ८४ स्वराजराजा
धिराजगुणत्रयविभेदतः। एकोप्यथैक इंद्रोपि देवतात्रितयात्मकः ८५ पुरोडाशैस्त्रितयवान्भिः प्रदानं क्रमेण हि। तद्वद्देवे हविर्द्वैक्ये ध्यानरूपप्रयो
गभित् ८६ अग्न्यादिभ्यः श्रेष्ठतया वायुश्चिंत्योधिदैवते। वागादिभ्यः श्रेष्ठतयाध्यात्मप्राणस्य चिंतनं ८७ इत्येकसूत्रं संवर्गविद्यास्थप्राण
वाय्वोः स्वरूपैक्यात्प्राणवायुस्वरूपाप्तिरूपफलैक्याद्विद्यैक्येपि आधिदैविकाध्यात्मिकस्वरूपावस्थारूपगुणभेदेन वेद्यभेदात्तद्ध्यानरूप
प्रयोगभेदमात्रस्यैंद्रपुरोडाशहविःप्रदानावृत्तवत्स्थायं प्रातःकालभेदेनाग्निहोत्रकर्मण एकस्य प्रयोगावृत्तिवत्साधकं प्रदानातिदेशाधि
करणमष्टाविंशं २८ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि १ आम्नातामानसिकाग्निविद्या वाजसनेयिनां। चयनेग्निरहस्याख्यब्राह्मणे
बहुविस्तरा ८८ मनश्चितो वाक्चितश्च तथा प्राणचिदादयः। अग्नयो बहवः प्रोक्तानशेषाश्चयनस्य ते ८९ किंतु स्वतंत्रविद्येयं लिंगभूय
स्त्वतोमता। तद्धि लिंगं प्रकरणाद्बलीयस्तदपि स्फुटं ९० कर्मकांडे जैमिनिना श्रुतिलिंगेतिसूत्रतः। बलीयस्त्वं प्रकरणाल्लिंगस्याम्नातमत्र
स्तिहि ९१ पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् २ क्रियामयोहीष्टकाभिरग्निश्चितुनदृश्यं। यः पूर्वमुक्तोस्य त्वाग्निस्तस्य प्र
करणादिमे ९२ ध्यातुर्ध्यानमयाश्चेतुमनश्चित्प्रमुखाग्नयः। तेषां योत्र प्रकरण उपदेशः कृतोस्तिसः ९३ पूर्वस्याग्नेर्विकल्पोपदेशः

स्यादितिशंकते। नतुस्वतंत्रविधेयंपुरुषार्थांतरपदा २४ तस्मान्मानसिका अंगं चयनाख्यस्यकर्मणः। द्वादशाहस्थदशमस्याह्नोंगमिव
१६ मानसं ९९ द्वादशाहक्रतावुत्क्रमक्तिमान सकर्मंहि २५ अर्थवादिकलिंगनज्यायः प्रकरणाद्भवेत्। विधिस्तुसोप्यस्ता र्थत्वान्नस्वार्थ
परत्वास्यहि २६ अतिदेशाच्च ३ यावानस्याविष्टकाग्निस्तावानेकैकएवहि। मानसाग्निरितिश्रुत्यातत्साम्यकथनादपि २७ मानसाग्नेः
शेषतास्याच्चयनाख्यस्यकर्मणः। एककर्मानुप्रवेशरूपंसाम्यंविवक्षितं २८ विधेयवस्तुनिर्द्धारणात् ४ स्वतंत्रविद्यारूपास्तएतेमानसिका
ग्नयः। नेहैतेविद्याचितएवेतिश्रुत्यावधारणात् २९ बाधतेत्रप्रकरणमेवकारात्मिकाश्रुतिः। तेनकर्मानुप्रवेशोबाध्यः प्रकरणागतः ४००
दर्शनाच्च ५ स्वातंत्र्यज्ञापकस्यात्रलिंगस्यापिप्रदर्शनात्। कर्मांगतावाध्यतेहिकर्मप्रकरणागता १ श्रुत्यादिबलीयस्त्वाच्चनबाधः ६
श्रुतिज्ञापकवाक्यानांश्रैघ्यात्सकरणेनवै। नबाधोमानसाग्नीनांस्वातंत्र्यस्यलघीयसा २ लिंगबोधकवाक्यानांविधिसंनिध्यभावतः। विधा
यकत्वमर्थस्यापूर्वस्यापिप्रदर्शनात् ३ तेनलिंगंनार्थवादोज्यायः प्रकरणादिह ४ वाक्यंचात्रास्तिवह्नीनांपुसंबंधावबोधकं। तेनस्वतंत्रवि
धेयंश्रुत्यादित्रिकतोभवेत् ५ अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्चतदुक्तं ७ विहितः करणजमनआदिषुवृत्तिषु। आधानस्तोत्रशस्त्रा
दिप्रधानगुणकर्मणां ६ संपादनप्रकथनान्मनोग्नीनांस्वतंत्रता। आरब्धकर्मशेषाः स्युर्यदिमानसिकाग्नयः ७ स्तोत्रशस्त्राद्यंगजातेसिद्धे
प्रत्यक्षतः पुनः। संपादनोक्तिर्मनसाश्रुत्युक्तास्यहृथाभवेत् ८ श्रुतिज्ञापकवाक्यातिदेशाआदिपदेरिताः। अतिदेशोग्नितसाम्यंसिद्धांतेत्रविवक्षितं १६

काशोत्रोक्तोदहरसद्मवेश्मगः ५५ जिज्ञासोर्यच्छरीरंतत्पुरंतस्येहकीर्तितं। हृत्पद्मच्छिद्रसौक्ष्म्येणदहरंतद्गतंहृहत्। ब्रह्मेहाकाशशब्दार्थःसू
क्ष्मोदहरउच्यते ५६ बृहदारण्यकगतपंचमोध्यायतुर्यके। ब्राह्मणेविंशतितमखंडियांसवाइति ५७ यएषोंतरहृदयआकाशस्तत्रवेम
हान्। आत्मासर्वेश्वरः शेतेएषसेतुर्विधारणे ५८ इत्यादिनिर्गुणाज्ञेयब्रह्मविद्यापराश्रुतिः ५९ सत्यकामतादिकंहिदहरोपासनेरितं। आ
हर्तव्यंसवाएषइतिवाजसनेयके ६० मच्चसर्ववशित्वादिप्रोक्तंवाजसनेयके। तदानेयंहिदहरोपासनायांस्ववायवे ६१ नोभयत्रोपासनार्थं
गुणानामुपसंहृतिः। किंतूभयत्रविद्यायाःस्तुत्यर्थमुपसंहृतिः ६२ उभयत्राप्यिहदयायनत्वादि चसाम्यतः। प्रत्यभिज्ञायमानत्वाद्विद्ययोर
विघयोः ६३ इत्येकत्वेतत्सत्पातत्वान्निर्गुणोपासादिप्रयुक्तविद्याभेदेपिविद्याकर्षपर्यवसाप्यन्योन्यविद्यानिष्ठाभिन्नगुणासाद्दृश्यज्ञा
नप्रत्यभिज्ञायमानविद्या सुभ्रन्योन्यात्तुक्तगुणानामपिस्तुत्यर्थस्योपसंहारस्साधकंपंचविंशमधिकरणं २५ आदरादलोपः १
छांदोग्यपंचमाध्यायेकादशंखंडमादिवै। ब्रह्मोक्तास्तुयाब्रह्मोपास्तिर्वैश्वानराभिधा ६४ वचनाख्यप्रकरणेविद्यांवैश्वानराभिधां।
ब्राह्मणेग्निरहस्याख्येप्राहुर्वाजसनेयिनः ६५ विद्यामेनांहिजाबालाःप्राहुःस्वोपनिषद्यपि। ६६ द्युमूर्धपृथिवीपादाद्यंगाढ्यंपरमेश्वरं।
वैश्वानराभिधंस्वात्मतयाध्यायन्नुपासकः। ६७ स्वास्याद्याहवनीयादिस्वरूपेणविभावयन्। प्राणादिकाहुतीर्भुक्तोर्हेमिलेनविभावयेत् ६८
सपंक्तिरूपातिथिभ्यः प्राक्प्रथमामाहुतिंस्वयं। स्वमुखाहवनीयाग्नौजुहुयात्तदनंतरं ६९ सपंक्तिस्थाअतिथयोजुहुयुस्तेनिजाहुतीः। इतिजा

त्मनोऽसत्त्वं हबालिशाः २५ देहाभावे देहधर्मचैतन्यादेरभावतः। शरीरे सति चैतन्यसुखादेरत्र सत्वतः २६ स्वरूपांतर्भूतधर्मा अस्याद्यौष्ण्या
७७ दिवद्धिते। इत्याक्षिप्य समाधत्ते व्यतिरेक इतीरयन् २७ व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धिवत्। २ न्याय्यः पृथग्भाव एव शरीरादात्मनः
खलु। ननु दृश्याज्ज्ञातुर्देहादपृथक्त्वं समंजसं २८ मरणावस्थदेहस्य सद्भावेपि चिरादिनः। देहधर्मत्वेष्टस्य तस्मिन्देहे त्वभावतः २९ किंच।
यथा देहादिविषयोपलब्धिः स्वीकृता तया। तथा देहादिभिन्नेति सा स्वीकार्या तथा बलात् ३० देहस्वरूपोपलब्धेर्देहोपि विषयो यदि। कर्म
त्वं कर्तृत्वे कर्त्रे विरुद्धे सा ततः पृथक् ३१ इति द्विसूत्रं लोकायतिकाख्यबौद्धैकदेश्यभिमतदेहात्मवादखंडनपूर्वकं देहातिरिक्तात्मसत्वसाध
कं त्रिंशमधिकरणं ३० अंगावबद्धास्तु न शाखासु हि प्रतिवेदं १ अंगाश्रितास्तु या एताः प्रतिवेदमुपासनाः। स्वस्वशाखामात्रगतकर्मांगा
लंबना न हि ३२ किंतु वेदांतरगतकर्मांगालंबना अपि। अविशेषश्रुतेस्तत्र न त्वोद्देश्यविधेययोः ३३ मंत्रादिवद्वाऽविरोधः २ तंडुलानोपे
पणार्थमश्मादानमनुर्यथा। एकत्र दृष्टोप्यन्यत्र शाखायां स्वीकृतोस्ति हि ३४ मनुर्मंत्रः। यथाश्मयाजे एकत्र प्रोक्तान्यत्रयं तथैव। तथैक
शाखास्थकर्मांगेष्वप्योक्ता उपासनाः। स्वसजातीयकर्मांगेष्वन्यत्रैस्यविरुद्धता ३५ इति द्विसूत्रमेकत्र विहितानामप्युपासनानां वेदांत
रे शाखांतरेष्वप्राप्तिसाधकमेकत्रिंशमधिकरणं ३१ भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति १ वैश्वानराद्युपासासु ध्येयांशा बहवः
श्रुताः। मूर्धचक्षुःप्रभृतयो नोपास्यास्तत्र ते पृथक् ३६ समस्तोपासनस्येह ज्या-स्त्वं क्रतुवन्मतं। सांगोपेतक्रतोरेकः प्रयोगो न पुनः पुनः
३७ प्रसंगवैतदायत्तिस्तद्वदत्र तथैव हि। श्रुतिरैक्यं दर्शयति प्रत्येकोपास्तिनिंदनात् ३८ इत्येकसूत्रं बहुध्येयांशोपेतवैश्वानराद्युपास्ती ७७

नां सति संभवे एकोपास्तित्वसाधकं द्वात्रिंशमधिकरणं ३२ नानाशब्दादिभेदात् १ एकोपास्या अपि पृथक्पृथग्याः संति चोदिताः। विभि
न्ना एव ता ज्ञेया विद्याः शब्दादिभेदतः ३९ छांदोग्ये सगुणा विद्या दहराख्या प्रकीर्तिता। तत्र शांडिल्यविद्या च मधुविद्यादयः श्रुताः ४० अप्येको
पास्या विद्यास्ता विभिन्ना एव संमताः। ददाति यजतीत्यादिशब्दभेदेन कर्मभित् ४१ प्रदानयागहोमादौ गुणभेदेन वक्ष्यति। कर्मभेदः कर्म
कांडे उक्तस्तद्वदिहापि सः ४२ इत्येकसूत्रमेकोपास्यकविद्यानां पृथक्त्वसाधकं त्रयस्त्रिंशमधिकरणं ३३ विकल्पोऽविशि
ष्टफलत्वात् १ उपास्यसाक्षात्कारस्य द्वारायाः फलहेतवः। विद्यास्तासामन्यतरानुष्ठानं न समुच्चयः ४३ फले विशेषाभावाद्धि नैव यु
क्तः समुच्चयः ४४ इत्येकसूत्रं समानफलोपासनानां युगपदनुष्ठाननिवारणपूर्वकविकल्पानुष्ठानसाधकं चतुस्त्रिंशमधिकरणं ३४
काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् १ साक्षात्कारमुपास्या- न पेक्ष्य विहितास्तु याः। काम्या उपासनास्ता अदृष्टद्वारा
फलप्रदाः ४५ नाम ब्रह्मेत्युपासीतेत्यादिकास्ता उपासनाः। निजेच्छया समुच्चीयेरन्न वा नियमोत्र न ४६ अविशिष्टफलत्वस्य पूर्वहे
तोरभावतः ४७ इत्येकसूत्रं काम्यादृष्टद्वारकफलकप्रतीकोपासनानां विकल्पे नियमनिवारकं पंचत्रिंशमधिकरणं ३५ अंगेषु
यथाश्रयभावः १ चतुर्भिः पूर्वपक्षयति उद्गीथादि-कर्मांगेष्वाश्रिता या उपासनाः। तासां स्वाश्रयकर्मांगतुल्यमेव समुच्चयात्। अनुष्ठानप्र
कर्तव्यं नियमे नेति शंकते ४८ किंच। शिष्टेश्च २ प्रतिवेदं यथांगानां विधानं तद्वदेव हि। तदाश्रितोपासनानां विधानात्तैः समुच्चयः। ४९ किंच।
समाहारात् ३ होतृषदनाच्छस्यमाने त्वृग्वेदाय इत कर्मणि। साम्नो द्गात्रास्तूयमाने स्तोत्र उद्गीथसंज्ञकः। ५० यो विद्यते सामभागः प्रणवः

शास्त्रगस्तु यः। तयोरैक्यं तदोद्गाता चिंतयेदित्युपासनं ५१ विधायनत्फलं प्रोक्तं सामस्तुत्यर्थवादतः। प्रणवोद्गीथयोरैक्यचिंतनस्य प्रभावतः
१८ ५२ समाहरत्येव दुष्टमप्युद्गानं निजं तिति। समाङ्पूर्वेत्रि हरतिर्निर्दोषीकरणार्थकः ५३ तथा च वेदद्वयोक्तप्रणवोद्गीथयोर्भवेत्। ऐक्यज्ञाना
त्फलं तीदृग्वाक्यं संसूचयत्यमुं। सर्ववेदस्थांगजातैः श्रितोपास्तिसमुच्चय ५४ सूत्रार्थस्तु। समाहारार्थकाद्वाक्यादपि विज्ञायते खलु। अंगा
श्रितोपासनानां स्वांगैः सहसमुच्चयः ५५ किंच। गुणसाधारण्यश्रुतेश्च ४ कर्मांगानां समुच्चित्यानुष्ठानं स्वांगिकर्मणि। गुणसाधारण्यशब्दा
दत्र सूत्रे विवक्षितं ५६ कर्मप्रयोगवचनैः सर्वांगग्राहकैर्यतः। गुणसाधारण्यमेवम्भूयते हि श्रुतौ ततः ५७ कर्मांगसंश्रितोपास्तेः कर्मांगैः स्यात्स
मुच्चयः। इत्याक्षिप्य चतुःसूत्र्या ततः सिद्धांत उच्यते ५८ न वा तत्सहभावाश्रुतेः ५ नांगनिष्ठोपासनानां स्वांगैः सहसमुच्चयः। समुच्चयस्या
श्रुतत्वान्नियमो नात्र कश्चन ५९ कामात्समुच्चयो वास्त्वाह्निकल्पो वा ऽनुतिष्ठति। अकृत्वर्थत्वतः किंच स्वतंत्रफलकीर्तनात् ६० दर्शनाच्च ६
स्वरादिभ्रंशजाद्दोषाद्ब्रह्मा रक्षति चर्त्विजः। इत्युत्विक्पालनं यत्तद्ब्रुवंती ब्रह्मणः श्रुतिः ६१ अंगाश्रितोपासनानां स्वचयत्य समुच्चयं। अंगाश्रि
तोपासनास्तु नित्याः स्युर्येदित्रहिवै। ६२ प्रणवोद्गीथयोरैक्यध्यानेनैवानिराकृते। स्वरादिभ्रंशजे दोषे वृथा स्याद्ब्रह्मरक्षणं ६३ ऋग्यजुःसा
मजभ्रंशे ब्रह्मा व्याहृतिभिः क्रमात्। जुहुयादिति या प्रोक्ता छांदोग्यादिषु निष्कृतिः ६४ प्रणवोद्गीथयोरैक्यध्यानानित्यत्व एव हि। सफलानि
ष्कृतिः सा स्यात्तस्मान्नासां समुच्चयः ६५ सूत्रार्थस्तु। ब्रह्मर्त्विक्परिपाल्यत्वलिंगात्सर्वेपि जानमपि। अंगाश्रितोपासनानां कर्मांगैर्न समुच्चयः ६६
इति षट्सूत्रकं मांगाश्रितोपासनानां स्वाश्रयकर्मांगैरसमुच्चयसाधकं षड्विंशमधिकरणं २६ इति तृतीये साधनाध्याये षड्विंशाधिकरणात्मको ॥ १८

विद्यांतराणां स्वातंत्र्यं श्रुतावस्ति यथा तथा। अनुबंधादिहेतुभ्यः स्वतंत्रा मानसाग्नयः १० राजसूयप्रकरणात्केवलत्वात्रियार्हतः। विप्रादिकर्तृका
वेष्टेरुत्कर्षो दृष्ट आगमे ११ तथा मानसिकाग्नीनां कर्मप्रकरणाद्बहिः। इदं सर्वं कर्मकांड उक्तं जैमिनिनास्ति वै १२ न स्तामान्यादप्युपलब्धेर्म
त्युवन्न हि लोकापत्तिः ८ मनश्चिदादिवह्नीनां मनसाकल्पितात्मनां। द्वादशाहक्रतुगतमानसाख्येनकर्मणा १३ साम्येपि मानसत्वाख्यसा
मान्यान्न क्रियांगता। अनुबंधादिहेतुभ्यः स्वातंत्र्यस्योपलब्धितः १४ आदित्यमंडलस्थो हि पुरुषो मृत्युरित्यपि। अग्निर्वै मृत्युरिति च श्रुत्या मृ
त्युपदेशनात् १५ साम्येपि मृत्युत्वधर्माद्वैलक्षण्यं मिथो यथा। किंच द्युलोकोग्निस्तस्य ह्यादित्यः समिदित्र हि १६ न द्युलोकस्याग्निभावः साम्ये
प्यग्निद्युलोकयोः। यथा तथा मानसत्वसाम्येप्यत्र मिथो भिदा १७ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः ९ प्रकृतब्राह्मणादस्मात्परे
णब्राह्मणेन वै। प्रकृतब्राह्मणादस्मात्पूर्वेण ब्राह्मणेन च १८ स्वस्यैकदेशस्थवाक्यविशेषस्य प्रयोजनं। तस्याः स्वतंत्रविद्याया विधित्वं लक्ष्यते
यतः १९ अतो मानसिकाग्न्याख्यब्राह्मणेनापि लक्ष्मं। पूर्वोत्तरब्राह्मणाभ्यां सहचारस्तुतत्वतः २० निजैकदेशस्थवाक्यविशेषाणां प्रयोजनं।
स्वतंत्रविद्याविधितारूपं वै लक्ष्यते किल २१ तत्सर्वत्र मानसिकाग्निप्रक्रियाया उपक्रमे। चयनाख्यं बाह्यकर्म यस्मादुक्तं तदुच्यते २२ बाह्याग्नि
चयनस्थानामंगानां मानसाग्निषु। हृदा संपादनीयानां बहुत्वेनात्र सत्वतः २३ बाह्याग्निचयनारंभपूर्वकं प्रतिपादनं। कृतं मानसिकाग्नीनां स्व
तंत्रास्ते ततोग्नयः २४ इति मानसिकाग्निविद्याया उपक्रमगताग्निचयनाख्यबाह्यकर्मांगत्वनिराकरणपूर्वकस्वतंत्रविद्यात्वसाधकं न
वसूत्रात्मकमेकोनत्रिंशमधिकरणं २९ एक आत्मनः शरीरे भावात् १ वदंति देह एवात्मेत्येके देहात्मवादिनः। मन्वानादेहभिन्नस्या

तस्माः।इतियावज्जीवमत्रनियमःश्रवणादपि।नस्वंहिसा ८० इत्याक्षिप्यसमाधानपूर्वंसिद्धांतउच्यते ८१ अधिकोपदेशात्तुबादरा
१९ यणस्यैवमेवतद्दर्शनात् ८ संसारिणःकर्मकर्तुःकर्मांगादधिकस्यतु।असंगाऽकर्त्रऽसंसारिचिन्मात्रस्यस्वरूपतः ८२ तत्पदार्थस्यस
र्वांतर्यामिणोजगदीशितुः।तंपदार्थोपिसदपूर्वंज्ञेयत्वेनोपदेशतः ८३ पुरुषार्थोत इतितुसूत्रेणप्रतिपादितं।श्रीबादरायणस्येहयन्मतं
तत्तथैवहि।नशेषत्वमुखैर्हेत्वाभासैश्चालयितुंक्षमं ८४ नैतादृशात्मविज्ञानंप्रवर्तयतिकर्मणि।प्रत्युतानुपदंकर्माण्युच्छिन्नत्तीतिवक्ष्य
ते ८५ बहुश्रुतिषुदृष्टत्वाच्छारीरादधिकात्मनः।नासंभाव्यात्राधिकोपदेशसिद्धिर्विचारजा ८६ तुल्यंतुदर्शनं ९ विदुषांजनकादीनां
श्रुतोवाचारदर्शनं।कृतंयथातथान्येषांतदभावोपिदर्शितः ८७ असार्वत्रिकी १० यदेवविद्ययेत्यादिरितियादर्शिताश्रुतिः।सानसा
त्रिका।किंतूद्गीथविद्यापरैवहि।उपक्रम्योद्गीथविद्यांयदेवेत्यादिकीर्तनात्।स्वातंत्र्येणाश्रुतफलोपासनाविषयाथवा ८८ विभागःश
तवत् ११ सहानुवृत्तिर्निर्दिष्टावैसमन्वारंभशब्दतः।किंतूभयोर्विभागेनानुसृतिःशतवन्मता ९० दत्तेहाभ्यांशतंद्व्येषप्रविभज्यप्रगृह्यते।
एवंविद्याऽन्यपुरुषंकर्माण्यमनुवर्तते ९१ लिंगंविद्याकर्मणोर्नसमन्वारंभणंततः।९२ अध्ययनमात्रवतः १२ आचार्यकुलाद्वेदम
धीत्येत्यादिकश्रुतौ।अध्यात्मभागसहितवेदस्याध्ययनेपिवै ९३ कर्मकांडपराम्नायाध्ययनज्ञानमात्रवान्।यस्तस्यकर्मकरणंनि
यमेनविवक्षितं ९४ श्रुत्यंतरेहिविदुषःस्वेच्छाचारस्यकीर्तनात्।नैवतस्यकृतेनार्थइतिगीतास्मृतेरपि ९५ नाविशेषात् १३ कुर्व १९

न्नेवेहेतिवाक्यंनज्ञानिविषयंमतं।विद्वानितिविशेषस्याभावादन्यपरंहितत् ९६ स्तुतयेनुमतिर्वा १४ अथवाब्रह्मविद्यायाःस्तुतयेनुमति
स्तुतः।तत्पिकुर्वतिनोलोपोनरेज्ञानबलादिति ९७ निरस्यैवंपूर्वपक्षकोटीःसिद्धांतउच्यते ९८ कामकारेणचैके १५ अपरोक्षीकृतंप्रत्यग
भिन्नंब्रह्मयैर्बुधैः।ब्रह्मविद्याफलीभूतंतैःकेचनविपश्चितः ९९ साधनंधनदारादिशुश्रुवुःकाद्दृष्टकर्मणां।त्यक्तवंतःस्वेच्छयेतिश्रुतौवाजसनेयि
नां।श्रूयतेतत्त्वविद्यायाःकर्मांगित्वेनसंभवेत् १०० धनदाराग्निहोत्रादिकंतुसामान्यसाधनं।कर्महेत्वात्मविद्यातुरक्षास्यस्यात्ततिकथं १
देहादिभिन्नःकर्ताहंकर्मणःफलभोगिति।ज्ञानमेवब्रह्मविद्यातवैष्टावेदसंमता २ सातुकर्मादरेहेतुस्तद्वान्कर्मकथंत्यजेत्।तस्मात्तदु
क्तात्ममतेर्भिन्नाब्रह्ममतिःखलु ३ सानैवकर्मणामंगंस्वतंत्रैवफलप्रदा।तत्फलंमोक्षएवातोनार्थवादःसकस्यचित् ४ उक्तत्यागान्यथा
नुपपत्त्यार्थोयंहिसिध्यति।अतस्त्यागोपिविद्यायांकर्मानंगत्वसूचकः ५ उपमर्दंच १६ यःक्रियाकारकफलविभागोनिखिलोस्तिहि।
तस्यबाधंचात्मनैतिविद्ययाब्रह्मवादिनः।अतोपिकर्मणोनांगंविद्याकर्मोपमर्दिका ६ ऊर्ध्वरेतःसुचशब्देहि १७ परित्यक्ताग्निहोत्रा
दिकर्मद्रविणबंधुषु।यतिष्वपिब्रह्मविद्यावेदेहिश्रूयतेयतः ७ अतोपिकर्मणोनांगंविद्याकर्मविरोधिनी।किंतुस्वातंत्र्यतोमुक्तिफलै
वेतिहिसिध्यति ८ त्रयोधर्मस्कंधायज्ञोदानमित्यादिकाश्रुतिः।आश्रमत्रितयस्योक्त्वापुण्यलोकंफलंततः।तुरीयस्याश्रमस्याहनित्यंमोक्षः
फलंत्विति ९ इतिसप्तदशसूत्रैर्ब्रह्मविद्यायाःकर्मांगताक्षेपनिवारणपूर्वकंस्वातंत्र्येणमोक्षफलसाधकंतृतीयाध्यायचतुर्थपादेप्रथमाधिकर
णं १

परामर्शं जैमिनिरचोदनाचापवदति हि १ तत्तज्ज्ञानस्यान्तरंगसाधनं स्यादूर्ध्वरेतसां। आश्रमो नास्ति विहित इत्याक्षिपति जैमिनिः
२० १० त्रयो धर्मस्कन्धा यज्ञ इति या प्रथिता श्रुतिः। चतुर्णामप्याश्रमाणामनुवादं हि जैमिनिः ११ आचार्यो मन्यते तत्र विधिं तेषां न मन्य
ते। यतः श्रुतिः सा हीनातिविधायकलिङ्गादिना।१२ तपःशब्देन सन्न्यासवानप्रस्थगृहादिह। स्तुत ये ब्रह्मसंस्थ स्यान्तु घेते चतुराश्रमाः १३
चत्वारोप्याश्रमाः क्षय्यपुण्यात्मकफलप्रदाः। सर्वेष्वप्याश्रमेष्वर्द्धाद्यमृताख्यफलप्रदो १४ ब्रह्मसंस्थेति तत्स्तोत्र परापीयं श्रुतिर्यतः। अ
तोपि न विधिस्तेषामत्रेति मनुते मुनिः १५ आश्रमो विहितो यस्तु तुरीयः श्रुतिभिः क्वचित्। कर्मानर्हान्धपंग्वादिविषये धर्मसाधकः। इति
मत्वाक्षिपत्यत्र सन्न्यासं जैमिनिर्मुनिः १६ किंच। अपवद्धीति सत्त्वमागंत्र्यात्वष्टे। वीरहा एष देवानां योग्निमुद्वासयादिति। श्रुतिः स
त्यामधिकृतोपरि व्राज्यं निषेधति १७ अनूद्यत इह श्रौतं गार्हस्थ्याद्याश्रमत्रयं। तुरीय आश्रमः श्रौतः किंतु स्मार्तोप्यनूद्यते १८
न्यासमत्रापवदति वीरहेति श्रुतिः खलु। अतिस्मृत्योर्विरोधे तु श्रुतेः प्रामाण्यमिष्यते १९ ब्रह्मसंस्थत्वममृतफलं स्मार्तत्ववास्पदं।
इत्याशयेनात्रमुनिः परामर्शं हि मन्यते।२० अग्न्युद्वासनशब्दो त्राग्निहीनाश्रमबोधकः। तस्मात्तन्नास्त्याश्रमस्तुर्यो विहितो ब्रह्मवित्त
ये। इति मत्वाक्षिपत्यत्र सन्न्यासं जैमिनिर्मुनिः २१ समाधत्ते। अनुष्ठेयं बादरायणः साम्यश्रुतेः २ परिव्राज्यमनुष्ठेयं मन्यते बाद
रायणः। अनुवादस्येतरेषामाश्रमाणामिह श्रुतौ। प्रमाणासिद्ध गार्हस्थ्यानुवादसमता श्रुतेः २२ ब्रह्मसंस्थपदेनात्र परिव्राज्य २०

तृतीये साधनाध्याये पादत्रयमुदीरितं। वैराग्यतत्त्वंपदार्थगुणाहरणसाधकं ६७ परापरब्रह्मविद्यास्वरूपस्यावधारणं। गुणोपसं
हारेणेति भो क्रान्तउपसंहृतिः ६८ परापरब्रह्मविद्ये स्वतंत्रे मोक्षसाधने। कर्माधिकारिद्वारेण न कर्माङ्गतितस्तयोः ६९ तत्साधनान्य
न्तरंगबहिरंगान्यनुक्रमात्। शमादिकान्यियज्ञादीनीति प्रख्यापनाय च। तृतीयाध्यायगस्तुर्यपादः संप्रतिकथ्यते ७० पुरुषार्थोतः शब्दा
दिति बादरायणः १ अस्माच्छ्रौतात्मविज्ञानात्स्वतंत्रान्मोक्षसंज्ञकः। पुरुषार्थः सिध्यतीति मन्यते बादरायणः ७१ स यो ह वै तत्परमं ब्रह्म वे
देति तद्विदः। ब्रह्मैव भवत्यादिशब्दान्मोक्षफलश्रुतेः ७२ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः २ देहादिभिन्नः कर्ता हि कर्मणः फल
भागिति। कर्माधिकारिद्वारेण कर्मशेषत्वतो धियः। धीफलं मोक्ष इत्येतद्विद्वत्कर्तुः प्रशस्तता ७३ यथान्येषु स्तुतिर्वेदे द्रव्यसंस्कारकर्मसु।
तथा मुक्तिर्नरस्यार्थवाद इत्याह जैमिनिः ७४ किंच। आचारदर्शनात् ३ ब्रह्मविद्यावतां वेदे यज्ञाद्याचारदर्शनात्। न स्वतंत्रात्र ब्रह्मविद्या
किंत्वंगं कर्मणो हि सा ७५ तच्छ्रुतेः ४ यदेव विद्यया युक्तं तद्धि स्याद्वीर्यवत्तरं। श्रुत्येत्युद्गीथविद्यायां कर्मशेषत्वसंश्रुतेः। न स्व
तंत्रात्र ब्रह्मविद्या० सा ७६ समन्वारंभणात् ५ तं समन्वारभेते यां तां विद्याकर्मणी इति। सहानुवृत्तिश्रवणात्परत्र ज्ञानकर्मणोः। न स्व०
हि सा ७७ तद्वतो विधानात् ६ यथाविधि गुरोर्गेहे वेदाध्ययनपूर्वकं। सर्ववेदार्थविज्ञानवतः कर्मविधानतः। न स्व० हि सा ७८
सार्थमध्ययनं वेदाध्ययनस्य विधौ मतं। सर्ववेदार्थबोधान्तर्गताब्रह्मगतिः खलु ७९ नियमाच्च ७ कुर्वन्नेवेह कर्माणि जिजीविषेच्छ

शेषित्वात् १ आख्यायिकास्तुयाः संतिप्रोक्ता उपनिषत्सुताः। पारिप्लवार्था नो विद्याशेषास्ता इति चेन्न तत् ३६ पारिप्लवाभिधेकर्म
२१ विशेषेत्याश्वमेधिके। विशेषितत्वात्कासांचिदेव सर्वाऽपरिग्रहः ३७ आख्यानानितु वेदादौ यानितानि पारिप्लवाः। पारिप्लवानांक नं
राज्ञे पारिप्लवाभिधं। कर्माश्वमेधे संप्रोक्तं श्रुतावध्वर्युकर्तृकं ३८ तथा चैकवाक्यतोपबंधात् २ तथास्योपनिषदकथानां सन्नि
धेर्वेत्वात्। ब्रह्मविद्याशेषतैवत्यन्यत्रानुपयोगतः। स्तुतिद्वारैकवाक्यत्वसिध्येतत्र निबंधनात् ३९ इतिद्विसूत्रं औपनिषदकथानां
स्तुतिद्वारा ब्रह्मविद्याशेषत्वसाधकं चतुर्थमधिकरणं ४ अत एवाग्नीधनाद्यनपेक्षा १ स्वातंत्र्येण ब्रह्मविद्यामुक्तौ हेतुरितीरि
तं। अत एव फले तस्या अनपेक्षा स्वकर्मणां। शुक्तिज्ञानस्यैव शुक्तिरौप्यभ्रमनिवर्तने ४० अग्नीन्धनग्रहेण तत्साध्यं कर्म लक्ष्य
ते। तेषां विविदिषायां वै हेतुत्वं श्रुतिसम्मतं ४१ इत्येकसूत्रं ब्रह्मविद्याफले मोक्षे कर्मानपेक्षत्वसाधकं पंचमाधिकरणं ५ स
र्वापेक्षा च यज्ञादिश्रुतेरश्ववत् १ स्वोत्पत्तौ ब्रह्मविद्याया निखिलाश्रमकर्मणां। अस्त्यपेक्षा बोधहेतु यज्ञादिश्रुतिसत्त्वतः ४२
अश्वो यथा योग्यतया रथ इष्टो न लांगले। ज्ञानोत्पादे तथा कर्म योग्यं नोत्तरकोदये ४३ इत्येकसूत्रमाश्रमकर्मणां ब्रह्मवि
द्याहेतुत्वसाधकं। शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् १ बहिरंगं ब्रह्मविद्याहेतुमा
श्रमकर्म तु। उक्तांतरंगं विद्यायां हेतुमाह शमादिकं ४४ यज्ञादिकर्मणां बोधहेतुत्वे विध्यदर्शनात्। अननुष्ठेयतां भ्रांतश्चेन्म २१

न्वीत तथापि तु ४५ विद्यार्थश्चेच्छमदमाद्युपेतः स्याद्विधानवित्। विद्यांगत्वेन शांत्यादिविधेः श्रौतस्य दर्शनात्। विहितानां श
मादीनामनुष्ठेयत्वतोऽभृशं ४६ इति द्विसूत्रं ब्रह्मविद्योत्पत्तौ सर्वाश्रमोक्तकर्मणां शमादीनां च साधकत्वबोधकं षष्ठमधि
करणं ६ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् १ बृहदारण्यके प्रोक्ता प्राणविद्याखिलत्र हि। प्राणस्यान्नमिदं सर्वमिति
ध्यानं विधायवै ४७ आम्नायते न ह वा अस्यानन्नं जग्धं भवेदिति। जंतुमात्रस्य यद्रूपं जग्धं तत्सार्वकीर्त्यते ४८ तदस्योपास
कस्यान्नमभक्ष्यं न किं तु तत्। भक्ष्यं सर्वमिति श्रुत्यायत्प्रोक्तं तत्र संशयः ४९ विद्यांगत्वेनात्र विधिः सर्वान्नानुमतेरिति। प्राण
स्यान्नमिदं सर्वमिति ध्यानस्य वा स्तुतिः ५० स्वाभिप्रायं सूत्रकारो व्याहसर्वेति सूत्रतः ४ उक्तध्यानस्तोत्रमेव सर्वान्नानुमतिस्त्वि
यं। आपद्येव तु विदुषा विदुषां निंद्यभक्षणे ५१ सर्वान्नानुमतिः साम्नि तथा भक्षणदर्शनात्। चाक्रायणो हि दुर्भिक्षे याचि
ता हस्तिपालकात्। उच्छिष्टानपि कुल्माषान्मुनिर्भक्षितवानिति ५२ अबाधाच्च २ भक्ष्याभक्ष्यविभागाद्धि शास्त्रात्संको
चनादपि। स्तुतिरेव हि सर्वान्नानुमतिर्न विधीयते ५३ अपि च स्मर्यते ३ किं चापद्येवानुमतिः स्मर्यते स्मृतिकर्तृभिः। न तु नाप
दि नोपास्या वस्तुतः स्तुतिरेव सा ५४ शब्दश्चातोऽकामकारे ४ शब्दोऽपि वेदरूपोऽस्ति कामकारनिषेधने। अतः प्राणविदः सर्वान्ना
नुज्ञा नैव कल्पते ५५ इति चतुःसूत्रं प्राणोपासकविषयकसर्वान्नभक्षणानुमतेः प्राणस्यान्नमिदं सर्वमिति ध्यानस्तुतिपरत्वसा

धकं सप्तममधिकरणं ७ विहितत्वाच्चाश्रमकर्मापि १ नित्यानां बोधहेतुत्वाद्यज्ञाद्याश्रमकर्मणां। अमुमुक्षोरनुष्ठाना ऽप्रस
२२ क्ताविदमुच्यते ५६ विदेनुष्ठीयतेयद्बुत्वाश्रमोक्तं मुमुक्षुणा। यावज्जीवविधेस्तद्वत्कार्यं तच्चामुमुक्षुणा ५७ अथेवंदपूर्वपक्ष
परं वैवर्प्यकांतरात्। तथाहि। मुमुक्षुणाप्याश्रमोक्तं कार्यं कर्मामुमुक्षुवत्। यावज्जीवविधेरेवं न ज्ञानार्थं समाचरेत् ५८ ज्ञा
नार्थत्वेतु काम्यत्वादिकल्पात्स्यादनुष्ठितिः। विकल्पनित्यानुष्ठाने विरुद्धत्वेकधर्मिणि ५९ ज्ञानार्थत्वं तु यज्ञादेः स्तुतिराश्रमकर्म
णा। इत्याक्षेपसमाधानमुच्यतेग्रिमसूत्रतः ६० सहकारित्वेन च २ विद्याहेतुत्वेन सह संपादयति नित्यतां। स्वस्मिन्नाश्रमक
र्मातो न विरुद्धोभयार्थता ६१ ज्ञानार्थमप्यनुष्ठानेनित्यत्वं नापगच्छति। तदभावेपिनित्यत्वं यावज्जीवविधानतः ६२ सहका
रिभवेत्कामोभयोः संपादनात्सदा। मुमुक्षुणाप्यनुष्ठेयं सहकारित्वहेतुना ६३ विरुद्धद्वयसंयोगस्तु सिद्धेवस्तुनि बाधकः। नतुसा
ध्ये कर्मणि स्यादुभयस्यापि संभवात्। अतोत्र ज्ञानहेतुत्वं न विरुद्धं श्रुतीरितं ६४ शमादिभिः सह ज्ञानजनकत्वादिकर्मतत्। स
हकारीतिवातेन सहकारित्वहेतुना। मुमुक्षुणाप्यनुष्ठेयं नित्यत्वेनापि हेतुना ६५ नविरोधोद्द्वयार्थत्वे भवेत्स्यादिरूपवत् ६६
सर्वथापि त एवोभयलिंगात् ३ नित्यत्वबोधार्थाभ्यामनुष्ठेया मुमुक्षुणा। यज्ञादयः स्वधर्मा ये त एवोभयलिंगतः ६७ प्रयो २२
गभेदाभावेस्ति लिंगं वेदः स्मृतिश्च वै। अतः सकृदनुष्ठानो सिध्यतीहोभयार्थता ६८ अनभिभवं च दर्शयति ४ मुमुक्षुर्ब्रह्मचा

मनूद्यते। तपः शब्दान्नानुवादस्तपसो ऽसंभवाद्यतेः २३ ब्रह्मसंस्थास्तु वायेहानुद्यंते चतुराश्रमाः। तथापि मानसिद्धास्ते गार्हस्थ्य
वदितीरितं २४ विधिर्वा धारणवत् ३ यत्स्तूयते विधेयं तदितिन्यायादिहश्रुतौ। पारिव्राज्यविधिर्वास्तु त्वपूर्वश्रुतिसंमतः २५
यदा महापितृयज्ञेनीयते स्रुग्घविर्युता। आहवनीयप्रतितदा तत्रेत्यश्रूयते श्रुतौ २६ स्रुचाधः समिधं धृत्वा ऽऽहवनीयमनुद्रवेत्
धारयत्तु परिष्टाद्धि देवेभ्यो नयनेतिति २७ यथोपरिधृतेरत्रत्यनुवादादबाधतः। विधिनात्वेकवाक्यत्वसंभवेपि विहायतत् २८
अपूर्वत्वादूर्ध्वधृतेर्विधिस्तद्वदिहापि सः २९ परित्यक्ताग्निहोत्रादिकर्मद्रविणबंधुषु। पारिव्राज्यं मानसिद्धं ब्रह्मविद्याप्रयेयतेः।
३० अतोपि कर्मणो नांगं विद्या कर्मविरोधिनी। किंतु स्वातंत्र्यतो मोक्षफलेवेदान्तसिध्यति ३१ इति त्रिसूत्रं ब्रह्मविद्योद्देश्य
कपारिव्राज्याक्षेपनिराकरणसाधकं द्वितीयमधिकरणं २ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् १ उपासीतेद्गीथमिति
तथारसतमो हि सः। इत्यादिवाक्यनिर्दिष्टकर्मांगोपास्त्यस्तु याः ३२ ये वैरसतमत्वाद्याः कर्मांगे बोधिता गुणाः। तत्पूर्वाक्ये
षु कर्मांगोद्गीथादिप्रतिपादनात् ३३ तास्तेच कर्मांगविधेः स्तुतिरेवेति चेन्नतत्। मानांतराप्राप्ततया विधेयाएव न स्तुतिः ३४
भावशब्दाच्च २ उपासीतेत्यादि विधायकशब्दश्रुतेरिहने। उपास्तेस्तदुपास्येषु गुणानां चविधेयता ३५ इति द्विसूत्रं कर्मांगो
पास्तीनां तदुपास्यगुणानां कर्मांगस्तुतित्वनिरासपूर्वकं विधेयत्वसाधकं तृतीयमधिकरणं ३ पारिप्लवार्था इति चेन्न वि

नंश्रुतौ तत्र श्रौतवद्गौरसंभवात्। लौकिकोऽग्निर्ग्राह्य इति निर्णीतं जैमिनिर्मुनिः ७७ षष्ठेऽध्यायेऽधिकाराख्येऽवकीर्णिब्रह्मचारिणः। प्राय
२३ श्चित्तं तूक्तवान्यदाधिकारिकमत्र तत्। यो नोक्षितस्तं तु यदीतोऽवकीर्णं तत्र तत्कीर्तितं ७८ तदाधिकारिकमपि नैष्ठिकब्रह्मचारिणः। नैव किंतू
पकुर्वाणब्रह्मचारिण एव तत् ७९ आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा ८० इत्यनि
र्णीप्यपातित्वबोधकस्मृतिसत्त्वतः। प्रायश्चित्तस्य तस्यास्मिन्नैष्ठिकेऽत्वसंभवात् ८१ इत्याक्षिप्य समाधानं प्राहोपेलादिनामुनिः
८२ उपपूर्वमपि त्वेके भावमशनवत्तदुक्तं २ नेदं महापातकं वै येनास्मिन्स्यादसंभवः। अपि त्वेकेषूपपदपूर्वं तदितीमन्यते ८३ अ
तः प्रायश्चित्तभावमवकीर्णिनि नैष्ठिके। अपीष्यं तूपकुर्वाणेऽवकीर्णित्वाऽविशेषतः ८४ मधुमांसाशनप्रायश्चित्तं स्यादुभयोर्यथा।
ब्रह्मचारित्वाविशेषात्तत्क्रत्ने तद्वदेव हि ८५ स्मृतिप्रसिद्धो य प्रायश्चित्ताभावस्य तत्श्रुतौ। अप्रसिद्धत्वयासाक्षान्निष्ठितेः कथनादपि।
प्रायश्चित्तं तु लघुक्तं गर्दभालंभनेहियत् ८६ लोकप्रसिद्धिं संसज्य प्रसिद्धिर्वैदिकी तु या। तस्या आदरणं पत्तदुक्तं जैमिनिनास्फुटं ८७
स्मृतिपादेऽयववराहादिशब्दार्थनिर्णये। प्रसिद्धिर्लौकिकी त्याज्या श्रौती ष्टेतियवादिषु ८८ ग्राह्यं प्रायश्चित्तमेव मुक्तं यतिनैष्ठि
पा योः। अस्योपलक्षणत्वाद्धि तदन्याश्रमयोरपि ८९ प्रायश्चित्ताभाववक्त्री स्मृतिरुक्ता त्वयत्तु सा। प्रयत्नगौरवं कार्यं नैष्ठिकस्य विशुद्धये।
इत्याशयवतीकल्प्या श्रौतार्थस्यानुसारतः ९० इति द्विसूत्रं नैष्ठिकब्रह्मचारिणः प्रमादाद्ब्रह्मचर्यप्राप्यावकीर्णत्वे विश्रौतगर्दभपशुना २३

लभरूपप्रायश्चित्तसद्भावसाधकमेकादशमधिकरणं ११ बहिस्तूभयथापि स्मृतेराचाराच्च १ स्वाश्रमप्रच्युतिर्यतिकथमप्यू
र्ध्वरेतसां। सा महापातकं वास्तु स्यादुपपातकमेव वा ९१ सर्वथोभयथाप्येते कृतनिष्कृतिका अपि। बहिष्कार्या एव शिष्टैरतिनिंदावह
स्मृतेः। तेषां परिग्रहाभावाचारसंदर्शनादपि ९२ अत आश्रमकर्मादि तेषु तीर्णव्रतेष्वपि। कृतं विद्यासाधनं न किंतु निष्फलमेव तत्।
९३ आमुत्रिक्यैव तच्छुद्धिर्या वेदविहितास्ति सा ९४ इत्येकसूत्रं स्वस्वाश्रमप्रच्युतोर्ध्वरेतसां नैष्ठिकब्रह्मचारिवानप्रस्थयतीनामै
हिकशुध्यभावस्य तत्कृताश्रमकर्मादेर्विद्याहेतुत्वाभावस्य च साधकं द्वादशमधिकरणं १२ स्वामिनः फलश्रुतेरित्यात्रेयः १ सांग
कर्मप्रयोगेषु पसुर्व्यधिकृततत्तः। कर्मांगगोपासने वाधिकृतस्याधिकारतः ९५ अधिकारिण्येव पश्चोफलं व्याप्तिसमष्टिजे।।
फलभाजः पसुरेवांगाश्रितोपास्तिकर्तृता। इत्यात्रेयो मुनिः प्राहोपास्तिकर्तुः फलश्रुतेः ९६ इत्याक्षिप्य समाधत्त आर्त्विज्यमिति सूत्रतः।
९७ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते २ अंगाश्रितोपासनं यदृत्विक्कर्तृकमेव तत्। परिक्रियतत्त्वत्विग्भिः फलं प्रापक क
र्मणे ९८ श्रुतेश्च ३ त्विक्कृतोपास्तिजन्यफलस्य पतिगामितां। बोधयंत्याः श्रुतेः सत्ताद्दप्यृत्विक्कर्तृकं हि तत्। इत्यौडुलोमिराचार्यो
मन्यते प्रोक्तयुक्तितः ९९ इति त्रिसूत्रमंगाश्रितोपासनानां फलस्य यजमानगामित्वसिध्यर्थं तासां त्विक्कर्तृकत्वसाधकं त्रयोद
शमधिकरणं १३ सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् १ निर्विंघवाल्यं पांडित्यं मुनिः स्यादिति नो विधिः। मौनस्य

२४ किं त्वनुवादः क्रियते मुनिशब्दतः। अथ ब्राह्मण इति हि विधिहीनसमीपगात् ६० किंच मुख्यब्रह्मबोधपरवाक्यगतेन वै। मुनिशब्देन मौन
स्य न विधिः सह कार्यया। इत्याक्षेपानंतरं प्राह सहकार्यंतरेति हि १ पांडित्यं श्रवणं प्रोक्तं बाल्यं मननमुच्यते। अंतःकरणशुद्धिर्वा बाल्य
शब्देन कथ्यते २ मौनं निदिध्यासनं हि प्रकृतश्रुतिसम्मतं। मुनिशब्देन सन्यासाश्रमोपि कचिदुच्यते ३ त्रिविधः खलु सन्यास आश्रमः
श्रुतिसम्मतः। केवलाश्रमचर्याख्यो भाविविज्ञानकारणं ४ श्रवणादित्रयोपेतो भवेद्वैविदिषालयः। अपरोक्षदृगूर्ध्वं चात्यंतविश्रांतये
खलु। स्वीकृतो याज्ञवल्क्याद्यैर्विद्वत्सन्यास उच्यते ५ स्तुत्यार्थस्तु। ब्रह्मापरोक्षज्ञानाढ्य यतेर्दृश्यस्य साक्षिणः। साध्यशून्य फलीभू
तात्मसाक्षात्कारसिद्धये ६ विधिर्वेदनमौनस्य सहकार्यंतरस्य वै। क्रियते मुनिशब्देन विधानं विधिरुच्यते ७ कर्तव्यत्वेन कथनं विधान
मिति भण्यते ८ स्यान्मौनमपरोक्षत्वे सूक्ष्मस्याध्यात्मवस्तुनः। श्रुध्यानेवासमाधौ वा प्राप्तमौनं पुनर्विधिः। असंभवत्वतः सूत्रे पक्षे
णाप्राप्तिरुच्यते ९ यस्मिन्पक्षे भेददृष्टिप्राबल्यं वर्तते यतेः। तेन पक्षेण मौनस्यात्यप्राप्तस्य विधिः कृतः। येनाचीर्णं पूर्वमेव मौनं तं प्र
तिनो विधिः १० सन्यासो मुनिशब्देन निदिध्यासनमेव वा। इति वेद्यं त्रती यस्याच्छ्रवणादित्रये त्र तत् ११ प्रधानविधिमारभ्य प्रसंग
विधिरस्ति यः। स विध्यादिरिति प्रोक्तो विध्यंतोपि स उच्यते १२ स्याद्दर्शपौर्णमासादिप्रधानपरवाक्यगः। अन्वाधानाद्यंगजात
विध्यंतोत्र यथा तथा १३ कृत्स्नभावात्तु गृहिणोपसंहारः २ सर्वाश्रमाणां धर्माणां शमादीनां कुटुंबिनः। यथासंभवमाम्नायविहि २४

र्येण स्यात्मानं लभते हि यं। स एष आत्मा नष्टेशैरभिभूतो भवेदिति ६९ श्रुतिर्विस्तिह कारित्वे तत्तदाश्रमकर्मणां। लिंगं च दर्श्यं यत्तत्रसा
त्मानभिभवात्मकं ७० इति चतुःसूत्रमाश्रमकर्मणां तंत्रेण नित्यत्वेन विद्याहेतुत्वेन चानुष्ठानसाधकमष्टममधिकरणं ८
अंतरा चापि तु तद्दृष्टेः १ विधुरस्याश्रमस्थलेस्थितस्याप्यात्मसंविदि। अधिकारोस्ति रैक्वादावधिकारस्य दर्शनात् ७१ अपि च स्मर्य
ते २ नग्नचर्योञ्छवृत्तिभक्षाद्यनाश्रमविहारिणां। अपि संवर्तविश्रुकमुख्यानां स्मर्यते खिल। भारतादीतिहासेन ब्रह्मविद्याधुरीणता ७२
विशेषानुग्रहश्च ३ तपोजपादिभिर्धर्मविशेषैर्ज्ञानहेतुभिः। संभवत्यधिकारस्तु बोधेऽनाश्रमिणामपि ७३ अतस्त्वितरज्यायो
लिंगाच्च ४ अनाश्रमित्वादितरत्वाश्रमित्वं मतिद्रुतं। ज्ञानप्रदत्वतः श्रेष्ठं श्रौतात्स्मार्ताच्च लिंगतः ७४ इति चतुःसूत्रं विधुराद्य
नाश्रमिणामप्यनाश्रमिसाधारणतपोजपोपासनादिधर्मविशेषैर्ब्रह्मविद्याधिकारसाधकं नवममधिकरणं ९
तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्द्रूपाभावेभ्यः १ आरूढोत्तमाश्रमस्यास्मान्निकृष्टेत्याश्रमे स्थितिः। न बादरायणस्येष्टा नैवेष्टा
जैमिनेरपि ७५ आश्रमारोहनियमाच्छ्रुतितात्पर्यगोचरात्। अधःप्रत्यवरोहस्य बोधने श्रुत्यभावतः। शिष्टाचाराभावतश्च निकृ
ष्टत्याश्रमे स्थितौ ७६ इत्येकसूत्रमुत्तमाश्रमं प्राप्तस्य ज्ञानार्थकर्मत्वे कीर्षया विषयलोभेन वा निकृष्टाश्रमप्राप्तिनिषेधसाधकं द
शममधिकरणं १० न चाधिकारिकमपि पतनानुमानात्तदयोगात् १ आलंभो गर्दभस्योक्तोऽवकीर्णिब्रह्मचारिणः। प्रायश्चि

तत्वेन सत्वतः १४ नतु सन्यासाश्रमस्याभावेनैवोपसंहृतिः। किंतु सन्यासस्य साध्यश्रवणाद्यधर्मत्रच १५ सन्यासाश्रमसं
सिधिः सन्यासस्योपसंहृतिः। गार्हस्थ्यात्पृथगेवातानुष्ठेयस्तुर्य आश्रमः १६ मौनवदितरेषामप्युपदेशात् ३ गृहिणात्
पसंहारो ब्रह्मचारिवनस्थयोः। कृत्स्नभावादेवतयोर्नाभावादुपसंहृतिः १७ सन्यासाश्रमगार्हस्थ्यासमयोरविहिश्रुतौ। तयो
रप्युपदेशेन पृथक्त्वात्तदनुष्ठितिः १८ मौनशब्देन गार्हस्थ्य सन्यासोभयसंग्रहः। इतरेषामिति बहुवचनं तितरद्वये। अवांतरेषां
भेदानां सद्भावस्य प्रदर्शकं १९ इति त्रिसूत्रं अस्मात्परोक्षयतो विद्वत्सन्यासाश्रमिणो दुःखध्वंसनक निष्ठत्रये पूर्वमप्राप्तनिदिध्या
सनविधिसाधकं ब्रह्मचर्याद्याश्रमत्रयस्यांतःकरणशुद्धिद्वारा तज्ज्ञानार्थं तत्पृथगनुष्ठानं किंतु गार्हस्थ्याश्रमांतर्भावेनैवेत्याशं
कानिवर्तकं चतुर्दशमधिकरणं १४ अनाविष्कुर्वन्नन्वयात् १ बाल्येन तिष्ठासेदिति बृहदारण्यकश्रुतिः। अनभिव्यंजयन्नि
ज्ञानात्मानं ज्ञानिलक्षणोः २० दंभादिरहितस्तिष्ठासुमिच्छेदित्यर्थमाह हि। उक्तार्थकत्व एवास्या बाल्यशब्दार्थविद्ययोः। अंगां
गिभावरूपस्य संसर्गस्य संभवात् २१ इत्येकसूत्रं बाल्यशब्दस्य विद्यासाधनांतःशुद्धिरूपार्थकत्वसाधकं पंचदशमधिक
रणं १५ ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात् १ ब्रह्मविद्यासाधनस्य प्रकृतश्रवणादिनः। प्रतिबंधाभावसत्वे विद्याज
न्मेह जन्मनि। प्र तिबंधकसत्वे स्यादन्यस्मिन्नपि जन्मनि २२ उत्पत्स्यमानविद्याया एतज्जन्मान्यजन्मनोः। उत्पत्ति निर्धारणास्य

३ तस्यश्रुतिषुदर्शनात् २३ इत्येकसूत्रंब्रह्मविद्याजन्मनऐहिकत्वामुष्मिकत्वान्यतरत्वानियमसाधकंषोडशमधिकरणं १६
२५ एवंमुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः १ विद्यायांनिर्विशेषत्वंवस्तुतंत्रत्वतोयथा। मुक्तिरूपेफलेतस्याज्ञे
येवंनिर्विशेषता २४ सतस्यांमुक्त्यवस्थायांब्रह्मैवभवतीतिह। निर्विशेषब्रह्मरूपत्वेनवेदेवधारणात् २५ इत्येकसूत्रंब्र
ह्मविद्याफलभूताविद्यानिवृत्त्युपलक्षितपरमानंदस्वरूपमुक्त्यवस्थायांब्रह्माद्यागोपालांतंतारतम्याभावेनानिर्विशेषैक
रूपत्वसाधकंसप्तदशमधिकरणंचरमं १७ इतिश्रीभगवद्व्यासकृतौशारीरकब्रह्ममीमांसासूत्रेषुउपासूत्रोप
ताधिकरणार्थसंग्राहककारिकासुसाधनाख्यतृतीयाध्यायेसप्तदशाधिकरणात्मकः साधनाख्यश्चतुर्थःपादः
इतिश्रीमल्लक्ष्मीवेंकटेशप्रसादभूषितनरपुंदपत्तनावासनैलकंठिसुब्रह्मण्ययज्वप्रणीतासुशारीरकब्रह्ममीमांसाशास्त्र
निखिलसूत्रार्थसंग्राहककारिकासुसाधनाख्यस्तृतीयोध्यायःसमाप्तः अत्रप्रतिपादंक्रमेणसूत्राण्यधिकर
णानिच प्रथमे। सू० २७ अ० ६। द्वितीये। सू० ४१ अ० ८। तृतीये। सू० ६६ अ० ३६। चतुर्थपादे। सू० ५२। अ० १७। सर्वसंकलनायां २५
सू० १८६ अ० ६७॥ ॥अत्रपादचतुष्टयकारिकाः प्रथमपादे ७३ द्वितीयपादे ९२ तृतीयपादे ३०१ चतुर्थपादे १५९
सर्वसंकलनायांसंख्या ६२५ अत्रपादारंभपत्रं प्रथमे १ द्वितीये ३ तृतीये ७ चतुर्थे १९ समाप्तिपत्रं २५॥ ॥

४
१ तः।उपासकोयतस्तस्मान्नप्रतीकेष्वहंमतिः १२ आत्मबुद्धिःप्रतीकेषुकार्येत्यपिनचोदना १३ स्वाभिन्नब्रह्मानन्यत्वज्ञानान्नेष्व
हंग्रहः।प्रतीकादेःपृथक्त्वबाधबोधोमृषामतिः।मृषात्वेनपरिज्ञातेहंमतेर्नैवसंभवः १४ इत्येकसूत्रंप्रतीकेष्वहंग्रहोपास्तिनिषेध
साधकंतृतीयमधिकरणं ३ ब्रह्मदृष्टिरुत्कर्षात् १ ब्रह्मबुद्धिःप्रतीकेषुकर्तव्यामनआदिषु।महत्वाद्ब्रह्मणोलोकेदृश्यतेहित
थामतिः।उपासितोराजमंत्रीप्रभुदृष्ट्याफलप्रदः १५ इत्येकसूत्रंनिकृष्टेउत्कृष्टबुध्द्योपास्तिसाधकंचतुर्थमधिकरणं ४ आदित्यादि
मतयश्चांगउपपत्ते १ कर्मांगेपिप्रतीकेवैकार्याअर्कादिबुद्धयः।संस्कृतांगैःकर्मफलसमृद्धेरुपपत्तितः १६ इत्येकसूत्रंकर्मांगं
गार्कादौकर्मांगोद्गीथादिबुध्द्यातत्तत्कर्मणिफलसमृध्द्यभावरूपन्यूनतासूचकंकर्मांगेषुकर्मांगदेवताबुध्द्याभ्युह्यादि
नासंस्कृतांगेष्विवसंस्कृतेषुकर्मसमृद्धिफलसूचकंपंचममधिकरणं ५ आसीनःसंभवात् १ उपासीतासीनएवत
स्यैवोपास्तिसंभवात्।तिष्ठतोगच्छतोयत्नबाहुल्याद्व्यग्रताभवेत्।शयानस्यभवेन्निद्रातःस्वास्थ्यंयेनतच्चरेत् १७ ध्यानाच्च २
उपास्तेर्ध्याननिरूपत्वादप्यासीनोभवेत्तदा १८ अचलत्वंचापेक्ष्य ३ अचलत्वंपृथिव्यादावपेक्ष्यध्यायतीवचेः।इतिध्यानस्यो
पचारलिंगादप्यचलस्तदा १९ स्मरंतिच ४ ऋचोदेशेप्रतिष्ठाप्यस्यादिनात्रतत्रवै।स्मरंत्यपिमहात्मानउपास्तौस्थिरमास
नं २० इतिचतुःसूत्रंसगुणनिर्गुणोपास्त्योस्थैर्यतापादकासनसाधकंषष्ठमधिकरणं ६ यत्रैकाग्रतातत्राविशेषात् १ १

यत्रादिग्देशकालेषुचित्तस्यैकाग्र्यताभवेत्।तत्रोपासीतसर्वत्राप्यैकाग्र्यस्याविशेषतः २१ इत्येकसूत्रमुपासायांदिग्देशकाल
नियमाभावसाधकंसप्तममधिकरणं ७ आप्रायणात्तत्रापिहिदृष्टं १ उपास्यसाक्षात्कारस्यद्वारायावत्फलप्रदा।सोपा
स्तिस्त्वामरणांतकार्येतिस्मृतिसिद्धये २२ जीवितांतेप्युपास्तेर्हिदृष्टमावर्तनंश्रुतौ।२३ इत्येकसूत्रमहंग्रहादेःसाक्षात्कारकार
कफलदोपास्तेरामरणांतमनुष्ठानसाधकमष्टममधिकरणं ८ तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशात् १
साक्षात्कारेसगुणाख्यस्यब्रह्मणोनिर्गुणस्यवा।ज्ञानोत्तराघासंश्लेषःपूर्वाघस्यविनाशनं २४ ज्ञानोत्तराघासंश्लेषपूर्वपापविनाशयोः।
एवमेवंदीत्यादिश्रुत्याविदुषिकीर्तनात् २५ इत्येकसूत्रमुभयविधब्रह्मविदःपूर्वोत्तराघनाशासंश्लेषसाधकंनवममधिकरणं ९
इतरस्याप्येवमसंश्लेषःपातेतु १ पापादन्यस्यपुण्यस्याप्येवमश्लेषनाशने।वपुःपातेक्रमवतीसद्योवामुक्तिरेवहि २६ इत्येक
सूत्रमुभयविधब्रह्मविदःपूर्वोत्तरपुण्यनाशासंश्लेषसाधकंदशममधिकरणं १० अनारब्धकार्येएवतुपूर्वेतदवधेः १ प्रारब्ध
व्यतिरिक्तेयेप्राक्तनेपुण्यपापके।तएवनश्यतोबोधान्नतुप्रारब्धकर्मणि।तयोस्थितेस्तदारब्धदेहपातावधिश्रुतेः २७ इत्येकसू
त्रंप्रारब्धव्यतिरिक्तानांकाम्यनिषिद्धकर्मजन्यपुण्यपापरूपसंचितकर्मणांज्ञानान्नाश्यत्वसाधकमेकादशमधिकरणं ११
अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात् १ नित्यनैमित्ताख्येनत्वग्निहोत्रादिनाचितं।पूर्वपुण्यंज्ञानसाध्यमोक्षायैवोपयुज्यते।यज्ञा

४
२ दिकश्रुतौतस्यज्ञानहेतुत्वदर्शनात् २८ अतोन्यापितथैकेषामुभयोः २ नित्यनैमित्तिकादस्मादग्निहोत्रादिकर्मणः।अन्याप्यस्तिब्र
ह्मविदांज्ञानात्साक्षात्तमनुष्ठिता २९ साधुकृत्यापापकृत्यायातयोर्विनियोजकं।तस्यपुत्रादयमितितथैकेषांशाखिनांवचः ३० ज्ञानो
पकारशून्यत्वात्तयोःकाम्यनिषिद्धयोः।विनियोगोयोभिहितःस इष्टोगुरुशिष्ययोः।बादरायणजैमिन्योरुभयोःश्रुतिमानिनोः ३१
अनारब्धेपुण्यपापेएवकाम्यनिषिद्धजे।स्वसजातीयकेन्यत्रसंध्याज्ञानाद्विनश्यतः ३२ नित्यनैमित्तिकेतत्तुज्ञानस्यजनकेमते ३३ इति
द्विसूत्रंसंचितानांकाम्यनिषिद्धकर्मणांव्यवस्थापकंद्वादशमधिकरणं १२ यदेवविद्ययेतिहि १ अग्निहोत्रादिकंकर्मनित्यंनैमित्ति
कंशुभं।समर्पणाद्युपास्त्यैवसहितंयत्करोतिवै ३४ अतिवीर्यवत्तदेवस्यादुपास्तिरहितंतुयत्।तद्वीर्यवत्स्यादित्याहयदेवेत्यादिकश्रु
तिः ३५ इत्येकसूत्रंनित्यनैमित्तिकसत्कर्मणउपास्तिसहितत्वेनानुष्ठानेवीर्यवत्तरत्वसाधकंनिरुपास्तत्वेवीर्यवत्त्वमात्रसाधकंत्रयो
दशमधिकरणं १३ भोगेनत्वितरेक्षपयित्वासंपद्यते १ आरब्धकार्येयेपुण्यपापेतेइतरेबुधः।भोगेननाशयित्वाथस्वरूपेणै
वतिष्ठति ३६ इत्येकसूत्रंप्रारब्धकर्मक्षयद्वारास्वस्वरूपमात्रेणावस्थानरूपकैवल्यमुक्तिसाधकंचतुर्दशमधिकरणं १४ इतिफला
ध्यायेजीवन्मुक्तिःपादःप्रथमः १ अत्राधिकरणानि १४।सूत्राणि १९ चतुर्थेस्मिन्फलाध्यायेद्वितीयपादउच्यते।जीवोत्क्रां
तिरतःपादोत्थयमुत्क्रांतिसंज्ञकः ३७ वाङ्मनसिदर्शनाच्छब्दाच्च १ म्रियमाणस्यजीवस्यस्वोत्क्रांतिसमयात्पुरा।स्वसंनिधुक्तमन २

श्रीः।चतुर्थेस्मिन्फलाध्यायेआद्यपादेनिरूप्यते।जीवन्मुक्तिरतोयंहिमुक्तिपादइतीर्यते १ आवृत्तिरसकृदुपदेशात् १ अभ्यासःश्रवणा
दीनामात्मनोदर्शनावधिः।कर्तव्योह्यसकृद्देतेषांविध्युपदेशतः २ लिंगाच्च २ उद्गीथस्योपासनायांकौषीतकिश्रुतिवाक्यतः।एकस्मि
न्नेवतूद्गीथेबहुरश्मितयैकदा।आदित्यत्वेनचध्यानावृत्तिःसंसूचितास्तिया ३ साऽऽवृत्तेर्लिंगमन्यत्रप्रत्ययेफलसाधके ४ ध्याना
त्मकेप्रत्ययेस्मिन्नावृत्तिःफलदायथा।श्रवणाद्यात्मकेज्ञानेतथावृत्तिर्भवेदिति ५ सूत्रार्थस्तु।श्रवणादेर्मुक्तिहेतोःप्रत्ययस्याऽऽफ
लोदयं।आवृत्तिसूचकांल्लिंगांतराच्चाभ्यासइष्यते ६ इतिद्विसूत्रंफलपर्यंतंनिर्विकल्पकसविकल्पकात्मसाक्षात्कारसाधनश्रवणा
द्यावृत्तिसाधकंप्रथममधिकरणं १ आत्मेतितूपगच्छंतिग्राहयंतिच १ ब्रह्मविद्याभ्यासकालेपरमात्माश्रुतीरितः।स्वात्मत्वेननिदि
ध्यास्यउपास्यश्चमुमुक्षुभिः ७ यतःपरेशंजाबालाउपासासमयेपितं।उपासतेस्वात्मतयात्वंवाइत्यादिवाक्यतः ८ सर्वेजानंत्यात्म
तयाकैवल्यसमयेबुधाः।तद्ब्रह्माहमितिज्ञात्वासर्वबंधैःप्रमुच्यते।इतिकैवल्यसंज्ञोपनिषदाद्यनुशासनात् ९ बोधयंत्यप्यात्मतया
तत्त्वमस्यादिवाक्यतः।अतःस्वात्मतयोपास्योनिदिध्यास्यश्चसर्वदृक् १० गुणोपास्तेःफलंब्रह्मलोकप्राप्तिर्वदिष्यति।शुद्धब्रह्मो
पासनंतुनिदिध्यासनमेवहि ११ कैवल्यंतत्फलंज्ञेयंनार्चिरादिगतिःफलं ११ इत्येकसूत्रंशुद्धशबलब्रह्मणोःस्वात्मत्वेननिदिध्यास
नसाधकंद्वितीयमधिकरणं २ नप्रतीकेनहिसः १ नप्रतीकेष्वहंबुध्याजडेषूपास्तनंहितं।आत्मत्वेनप्रतीकेसोनैवानुभवतिस्व

व्यहारा तेज आदि वर्गे प्राणो वतिष्ठते ५० इति तस्याः श्रुतेरर्थो या प्राणस्तेजसीति तु । बोद्धव्यो जीवनिष्ठत्वे लिंगमत्र श्रुतेर्गलात् ५१ नैकस्मि
२ न्दर्शयतो हि ३ आवश्यकत्वाद्भूतानां नैकस्मिन्नेव तेजसि । जीवो वतिष्ठते तस्मात्तेजसीत्युपलक्षणं ५२ रंहस्याख्याधिकरणे श्रौतप्रश्ननिरूप
णो इममर्थं दर्शयतो यद्वाप्यन्ये हि श्रुतिस्मृती ५३ इति त्रिसूत्रं सूक्ष्मभूतोपहितजीवे उत्क्रांतिकाले संश्लिष्टमनःसहितप्राणावस्थानसाध
कं तृतीयमधिकरणं ३ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य १ देवयानाभिधमार्गगमनारंभणावधिः । जीवस्य देहादुत्क्रां
तिः समाभिज्ञानभिज्ञयोः ५४ अदग्ध्वैव क्लेशबीजममृतत्वमिदं यतः । अतो गौणं देवयानादमृतत्वमुपासितुः ५५ उपदाहं इति प्रोक्त
धातो रूपमिदं मतं । अनुपोष्येत्यतो व्याख्याप्येवमेव कृताकरे ५६ इत्येकसूत्रं देवयानमार्गस्थगम्यसुषुम्नानाडीप्रवेशात्प्रागद
ब्रह्मसगुणब्रह्मोपासकयोर्देहादुत्क्रांतिप्रकारसाम्यसाधकं चतुर्थमधिकरणं ४ तदापीतेः संसारव्यपदेशात् १ परस्यां देवता
यां यत्तेजः शब्दोपलक्षितं । सूक्ष्मभूतात्मकं लिंगशरीरमवतिष्ठते । तदा मोक्षं न श्यति न पुनः संसारवर्णनात् ५७ सूक्ष्मप्रमाण
तश्च तथोपलब्धेः २ सूक्ष्मनाडीप्रवेशस्य श्रवणात्परिमाणतः । स्वरूपतश्च तल्लिंगं सूक्ष्मं स्वच्छं च सोऽस्य तः ५८ नोपमर्देनातः ३
अतः स्वच्छस्य सूक्ष्मस्य लिंगस्य न दाहनाशने । शरीरस्योपमर्दे न दाहच्छेदादिजन्मना ५९ अस्यैव चोपपत्तेरेष ऊष्मा ४ य एष ऊ
ष्मा स्थूले स्मिन् शरीर उपलभ्यते । सोऽस्यैव लिंगदेहस्यानुमानेनात्र संभवात् ६० इति चतुःसूत्रं कैवल्यमुक्तिपर्यंतं लिंगदे ३

हस्याविनाशित्वसाधकं पंचममधिकरणं ५ प्रतिषेधादिति चेन्न शारीरात् १ न तस्य प्राणा उत्क्रामंतीत्युत्क्रांतिनिषेधनात् । प
रब्रह्मविदः प्राणोत्क्रांतिर्नास्तीति चेन्न तत् ६१ शारीरजीवादेवास्य प्राणोत्क्रांतिर्निषिध्यते । न शरीराद् तत्तस्यास्ति प्राणोत्क्रमणं
ततः । इत्याक्षेपे समाधत्ते स्पष्टो हीत्युत्तरं वदन् ६२ स्पष्टो ह्येकेषां २ एकेषामस्ति काण्वानां शाखायां स्पष्ट एव हि । प्रतिषेधः परात्म
ज्ञदेहात्प्राणोद्गमस्य तु ६३ न तस्य प्राणा उत्क्रामंतीत्युक्त्वा तद्द्वयस्य च । अत्रैवात्मनि समवलीयंत इति कीर्तनात् ६४ [illegible]
स्मर्यते च ३ गत्युत्क्रांत्योरभावोऽस्य महाभारतसंज्ञके । इतिहासे स्मर्यते पित्यपदस्येति शब्दतः । पदशब्दो गम्यवाची नेच्छून्योप
द उच्यते ६५ सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः । देवा अपि मार्गे मुह्यंत्यपदस्य पदैषिणः । इति महाभारतवाक्यं ६६
इति त्रिसूत्रं निर्गुणात्मविद्देहात्प्राणोत्क्रांत्यभावमूलकपरलोकगत्यभावसाधकं षष्ठमधिकरणं ६ तानि परे तथा ह्याह १
परब्रह्मविदस्तानि प्राणशब्दोदितानि हि । लिंगदेहकलाभूतसूक्ष्मभूतेंद्रियाणि च ६७ स्वोपादाने विलीयंते सत्त्वे तेः परमात्मनि ।
वाच्यं विलीयंत इति तथा ह्याह भगवच्छ्रुतिः ६८ अधिष्ठानापरोक्षेण निवर्त्यस्य मृषात्मनः । सर्वस्यापि विवर्तस्य योपादानत्वयास्तु
ता ६९ अविद्यातदधिष्ठानाश्रितत्वनियमाश्रिति । श्रुत्या कलालयः प्रोक्तो व्यवहारदृशा तु सः ७० स्वोपादाने स्वकस्य लय इति
न्यायात्क्षमादिषु । स्वप्रकृत्याविति त्युक्ता वुभयोरपि संग्रहः । सूक्ष्मभूतानींद्रियाणि षोडश तत्र कलामताः ७१ इत्येकसूत्रं पर

ब्रह्मविदः प्रारब्धक्षये लिंगदेहस्य स्वोपादानपृथिव्यादिषु लयबोधकश्रुतेः परब्रह्मणि लयबोधकश्रुतेर्मिथो विरोधपरिहाराय
४ व्यवस्थासाधकं सप्तममधिकरणं ७ अविभागो वचनात् १ अविभागः परात्मज्ञकलानां परमात्मना ७२ विभिद्येते नामरूपे
आसामित्युक्तितः परं। सएषोऽकलइत्युक्तेरमृतो भवतीति च ७३ अतो निःशेषलयः कलानां परमात्मनि। परब्रह्मविदोन्ये
षां सावशेषत्वमेव हि ७४ इत्येकसूत्रं निर्गुणात्मसाक्षात्कारवतः प्रारब्धसमाप्तौ परब्रह्मविदभिन्नपरब्रह्मणि निःशेषलिंगभं
गसाधकमष्टममधिकरणं ८ तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृ
हीतः शताधिकया १ प्रासंगिकं समाप्याथ प्रस्तुतं परिचिंत्यते। उपासकस्योत्क्रमणमनूद्याऽऽस्त्युपक्रमं ७५ लीनवृत्तिकवा
गादिसमूहस्योत्क्रमिष्यतः। जीवजातस्य तस्योकोऽयत्स्थानं हृदयाभिधं ७६ तस्याग्रं हृदयश्लिष्टगम्यनाड्याननं मतं।
द्वारस्य तस्य ज्वलनं भानं प्रद्योतनामकं ७७ विद्याऽविद्यावदुभयसमभूसंघते तदा। तेन प्रभासितद्वारो मूर्ख्वो वा पं
डितोपि वा। गम्ययोग्यस्थानमार्गनाडीद्वारेण गच्छति ७८ उपासकस्तु। विद्यांगत्वेनार्चिरादिमार्गध्यानविधानतः।
प्रत्यहं सम्यगभ्यस्तविद्यासामर्थ्यतश्च वै ७९ हृदयस्थोपास्यदेवानुगृहीत उपासकः। मूर्धस्थानादेव नाड्यानि
ष्क्रामति सुषुम्नया ८० इत्येकसूत्रं सगुणब्रह्मोपासकस्य विदुषः प्रद्योतनाख्यसर्वसाधारणगम्यनाडीद्वारप्रति भाना
नंतरं भिन्नगंतव्यदेवयानमार्गभूतसुषुम्नानाडीप्रवेशसाधकं नवममधिकरणं ९ रश्म्यनुसारी १ रात्रौ दिवा वानि ४

सि वाग्वृत्तिः संप्रलीयते ३८ सत्यामेव मनोवृत्तौ वाग्वृत्तिलयदर्शनात्। वृत्तितात्पर्यकत्वाच्च वाक्शब्दस्य श्रुतिस्थितेः ३९ अतएव सर्वा
ण्यनु २ वाक्शब्दः श्रुतिगः सर्वेंद्रियाणामुपलक्षणं। सर्वेंद्रियाणां मनसि लयस्य श्रवणाच्छ्रुतौ ४० स्वोपादाने स्वस्य लयः स्ववृत्तेरितर
त्र तु। सर्वस्याग्नेर्यथा वा यावच्छिवृत्तेर्यथाप्स्वपि ४१ यस्मान्न्यायादेव वाचो वृत्तेर्लयो हृदि। अस्मान्न्यायादेव तद्वदिंद्रियवृत्तिमयखिलान्य
पि ४२ इंद्रियाण्यनुवर्तंते स्वस्ववृत्तिलये न वै। इंद्रियाणां भौतिकानामुपादानं मनो न हि ४३ इति द्विसूत्रं जीवोत्क्रांतौ सवृत्तिके मनसि स
र्वेंद्रियाणां स्वरूपेण लयासंभवेपि स्वस्ववृत्तिलये नानुवृत्तिसाधकं प्रथममधिकरणं १ तन्मनः प्राण उत्तरात् १ तन्मनो वृत्तिसहितं प्रा
णवृत्त्या विलीयते। इत्यर्थो ज्ञायते वाक्याद्वाक्शेषस्यार्थकाग्रिमात् ४४ तन्मनः प्राण इति हि योयमर्थ उदीरितः। पूर्ववाक्यादुत्तरस्य स
ज्ञेयः प्रतिपत्तृभिः ४५ इत्येकसूत्रं मनोवृत्तेः सवृत्तिकप्राणे विलयसाधकं द्वितीयमधिकरणं २ सोऽध्यक्षे तदुपगमादिभ्यः १
निवृत्तवृत्तिः सप्राणो निवृत्तेंद्रियवृत्तः। तेजआद्यधिपे जीवे त्वयं तत्काले वतिष्ठते। जीवं प्रत्युपगमानुगमावस्थानहेतुतः ४६ प्रा
णः करोत्युपगमानुगमावस्थिती इति। बोधयंती श्रुतिर्लिंगं जीवे तत्प्राणसंस्थितेः ४७ सम्मुखं गगनं भूपं प्रतीवोपगमो न तु। अनु
सृत्य गतिर्भृत्याइवाजानुगमो मतः। निश्चांवत्यस्थितिर्जरवेऽपस्थानं तेन सम्मतं ४८ स्थितिलिंगश्रुतेरेवोपगमानुगमावपि। अव
स्थानार्थमेवेति निर्णयाल्लिंगमत्र नो ४९ भूतेषु तच्छ्रुतेः २ देहांतरारंभकेषु तेजःसहचरेषु वै। सूक्ष्मभूतेषूपहिते जीवे प्राणो वतिष्ठते। जी

उपास्तिर्योगशब्देन क्रममुक्त्यै विवक्षिता ९३ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्। इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ९४
५ वे इति। धारणापूर्वकाकर्तृत्वानुभूत्यात्मिका तु या। उपास्तिः सांख्यशब्देन क्रममुक्त्यै विवक्षिता ९५ ते उभे योगसांख्याख्ये उपास्ती स्मृतिचोदि
ते। यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ। अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं। तत्र प्र
याता गच्छंति ब्रह्म ब्रह्मविदो जनाः। इति भगवद्गीतास्मृतिः। इत्यत्र योगिशब्दस्तु योगशब्दाद्विवक्षिते ९६ सूत्रार्थस्तु। योगसांख्यात्मक
स्मार्तोपास्तिद्वययुता हि ये। उपासका योगिनस्ते तान्प्रत्येवाहरादिकः। स्मर्यते यं स्मृतिफलविशेषेणेतरान्प्रति ९७ ननु। योगसां
ख्यात्मिका एव श्रुतिस्था अप्युपासनाः। काश्चित्कर्माश्रिताः काश्चिद्ध्यानमात्रात्मिका मताः। तद्वंतो योगिनः कस्मान्नेष्टा अत्रेति चेच्छृणु
९८ न कालनियमः श्रौतोपास्तिष्विति हि साधितं। प्रागेवातः पारिशेष्यादत्रेष्टाः स्मार्तयोगिनः ९९ स्मार्ते चैव तदिति। अप्यत्रोक्ते यो
गसांख्योपास्ती श्रौतविलक्षणे। एते स्मार्ते अतोत्रैव कालस्य नियतिर्मता। स्मार्तत्वप्रत्यासत्त्यात्र कालस्य विनियोगतः १०० तेन न श्रौ
तविद्यायाः फलाप्तौ कालवीक्षणं १ अत्रैव वर्णकांतरं। योगिनः प्रति च स्मर्यते स्मार्ते चैते इति। स्मृतेः श्रुत्यैकवाक्यत्वनियमात्संभवे
सति। अहरादिपदैः श्रौतदेवयानाभिधाध्वनः २ प्रत्यभिज्ञानतश्चात्र कालशब्दस्य लक्षणा। मार्गातिवाहिकेदेवतत्तत्कालाभिमानि
ति ३ कालाभिमानिदेवानां दिवारात्रौ च सत्त्वतः। श्रौतस्मार्तोपास्तिरूपयोगसांख्ययुता हि ये ४ त एव योगिनोत्रापि तान्प्रत्येवाहरादिकः। ५

दिवारात्रं देवयानसरणेरातिवाहिकः। स्मर्यते यं स्मृतौ कालाभिमानिदेवतागणः ५ श्रुतो यथा योगसांख्यविहिते क्रममुक्तये। स्मृता
वपि तथैवैते स्मार्ते एव विधित्सिते ६ अतो न क्वाप्युपास्तीनां फलाप्तौ कालवीक्षणं। ७ इति द्विसूत्रं रात्रौ दक्षिणायने चोत्क्रांतस्य सगुण
ब्रह्मोपासकस्याफलाप्तौ उत्तरायणादिकालसत्त्वे साफल्यशंकानिवारणपरमेकादशमधिकरणं ११ इति फलाध्याये चतुर्थे जीवसामा
न्योत्क्रांतिपादो द्वितीयः अ० ११ सू० २१ चतुर्थेस्मिन्फलाध्याये तृतीयपाद उच्यते। सगुणब्रह्मविन्मार्गो देवयानपदेरितः ८
आर्चिरादिनामतत्प्रथितः १ यो ब्रह्मप्राप्तिकामः सन् शास्त्रोक्तसदुपासया। यथार्चिरादिनैवेति नार्चिर्भिन्नादि ध्वना २ श्रुत्या पंचाग्निविद्या
यां तद्वृत्तामर्चिरादिकं। मार्गमुक्तेतरस्यापि सगुणोपासकस्य हि। तस्यार्चिरादिमार्गस्य विहितत्वप्रसिद्धितः १० तथा हि। ब्रह्मलोकस्य मार्गोय
मेक एवार्चिरादिकः। तत्तच्छ्रुत्युक्तभेदानामेकवाक्यत्वसंभवात् ११ बृहदारण्यके मार्गश्छांदोग्ये चार्चिरादिकः। श्रुतः पंचाग्निविद्यायां बृ
हदारण्यके पुनः १२ वाय्वादिः पंचमाध्याये विद्यावैश्वानराभिधा। तत्र श्रुतोथ च्छांदोग्ये दशमाध्याय ईरितः। विद्यायां दहराख्यायां नाडीर
श्म्यानुपूर्वकः १३ या कौषीतकिशाखायां विद्या पर्यंकनामिका। तत्राग्न्यादिः श्रूयते सत्यादिश्चापि कुत्रचित् १४ न्यूनाधिक्यं च लोकेषूपो
वा पर्ययव्यतिक्रमः। क्वचित्क्वचिच्छ्रूयते तत एक एवार्चिरादिकः। ब्रह्मलोकस्य मार्गोस्मिन्नन्यत्वं न भवेदिति १५ इति वक्तुं तन्निवेशप्रकारोत्रि
मस्सूत्रतः। वक्ष्यते भगवता सूत्रकारेण युक्तितः १६ अनेकधैवं भेदेपि निर्णेतुं क्रम उच्यते १७ मूर्धन्यनाड्योत्क्रम्यार्करश्मीन्यातीत्युपासकः।

१८ अथार्चिषमुक्थाहर्घाऽऽ पूर्यमाणाख्यपक्षकं। उत्तरायणमासान्षट्ट्याति संवत्सरं ततः १९ देवलोकं ततो वायुं सूर्याचंद्रमसौ क्रमात्।
६ विद्युतं वरुणं तेंद्रं ततो याति प्रजापतिं २० ब्रह्मलोकं ततः प्राप्य मोदते शाश्वतीः समाः॥ २१ इत्येकसूत्रं ब्रह्मलोकमार्गे नैकधात्वस्य त
त्रदर्शनेपि वक्ष्यमाणरीत्या सर्वेषां मार्गाणामर्चिरादिदेवयानमार्गतैक्यावसंभवेन सर्वैकवाक्यतया एकेनार्चिरादिनैवानेकपर्वणा मार्गे
णब्रह्मलोकं गच्छति सगुणोपासक इति प्रतिज्ञारूपं प्रथमममधिकरणं १ वायुमब्दादविशेषविशेषाभ्यां १ नाडी रश्मी देवलोकवायू
इंद्रप्रजापती। वरुणो ब्रह्मलोकश्चेत्यष्टौ नाऽर्चिरादिके २२ मार्गपंचाग्निविद्यास्थे छांदोग्योपनिषद्गते। अत्रानायेतद्ग्रथनप्रकारः कथ्यतेधु
ना २३ यस्मात्सूर्यदेवलोको गंतव्यत्वेन वर्तते। लक्षणात्तादृशो वायोसौ नवाप्युपदिश्यतु २४ सूत्रार्थस्तु। छांदोग्यप्रोक्तपंचाग्निविद्याम्ना
तक्रमेणाये। नाडी रश्म्यानुपूर्व्येण देवमानं समागताः २५ संवत्सराद्देवलोकं प्राप्य वायुं व्रजंतिते। अविशेषेपि छांदोग्येन्यत्र दृष्टविशेष
तः २६ इत्येकसूत्रं अर्चिरादिदेवयानमार्गक्रमनिरूपणे अर्चिरादितडिल्लोकांतक्रमसाधकं द्वितीयमधिकरणं २ तडितोधिव
रुणः संबंधात् १ कौषीतकिश्रुतौ वायो रूपरिष्टाच्छ्रुतेपि सः। वरुणस्तडितो लोकादूर्ध्वमेव निवेश्यते। तडिता सह संबंधाद्वरुण
स्यापयःपतेः॥ २७ इत्येकसूत्रमर्चिरादिक्रमनिरूपणे विद्युदानंतरं कौषीतकिक्रमानुसारेण वरुणादिब्रह्मलोकांतलोकचतुष्टय ६
क्रमसाधकं तृतीयमधिकरणं ३ आतिवाहिकास्तल्लिंगात् १ विद्याफलब्रह्मलोकप्रापका अर्चिरादयः। चेतनादेवतास्तासां

क्रामत्याद्याविद्वान्क्रमुक्तया। आदित्यरश्म्यनुसारी निष्क्रामत्यविलंबतः ८१ निशि नेति चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च।
२ रात्रौ नादित्यरश्मीनां संबंधोस्ति। तिचेन्न तत्। यावद्देहं सूर्यरश्मिनाडी संबंधसत्वतः। रात्रावपि रवेरश्मी ननुसृत्य व्रजत्ययं ८२
यावद्देहं सूर्यरश्मियोगं दर्शयति श्रुतिः ८३ चकारात्रानुक्तयुक्तिसत्वस्याहसमुच्चयं। रात्रौ चस्तोककिरणानुवृत्तिरनुमीयते। वसं
तादौ निशास्वंगे घर्मसंतापदर्शनात् ८४ अस्वल्पत्वान्नानुवृत्तिर्निशास्वन्यासु लक्ष्यते। अतिशीतेनाभिभवाच्छिशिरे दुर्दिनेष्विव
८५ इति द्विसूत्रं दिवारात्रमादित्यरश्म्यनुसारेण मूर्धन्यनाड्यासगुणब्रह्मविद उत्क्रांत्युपपत्तिसाधकं दशममधिकरणं १०
अतश्चायनेपि हि दक्षिणे १ अतएव सदा नाडीरश्म्याश्लेषतएव हि। सविद्याफलमाप्नोति दक्षिणेप्ययने मृतः। कालांतरप्रतीक्षाया
विद्यायामनपेक्षणात् ८६ उत्तरायणगोत्क्रांतिप्राशस्त्यविषयेक्तिया। शिष्टोक्तिरूपाचारस्य प्रसिद्धिः सर्वलोकगा। तस्या अवि
द्विदुत्क्रांतिपरत्वेनव्यवस्थितेः ८७ भीष्मादृत्तोदगयनप्रतीक्षायाप्यस्तद्भ्रमे। स्वस्मिन्विद्वत्ताभिमानरक्ष्यत्वावेदकत्वतः ८८ आ
चारपालनार्थत्वादपि स्वेच्छामृत्युबलात् ८९ सविद्याफलमाप्नोति दक्षिणेप्ययनेमृतः ९० योगिनः प्रति च स्मर्यते स्मार्तेचैते २
अनावृत्त्यै काल उक्तो गीतायां महरादिकः। तदभावाक धंयुक्तिरयनेदक्षिणे निशि। उत्क्रांतोपासकस्यास्यादिति विद्वत्तरं शृणु ९१
योगः सन्नहनोपायध्यानसंगतियुक्तिषु। इति कोशे योगशब्द उपास्त्यापि विश्रुतः ९२ ब्रह्मार्पणाधियानित्यकर्माचारात्मिकात्वया।

ता ४१ विशेषितत्वाच्च २ अमानवोयःपुरुषोब्रह्मलोकात्समागतः।सब्रह्मलोकान्नयतीत्यपिहिश्रूयते कचित् ४२ तेतेषुब्रह्मलोकेषु
७ पराःपरावतःसमाः।वसंतीतिश्रूयतेपिवेदेषुसंतरं कचित् ४३ सूत्रार्थस्तु।बहुत्वभोग्यलोकत्वाधारभावविशेषणेः।विशेषितत्वाद्
तद्ब्रह्मयत्कार्यमेवतत् ४४ विश्वरूपस्यसगुणब्रह्मणोबहुरूपता।प्रदेशभेदैर्घटतेनेकरूपागुणस्यसा ४५ तत्प्रदेशेष्ववस्थातुमह
त्वाल्लोकशब्दभाक्।आश्रयंचेतिसर्वतत्कार्यब्रह्मणिकथ्यते ४६ प्रवेशःसगुणेतस्मिन्सायुज्यमितिकथ्यते।निर्धर्मब्रह्मरूपेणस्थि
तिःकैवल्यमुच्यते ४७ उक्तंचशिवगीतायां।सालोक्यमथसारूप्यंसार्ष्ट्यंसायुज्यमेवच।कैवल्यंचेतितांविद्धिमुक्तिंराघवपंचधा।इ
ति ४८ सामीप्यात्तुतद्व्यपदेशः ३ जीवस्यब्रह्मशब्दस्यजगत्कारणवाचिनः।हेतुसामीप्यतःकार्येप्रयोगोनविरुध्यते ४९ कार्यात्य
येतदध्यक्षेणसहातःपरमभिधानात् ४ अनावृत्तिप्रभृतिभिःश्रुतिभिःकथितत्वतः।प्रतीयतेक्रमान्मुक्तिरर्चिरादिपथेनया ५०
कार्यस्यब्रह्मलोकस्यप्रलयेप्रत्युपस्थिते।तत्रैवोत्पन्नविज्ञानाब्रह्मलोकाधिकारिणा ५१ हिरण्यगर्भेणसहतेकार्यब्रह्मणःपरं।निर्विक
ल्पंपरंब्रह्मविशुद्धंप्राप्नुवंतिहि।इतीत्थंगीकार्यासांक्रममुक्तिर्गतीरिता ५२ सर्वज्ञत्वादिधर्माणांस्वहेतोप्रकृतौलये।सर्वज्ञत्वादिगुणकंका ७
र्यब्रह्मतुकेवलं।ब्रह्मैवपरमंशुद्धंनिर्विकल्पंनिरंजनं ५३ अनाद्यध्यस्तप्रकृतौप्राणिकर्मवशाद्यदा।ईक्षणाद्याःवृत्तिभासास्तदातत्सर्व
वित्तुनः ५४ मायाबिंबोवशीकृत्यतांस्यात्सर्वज्ञईश्वरः।अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा।इत्युक्तत्वात् ५५ एवमेतदनाद्यंतंभ्रमचक्रं

विवर्तते।तत्रसद्यःक्रमाद्वापिमुक्तःपश्यतिनेवतत् ५६ स्मृतेश्च ५ कार्यस्यब्रह्मणोद्वाराब्रह्मलोकनिवासिनां।क्रममुक्तिंबोधयंत्याःस्मृतेरपि
चसत्वतः।कार्यब्रह्मसुखेनैवाप्तुर्याक्रममुक्तिका।तेननावृत्तिवेदविरोधोद्भावनंभवेत् ५८ इतिसिद्धांतमुक्त्वाथात्राक्षेपःक्रियतेत्रिभिः।
५९ परंजैमिनिर्मुख्यत्वात् ६ जीवस्यब्रह्मशब्दस्यपरस्मिन्नेवरूढितः।अमानवोगमयतिपरमेवेतिजैमिनि ६० दर्शनाच्च ७ मुक्ति
मूर्धन्यनाडीरूपगत्यासंप्रतिपादिता।परब्रह्मप्रकरणेकठवल्लीषुदृश्यते।अतोपिगम्यंब्रह्मैवपरमर्चिर्मुखाध्वना ६१ नचकार्येप्रतिप
त्त्यभिसंधिः ८ छांदोग्यदशमाध्यायेविद्योर्ध्वेतुप्रजापतेः।प्रजापतेःसभांवेश्मप्रपद्यइतिहिश्रुतौ ६२ विद्यावतःस्वमूर्ध्वकार्यब्रह्मा
वगाहिनः।गतिपूर्वकसंप्राप्तिसंकल्पस्यश्रुतत्वतः ६३ नार्चिराद्यध्वनागम्यंपरंब्रह्मेतिचेच्छृणु।पदधातोर्गमार्थत्वात्स्नायतेगतिपूर्वता
६४ सभावेश्माप्तिसंकल्पोनकार्यब्रह्मगोचरः।परब्रह्माप्तिमार्गत्वान्मुख्यगोचरएवसः ६५ तस्मात्परब्रह्मविद्याविषयाश्रूयतेगतिः।इ
तिपक्षःपूर्वपक्षइतिभाष्येवधारितं ६६ परविद्याप्रकरणेक्वचिदत्रश्रुतागतिः।परविद्यात्ववार्थासासफलंतद्गतंस्थिति ६७ इत्येषस्त्वत्रम
र्चिरादिमार्गगतेःकार्यब्रह्ममात्रविषयकत्वंनमुख्यब्रह्मविषयकत्वमितिनिष्कर्षोवहपंचममधिकरणं ५ अप्रतीकालंबनान्नयतीति
बादरायणउभयथाऽदोषात्तत्क्रतुश्च। १ प्रतीकोपासकान्ब्रह्मलोकंननयतिश्रुतौ।अमानवःश्रुतौनेतातद्भिन्नान्नयतीतिहि।बादरायण
आचार्योमन्यतेत्रव्यवस्थया ६८ नयनानयनोभयभावाभ्युपगमेसति।सर्वोपासासुपूर्वोक्तदेवयानोपसंहृतेः।अविरोधात्तत्रसर्वपदेसंको

वचोच्छया ६९ एवं व्यवस्थितेर्हेतुस्तक्रतुन्यायएवतु ७० योयत्क्रतुस्तत्क्रतुःसतदाप्नोतीतिवैदिकः।न्यायःप्रसिद्धोत्रक्रतुपदेनध्यानमुच्यते ७१
८ नप्रतीकोपासकेनप्राधान्याद्ब्रह्मसिंसते।ब्रह्मत्वेनप्रतीकस्यध्यातासोतोप्युदस्यते ७२ ताद्रूप्येनतत्स्वरूपेणानुसंधीयतेहियत्।प्रतीकंकथ्य
तेतत्तुप्रतीकंप्रतिमामता ७३ प्रोक्तान्यहंग्रहाणीतिप्रातीकानीतितुद्विधा।उपासनानितेष्वाद्यानीशस्यसगुणस्यच।आत्मेतितूपगच्छंतीति
हिन्यायस्यसत्वतः ७४ अमुख्येमुख्यमंतयःप्रतीकोपासनामताः।७५ पंचाग्न्युपासकायेतेप्रतीकोपासकाअपि।श्रुतेस्तद्विषयेसत्वाद्
वंतिब्रह्मलोकगाः ७६ पंचाग्निविधावर्ज्जिताःप्रतीकोपासकास्तुये।उपास्तितारतम्येनविद्युल्लोकांतगाहिते ७७ विशेषंचदर्शयति २ किंच।
प्रतीकतारतम्येनातोच्चावचफलश्रुतेः।नप्रतीकोपासकानांब्रह्मप्राप्तिरितीर्यते ७८ वाग्वायनाम्नोभयसीत्यादिश्छांदोग्यगाश्रुतिः।ना
मादिषुप्रतीकेषुब्रह्मत्वेनेरिताहियाः ७९ उपास्त्ययस्तत्फलानांविशेषंतूत्तरोत्तरं।उत्कृष्टंदर्शयतिहिप्रातीकात्तारतम्यतः ८० सविशेषःप्र
तीकानामुपास्यत्वेनयुज्यते।नप्रतीकेषुकेरूपब्रह्मोपास्तोसयुज्यते ८१ तस्माद्ब्रह्मोपासकानामेवतत्प्राप्तिरिष्यते।नप्रतीकालंबना
नांतारतम्यात्फलश्रुतेः ८२ इतिद्विसूत्रमप्रतीकब्रह्मोपासकानामेवब्रह्मलोकप्राप्त्यासगुणब्रह्मप्राप्तिर्नतुब्रह्मत्वेननामादिप्रतीको
पासकानांब्रह्मप्राप्तिरितिप्रमेयावहंषष्ठमधिकरणं ६ इतिफलाध्यायेचतुर्थस्यसगुणब्रह्मोपासकानामर्चिरादिदेवयानाख्यमार्गे ८
णैवगतिपूर्वकंब्रह्मलोकप्राप्त्यासगुणब्रह्मावाप्तिसाधकोर्चिराद्युत्तरगतिपादस्तृतीयः ३ अत्राधिकरण ६ सूत्रे १६

नेतृत्वेलिंगसत्वतः २७ अमानवस्तुपुरुषोविद्युत्प्रभृतिलोकतः।गंतॄन्नामयतिब्रह्मेत्याहछांदोग्यगाश्रुतिः २८ तदमानवनेतृत्वंप्र
विलोकेषुविद्युतः।पुरुषाणाममानवानांनेतृत्वेज्ञापकंमतं २९ उत्तरेषुतुलोकेषुमानवावरुणादयः।याःसंतिदेवतास्तासांनेतृत्वं
प्रतिषेधति ३० अर्चिरादिपदैरुक्तायेलोकाःसंतिमार्गगाः।तत्तल्लोकाभिमानिन्योदेवताअर्चिरादयः ३१ लीनेंद्रियस्यविदुषो
भोगस्यासंभवादिह।प्राप्तंस्वलोकंतंतस्मादग्रिमंप्रापयंतिहि ३२ उभयव्यामोहात्तत्सिद्धेः २ लोकेपिमूर्च्छितामत्ताःसंपिंडित
निजेंद्रियाः।दृश्यंतेनीयमानाहिचेतनैःपुरुषैःपरैः ३३ उभयोर्ज्ञानशून्यत्वाद्गंतृगंतव्यमार्गयोः।नेष्टसिद्धिरतस्तत्तल्लोकस्वाम्यर्चिरा
दिषु ३४ नेतृत्वसिद्धेस्तल्लिंगमुक्तंन्यायेनगर्भितं।अतस्तदन्यथानेतुमयोग्यंन्यायगर्भितं ३५ वैद्युतेनैवततस्तच्छ्रुतेः ३ अमानवोयः
पुरुषोविद्युल्लोकंसमागतः।वैद्युतःसतुविज्ञेयस्तस्माल्लोकादुपासकाः ३६ तेनैवोर्ध्वंनीयमानालभंतेब्रह्मसर्ववित्।अमानवस्य
नेतृत्वश्रवणाद्वरुणादयः ३७ येमानवालोकपालाःसहायाएवतस्यते।तदधोलोकपायेतुनेतारस्तेर्चिरादयः ३८ इतित्रिसूत्र
मर्चिरादीनांब्रह्मलोकमार्गातिवाहकत्वसाधकंचतुर्थमधिकरणं ४ निरूप्यमार्गंगंतव्यंगंतव्यंब्रह्मकथ्यते।गम्यंसगु
णमेवेतिनिर्गुणेगत्यसंभवात् ३९ कार्यंबादरिरस्यगत्युपपत्तेः १ अमानवोयःपुरुषःश्रुतोनेतास्फुतोस्तिसः।गमयत्यपरंकार्यमेव
ब्रह्मेतिबादरिः।आचार्योमन्यतेस्यैवगंतव्यत्वोपपत्तितः ४० परंब्रह्मेवसंशुद्धोपाध्याद्यंकार्यमुच्यते।नपरब्रह्मणःसर्वगतस्यगमनीय

तीयमधिकरणं २ ब्राह्मेणजैमिनिरुपन्यासादिभ्यः १ अविभागाधिकरणे बंधान्मुक्तस्य दर्शितं। संदिह्यतेपरब्रह्माभिन्नत्वमुपजीव्यतु १६ सर्व
१ ज्ञत्वादिकंसत्यंतुच्छं वाखरशृंगवत्। मिथ्यावाशुक्तिरूप्यणसदृशंतदितित्रिधा १७ कीदृशानपरब्रह्मस्वरूपेणावतिष्ठते। ब्रह्मात्मकोबंधमुक्तइ
तिसंदेहआगते। मतद्वयेनसूत्राभ्यामाक्षिप्याहनिजाश्रयं १८ सूत्रार्थस्तु। ब्रह्मसंबंधिनासत्यसर्वज्ञत्वादिनासह। ब्रह्मात्मकोबंधमुक्तोऽवतिष्ठ
तइतिश्रुतौ। आहजैमिनिराचार्यउपन्यासादिहेतुतः १९ उपन्यासोविधिश्चाथव्यपदेशइतित्रयः। वेदभागाः सत्यरूपसर्वज्ञत्वादिबोधकाः
२०० सउपन्यासउद्देशोयस्तुप्रोक्तोविधित्सया। १ अज्ञातज्ञापकोभागोविधित्वेनविवक्षितः। विध्युद्देशाविभिन्नोयोनिर्दिष्टः सिद्धवस्तुयः। व्यप
देशः सविज्ञेयशब्दतत्त्वविचक्षणैः २ चितितन्मात्रेणतदात्मकत्वादित्यौडुलोमिः २ जीवस्यसच्चिदात्मत्वादलीकद्वन्द्वताशमे। चितिचिन्मात्ररू
पावस्थितेमुक्तआत्मनि ३ अन्येजडत्वांतराभासैः शब्दाःसर्वविदादयः। निरर्थकाःप्रयुज्यन्तेवंध्यापुत्रादिशब्दवत्। इत्यौडुलोमिराचार्यआहतु
च्छंजगद्वदन् ४ एवमप्युपन्यासात्पूर्वभावादविरोधंबादरायणः ३ ब्रह्मात्मकस्यमुक्तस्यचरमब्रह्मविद्यया। पारमार्थिकचिन्मात्रस्वरूपांगी
कृतावपि ५ जीवांतराभासदृष्ट्यापूर्वोक्तैश्वर्यसत्त्वतः। उपन्यासादितोज्ञातब्रह्मैश्वर्याविबाधनात् ६ ब्रह्मसंबंधिसार्वज्ञ्याद्यैश्वर्यतदभावयोः।
अविरोधंमुक्तरूपेमुक्तामुक्तव्यवस्थया। मन्यमानोजगन्मिथ्यामन्यतेबादरायणः। ७ मुक्तस्वरूपमेतद्यद्ब्रह्मतन्निर्विशेषकं। सविशेषंचयद्ग
पन्मुक्तामुक्तदृशामतं ८ इतित्रिसूत्रंप्रपंचस्यानिर्वचनीयतयामिथ्यात्वसाधकंतृतीयमधिकरणं २ अनादिमूलप्रकृतिरध्यस्तास्त्वात्म १

निस्वतः। स्वाध्यासेकारणंनान्यदनादित्वादपेक्षते ९ अतिजीवंविभिन्नैवस्वल्पाविद्येतिकेचन। अंशभेदेनोपपन्नेरेकत्वंबहवोऽवदन् १० एकैवम
ङ्काविद्येतिपक्षोयंबहुसंमतः। तस्याअंशाअसंख्याताजीवसंसृतिहेतवः ११ नैकारणशरीराख्याज्ञानोच्छेद्याअनादयः। एकैकजीवस्यैकैक
एवांशःकारणंवपुः १२ यत्कारणशरीरस्यनाशोमुक्तःसएवतु। अन्येजीवान्तराभासाअज्ञत्वात्संसरंतिहि १३ अविद्यास्त्वत्वविद्यायामेवा
सिताप्रकल्पिता। ब्रह्मदृष्ट्यात्वविद्येयंनकथंचनयुज्यते १४ सोपाद्यात्परंब्रह्मविद्यायाआदितःफलं। अत्रपादेधिकरणत्रयेणोक्तमतःपरं।
तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्यासहकार्येणनासीदस्तिभविष्यति १५ अपरब्रह्मविद्यायाःफलंवक्तुमुपक्रमः १६
संकल्पादेवतच्छ्रुतेः १ क्रमाप्तब्रह्मलोकस्यविदुषोभोगहेतवः। संकल्पादेवसिध्यंतिसर्वैश्वर्यमनंतरा। हेत्वंतरनिरासार्थमेवकारःश्रुतेःश्रुतौ १७
अतएवचानन्याधिपतिः २ सत्यसंकल्पत्वरूपादीशधर्मान्तदाबुधः। आविर्भूतादेवविद्वान्नपस्यान्योधिपोस्तिसः १८ इतिद्विसूत्रंक्रममुक्तेसगुण
भगवत्साक्षात्कारवतिसर्वेश्वरस्यसत्यसंकल्पत्वरूपस्यसर्वज्ञत्वसर्वेश्वरत्वाद्यनंतासाधारणगुणगणवलितस्यानन्यसाधारणैश्वर्यस्यप्रादुर्भा
वसाधकंचतुर्थमधिकरणं ४ अभावंबादरिराहह्येवं १ आचार्योबादरिर्देहेंद्रियाभावंहिमन्यते। मनोमात्रेणमुक्तस्यसंकल्पात्सर्वसिद्धितः। य
स्मादेवंश्रुतिःप्राहमनसेत्यादिनाततः १९ भावंजैमिनिर्विकल्पामननात् २ देहेंद्रियमनोयोगंजैमिनिर्मन्यतेमुनिः। मुक्तस्यानेकरूपाणांविकल्पा
मननाच्छ्रुतौ २० द्वादशाहवदुभयविधंबादरायणोतः ३ यतोयंमनसापश्यन्निप्यपिस्मृयतेश्रुतौ। एकधानेकधाभावविकल्पश्चाभिधीयते २१

१० अतएवोभयविधमैश्वर्यंबादरायणः। विदुषोमन्यते सत्राहीनाख्यद्वादशाहवत् २२ द्वादशाहस्यसत्रत्वमहीनत्वंयथोभयं। शरीरेंद्रियराहित्यंत
त्साहित्यंविदस्तथा। सत्यसंकल्पत्वतोस्योभयंस्वेच्छावशाद्भवेत् २३ तन्वभावेसंध्यवदुपपत्तेः ४ सेंद्रियस्यशरीरस्याभावकालेतुसंध्यवत्। देहा
मानसिकोभोगोजाग्रद्भोगविलक्षणः २४ मनसापश्यन्निस्वस्याएवमेवोपपत्तितः। स्वप्नाख्यावस्थितिःसंध्यंसंध्यौजाग्रत्सुषुप्तयोः २५ भावे
जाग्रद्वत् ५ देहसत्वेजागृतिवद्भोगःस्वप्नविलक्षणः। विदुषोजायतेतस्मात्सदेहादेहतेअपि २६ इतिपंचसूत्रंकेममुक्तस्यब्रह्मलोकगतस्य
सेंद्रियदेहसाहित्येनतद्राहित्येनवास्वसंकल्पमात्रेणाभीष्टसकलभोगसाधकंपंचममधिकरणं ५ प्रदीपवदावेशस्तथाहिदर्शयति १
स्वसृज्यमानदेहेषुस्वसृष्टैर्मनइंद्रियैः। आवेशोदीपवद्धेतुःसंकल्पादेवयुज्यते २७ तथाहिवेदएकस्यविदुषोनेकरूपतां। दर्शयत्येकधेत्यादिर्वे
दुविस्तरसंयुतः २८ नदेहेनापिचिन्मात्रआत्माविद्वान्निहेष्यते। लिंगोपहितआत्मैवविद्वान्भवतिविद्यया २९ अनेकदेहसंव्यापिविद्वल्लिंगशरी
रकं। अनाद्येकेनमनसानियम्यैर्बहुभिर्युतान्। मनोभिःस्वेच्छयादेहान्सृष्टान्प्रविशतिस्वयं ३० एकोदीपोनेकदीपभावमापद्यतेयथा। एकदीपत
त्वेनव्यक्तिभेदेषुचैकता ३१ एवंसविद्वानेकोपिबहुभावंप्रपद्यते ३२ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंहि २ समनस्कैंद्रियैर्देहैर्विदुषोने
कधाकृता। विशेषदर्शनाभावश्रवणादितिचेन्नतत् ३३ तत्रद्वितीयंनतस्मिन्यत्सपश्येदितरत्तत्किं। यत्रास्यसर्वमात्मैवाभूत्सपश्येत्केनकंतिति ३४
विशेषदर्शनाभावश्रवणंयददिंश्रुतौ। तद्धिप्रस्तापकैवल्यान्यतरापेक्षमेवतु। स्पष्टीकृतंप्रकरणात्क्रमिमुक्तोनबाधकं ३५ इतिद्विसूत्रंकममुक्त १०

श्रीः। चतुर्थेस्मिन्फलाध्यायेचतुर्थेपादउच्यते। निर्गुणब्रह्मविद्याप्याः परामुक्तिःश्रुतीरिता। अप्यार्चिरादिनाब्रह्मलोकगैश्वर्यवर्णनं ८३
संपद्याविर्भावःस्वेनशब्दात् १ अभिमानंपरित्यज्यशरीरात्रितयेप्यय। सच्चिदानंदमात्मानंसाक्षाज्जीवोनुपश्यतु ८४ आविर्भवत्यात्मरूपेणोवना
गंतुकात्मभिः। निजार्थकात्स्वशब्दाद्धिरूपशब्दविशेषणात् ८५ नात्मीयवाचीकिंत्वत्रस्वशब्दोत्यात्मवाचकः। उपसंपत्तिशब्दार्थःसाक्षात्कारः
सयोंतिमः ८६ आविर्भवाभिनिष्पत्तिशब्दार्थोत्रत्ववस्थितिः। स्वार्थस्तु। साक्षात्कृत्यपरंज्योतिःस्वस्वरूपेणासंस्थितिः। अत्रश्रुतौश्रुतात्मवाचि
त्वेनेतिशब्दतः ८७ मुक्तःप्रतिज्ञानात् २ योभिनिष्पद्यतेस्वेनरूपेणावस एवहि। मुक्तःसर्वानर्थबीजबंधादज्ञानसंज्ञकात् ८८ एतंत्वेवतेभूयो
नुव्याख्यास्यामीतिवाक्यतः। व्याख्येयत्वेनमुक्तस्यप्रतिज्ञाश्रवणाच्छ्रुतौ ८९ मुक्तस्वरूपव्याख्यानप्रतिज्ञाकृतिपूर्वकं। ब्रह्मसाक्षात्कृ
तिमलोब्रह्मभावस्यकीर्तनात् ९० निर्भेदसच्चिदानंदब्रह्मसाक्षात्कृतेःफलं। तस्मिन्नध्यस्तमायायानिवृत्तीरज्जुसर्पवत् ९१ आत्माप्रकरणात् ३
परंज्योतिःपरात्मैवनतेजोभौतिकंमतं। उपक्रमादिभिर्लिंगैरात्मप्रकरणादिह ९२ यआत्मापहतपाप्मेत्यात्मनोत्रह्युपक्रमः। यस्त्वमात्मा
नमनुविद्येतिविद्योपसंहृतिः। एवमभ्यासादिचात्रास्यात्मप्रकरणावृहं ९३ इतित्रिसूत्रंसर्वानर्थावहाज्ञानाख्यबंधनिवर्तकस्वप्रकाश
परज्योतिर्भावस्वरूपपरममुक्तिसाधकंप्रथममधिकरणं १ अविभागेनदृष्टत्वात् १ संपद्यपरंज्योतिर्योमुक्तोबंधनतःसतु। आत्यंतिकेनपर
नृ मात्माभेदेनावतिष्ठते ९४ ब्रह्मैवसन्ब्रह्माप्येतीत्यादौनिर्भेददर्शनात् ९५ इत्येकसूत्रंविदेहकैवल्यवतोनिर्भेदब्रह्मस्वरूपेणावस्थानसाधकंद्वि

६ प्रत्यक्षस्याऽनतिशयमैश्वर्यमिति चेन्नतत्

स्वलिंगद्वाराशोपाहिनात्मस्वरूपस्य सत्यसंकल्पत्वेन भोगार्थं स्वस्रष्टानेकदेहेषु पुरातनांतःकरणविद्योपयोगसामर्थ्याद्नादिस्वकीयैकमनोनुरु:
त्तिमदनेकागंतुकस्वस्रष्टांतःकरणद्वाराप्रवेशसाधकं षष्ठमधिकरणं ६ अथ षट्सूत्रं चतुर्थाध्यायचतुर्थपदांतिमं सप्तममधिकरणं सं
कल्पाधिकरणाक्षरीत्याप्राप्तनिरंकुशैश्वर्यापवादार्थमारभ्यते। जगद्व्यापारवर्जंप्रकरणादसंनिहितत्वाच्च १ विदुषाप्रोक्तमैश्वर्यमणिमा
मह्निमादिकं। जगत्सृष्टिस्थितिलयव्यापारेणविवर्जितं। स्वसंकल्पादेवसाध्यमप्यतो न निरंकुशं ३६ ईश्वरस्यैवसृष्ट्यादिव्यापारो विदुषोन
सः सर्वत्रसृष्टिवाक्येषु तस्यैवप्रकृतत्वतः। विदुषस्त्वसंनिधानाद्वीशैश्वर्यं निरंकुशं ३७ प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमंडलस्थोक्तेः २
सूर्यमंडलमध्यस्थपरेशोपासकस्यहि। आप्नोति स्वाराज्यमिति श्रुत्यैश्वर्योपदेशतः ३८ स्वाराज्यश्रुत्युत्तरयात्याप्नोति मनसस्पतिं। इति श्रुत्या
पूर्वमुक्तस्वाराज्याप्तेः पृथक्पुनः। आधिकारिकबिंबस्थेशाप्तेः प्राप्यतयोक्तितः ३९ अस्यायमभिप्रायः। स्वाराज्यशब्दाभिहितं नात्यैश्वर्यं निरंकु
शं। स्वाराज्यशब्देनैश्वर्यं यदीष्टं स्यान्निरंकुशं ४० मनसस्पतिसंप्राप्तिरूपमैश्वर्यकं पुनः। नविदध्यात्प्राप्यतया स्वाराज्याप्त्यैवलाभतः ४१
अतः पूर्वमुक्तं तत्स्वाराज्यं न निरंकुशं। किंतु प्रकृतमैश्वर्यमिष्टं स्वाराज्यशब्दतः ४२ अधिकारयति स्वस्वेधिकारे त्वाधिकारिकः। रव्यादि
मंडलस्थः सन्नंतर्यामितया प्रभुः ४३ मनसस्पतिशब्दार्थो बुद्धियंतार्क ईश्वरः। तदाप्तत्वं सर्वभोगस्वाराज्यं तत्प्रसादतः ४४ इच्छंति नैवेच्छं
त्येते जगज्जन्मादिकर्तृतां। अतः सातिशयैश्वर्यं विदुषो न निरंकुशं ४५ निरंकुशैश्वर्यनिवारणे हेतुमाह। विकारावर्तिचतथाहिस्थितिमाह ३

विकारावर्तिनि हर्ति चेत्युक्तं परमेश्वरं। रूपमस्ति तथात्याह स्थितिं श्रुतिः ४६ एतावानस्य महिमा पादोस्येत्यादिका सदा। इति सूत्राक्षरार्थो
११ यमस्य तात्पर्यमुच्यते ४७ यथा निरंकुशैश्वर्ये हिरूपे सर्वदेश्वरे। संस्थितं निर्गुणं रूपमनवाप्यत्युपासकाः ४८ मुक्ताः सगुण एवावतिष्ठंते रूपऐश्व
रे। निधर्मरूपसंप्राप्ति संकल्पेनानुपासनात् ४९ एवं सगुणरूपेपि सदा तिष्ठन्निरंकुशं। ऐश्वर्यमनवाप्नोति सांकुशैश्वर्य ऐश्वरे ५० स्वरूपेत्यवतिष्ठं
ते क्रममुक्ता उपासकाः। निरंकुशैश्वर्यलाभसंकल्पेनानुपासनात् ५१ जगत्सृष्ट्यादिकर्तृत्वकामस्य कापि वेश्रुतौ। अदर्शनात्तत्संकल्पस्तेषां नेत्य
वगम्यते ५२ अथ ब्रह्मणः सर्वरूपं सगुणमेव निर्गुणास्यरूपमेव नास्तीत्याशंकायामाह। दर्शयतश्चैवं प्रत्यक्षानुमाने ४ श्रुतिस्मृती दर्शयतस्त्वय
स्यैवं निर्गुणात्मतां। न तत्र सूर्यो भातीति न तद्भासयते त्विति ५३ भोगमात्रसाम्यलिंगाच्च ५ उपासकस्य मुक्तस्योपास्यदेवतया सह। तद्भोग्यभोग
मात्रेण साम्यलिंगाच्च वेदगात्। मुक्तस्योक्तं सातिशयमैश्वर्यमवगम्यते ५४ अथ। नन्वेवं विदुषः सातिशयमैश्वर्यमुच्यते। यद्यनित्यं भवेत्तर्हि लौकिकै
श्वर्यवत्पुनः ५५ तत्क्षये जन्तुरावृत्तिः प्रसज्येत बुधस्य च। इत्याशंकोत्तरं प्राह भगवान्बादरायणः। गूढाभिप्रायवान्सर्ववेदाचार्यः कृपानिधिः। गूढा
शयस्त्विथं ५६ क्रममुक्तो ब्रह्मलोके प्राप्तनिर्गुणविद्यया। न परावर्तते किंतु तल्लोकपतिना सह ५७ कैवल्यमुक्तिमाप्नोतीत्युक्ततात्पर्यमिव हि। अंत
वत्वेपि विदुषऐश्वर्यस्य न संसृतिः ५८ किंच। यदा तु सगुणब्रह्मविदामपि यदाश्रयात्। कैवल्यमुक्तिसंप्राप्तिस्तया निर्गुणविद्यया ५९ जीवन्मुक्तैर
वस्थायामेव साक्षात्कृतात्मनां। निर्भेदब्रह्मरूपाणां पुनरावृत्तिसंशयः ६० नैव कस्याप्युदेतीति नोक्ताऽनावृत्तिरत्र हि। इत्यभिप्रायवान्सर्ववेदाचार्यः ११

कृपानिधिः ६१ अनावृत्तिःशब्दादनावृत्तिःशब्दात् ६ देहोत्क्रमणकालीनोपास्यध्यानस्यशक्तितः। नाडीरश्म्यानुपूर्व्येणनिर्गताब्रह्मरंध्रतः ६२
देवयानेनार्चिरादिपर्वणाप्रथितापथा। स्वाग्निमंप्रापिताल्लोकमर्चिरादयातिवाहकैः ६३ अनन्यसाध्यशास्त्रोक्तभोग्योत्कर्षसमन्वितं। गच्छंतियेब्र
ह्मलोकमप्रतीकावलंबनाः ६४ अमानवेनैवपुंसाविद्युल्लोकमितोलोकतः। प्रापिताब्रह्मसदनंविद्वांसःसदुपासनाः ६५ तत्रतेषांनिवसतांतल्लोक
पतिनासह। कल्पांतेप्राप्स्यतामुक्तिंकैवल्याख्यांनिरंकुशां ६६ अभीष्टाञ्जुषमाणानांविषयान्काममात्रतः ६७ श्रुत्युक्तोपासनोपास्येश्वरसं
प्रेमदर्शनात्। प्रक्षीणजन्ममृतिदसंचितागामिकर्मणां ६८ प्रनष्टक्लेशजालानामुपास्येशप्रसादतः। तल्लोकेप्रापदशानित्यंध्यायिनांयोगनश्च
षां ६९ कदापिपुनरावृत्तिर्नैतेषांब्रह्मलोकतः। तेषांनपुनरावृत्तिरित्यादिश्रुतिमात्रतः ७० सूत्राभ्यासस्तुशास्त्रस्यसमाप्तिद्योतकोमतः। अ
ध्यायस्यसमाप्तौतुपदस्याभ्यासईरितः २७१ इतिश्रीभगवद्वेदव्यासप्रणीतशारीरकब्रह्मवेदांतमीमांसाशास्त्रेचतुर्थेफलाध्यायेब्रह्मप्राप्तिब्र
ह्मलोकाख्यचतुर्थपादेउपासूत्रसहिताधिकरणार्थसंग्राहककारिकासुषट्सूत्रं क्रमयुक्तानांसंसारानावृत्तिबोधकंसप्तममनावृत्त्यधिकरणं। ७।
अत्रप्रतिपादक्रमेणसूत्राण्यधिकरणानिच। प्रथमे। सू० ११ अ० १४ द्वितीये। सू० २१ अ० ११ तृतीये। सूत्रे १६। अ० ६ चतुर्थपादे। सू० २२ अ० ७।
अत्रपादचतुष्टयकारिकाः २७१ समाप्तिपत्रं १२ सर्वसंकलनायांसूत्राण्यधिकरणानि। सू० ७८ अ० ३८।

४
९२

Adhi Karnartha Sangraha Karika

262

अधिकरणार्थ संग्रह कारिका

अवे[illegible]

3/11